Digitization by Arya Samaj Charitable Foundation, Chennai

वे

THE

PRINCESS OF WALES

SARASVATI BHAVANA TEXTS

No. 10

(PART I)

THE

SIDDHĀNTA RATNA

GOVERNMENT SANSKRIT LIBRARY,

BENARES.

1924

भारतीय विद्या भवन

Sa VID 1112

Price, Re. 1-2-0.

Saleable at half of the printed price.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

1112

VID

252

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

THE

PRINCESS OF WALES

SARASWATI BHAVANA TEXTS

No. 10

(PART I)

EDITED BY

GOPĪ NĀTHA KAVIRĀJA

THE

SIDHĀNTA ṚATNA

Printed by

JAI KRISHNA DASS GUPTA,

at the Vidya Vilas Press,
Gopal Mandir Lane,
Benares City.

1924

Saleable at half of the printed price.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीबलदेवविद्याभूषणविरचितं

सिद्धान्तरत्नम्

(सटीकम्)

THE

SIDDHĀNTA RATNA

(WITH COMMENTARY)

OF

BALADEVA VIDYĀBHŪṢAṆA

EDITED WITH INTRODUCTION ETC

BY

GOPI NATH KAVIRAJ, M. A.,

LIBRARIAN, GOVERMENT SANSKRIT LIBRARY,

SARASVATI BHAVANA, BENARES.

Arya Sanskrit Mahavidyalaya
153

1924

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

PREFATORY NOTE

The following edition of the 'Siddhāntaratna' is prepared from two Devanāgarī manuscripts deposited in the Government Sanskrit Library, Benares.

The present work, which forms an introduction to the author's commentary on the Brahma Sūtrās, called Govindabhāṣya, embodies within a short compass the main doctrines, philosophical as well as theological, of the Gauḍīya Vaiṣṇava School of Bengal.

For those who have no access to the learned disquisitions of S'rī Jīva Gosvāmī in the six or rather seven Bhāgavata Sandarbhas or to the subtle analysis of human emotions as exhibited in the writings of Śrī Rūpa Gosvāmī, the Siddhāntaratna will be a reliable substitute.

The author of this work was the great Baladeva Vidyābhūṣāṇa, who is well known in the Vaiṣṇāva community as the author of numerous treatises connected with the Bengal School of Vaiṣṇavism.

We reserve our observations on the author & his works & teachings for the "Introduction" which will be appended to the second part of the Siddhāntaratna.

Sanskrit College,
Benares.
March 31, 1824.

Gopinath Kaviraj.

Digitization by Arya Samaj Charitable Foundation, Chennai

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमद्बलदेवविद्याभूषणविरचितं

श्रीगोविन्दभाष्यपीठाख्यं

सिद्धान्तरत्नम्

॥ ॐनमः ॥

वेदास्तथा स्मृतिगिरो यमचिन्त्यशक्तिं
सृष्टिस्थितिप्रलयकारणमामनन्ति ।

ॐनमः पूर्णप्रमितये गोविन्दाय ।

यस्य श्रीमन्नामपीयूषवर्षै-
रासीद्विश्वं धूततापं किलैतत् ।
स्वाविर्भावोल्लासितानन्दसिन्धु-
र्जीयात् स श्रीकृष्णचैतन्यचन्द्रः ॥ १ ॥

सान्द्रानन्दस्यन्दि गोविन्दभाष्यं जीयादेतत् सिन्धुगाम्भीर्यसंभृत्।
यस्मिन् सद्यः संश्रुते मानवानां मोहच्छेदी जायते तत्त्वबोधः ॥२॥

आलस्यादप्रवृत्तिः स्यात् पुंसां यद्ग्रन्थविस्तरे ।
सिद्धान्तरत्ने संक्षिप्ता टिप्पणी क्रियतेऽत्र तत् ॥ ३ ॥

अथ सोऽयं श्रीगोविन्दैकान्ती बलदेवापराख्यो विद्याभूषणो ब्रह्मसूत्रेषु गोविन्दभाष्याभिधानं विवरणं निर्माय तत्परिपोषाय सिद्धान्तरत्नाख्यं तत्पीठं निर्मातुकामः साक्षाद्भग-

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya * Bharatiya Vidya

Digitization by Arya Samaj Charitable Foundation, Chennai

तं श्यामसुन्दरमविक्रियमात्ममूर्तिं
सर्वेश्वरं प्रणतिमात्रवशं भजामः ॥ १ ॥
गजपतिरनुकम्पासम्पदा यस्य सद्यः
समजनि निरवद्यः सान्द्रमानन्दमृच्छन् ।
निवसतु मम तस्मिन् कृष्णचैतन्यरूपे
मतिरतिमधुरिम्णा दीप्यमाने मुरारौ ॥ २ ॥

वतोऽर्चायमानस्य श्यामसुन्दरस्य भक्तिमङ्गलमाचरति—वेदास्त-थेति । तं सर्वेश्वरं वयं भजामः । प्रणत्यादिकया भक्त्यानुकूलया स इत्यर्थः । तं किंगुणकमित्यपेक्षायामाह-यं वेदास्तथा स्मृतयः सृष्ट्यादिकारणमामनन्त्यभ्यस्यन्ति । तथा सादृश्यनिर्देशे इति श्रीधरः । कथमेवं तत्राह—अचिन्त्येति । ननु तथापि महत् कार्यं कुर्वतस्तस्य श्रमादिलक्षणो विकारः स्यात्तत्राह—अवि-क्रियमिति । संकल्पमात्रेण तत् कुर्वतो न कोऽपि तद्गन्ध इति भावः । आत्मा विज्ञानानन्दलक्षणो मूर्तिरस्येति सुवर्णप्रतिमा-वदन्तर्बहिर्भेदशून्यं सान्द्रानन्दविज्ञानमिति परमपुमर्थत्वमु-क्तम् । तथाभूतस्याप्यतसीपुष्पवन्नीलवर्णत्वमाह—श्यामेति । तेन सुध्यानत्वम् । प्रणतिमात्रेति सुखाराध्यत्वं स्निग्धत्वं च । तस्मिन्नीदृशत्वाविभानमविद्यातिमिरविमु(ग्ध)ष्टदृष्टीनामेवेति बोध्यम् ॥ १ ॥

अथ स्वाभीष्टे महाप्रभौ रसिकानन्दे च स्वधीनिवेशं तता-ऽर्थयते-गजेति । अत्र गजपतिरुत्कलाधीशः प्रतापरुद्रः गोपालदा-साख्यातः करीन्द्रश्च । निरवद्यस्त्यक्तराज्याभिमानस्त्यक्तपशु-

Digitization by Arya Samaj Charitable Foundation, Chennai

देवाभ्यर्थनमन्दरेण मथिताद् भक्तीन्दिराऽभूद्यतः
श्रीमद्भागवताख्यनिर्जरतरूः सत्सूत्ररत्नोत्करः।
दीव्यद्गीतिसुधांशुकामृतरुचिर्ज्ञानं च धन्वन्तरिः
स श्रीव्यासमहाम्बुधिर्विजयते प्रीत्यै समन्तात् सताम् ॥३॥

गोविन्दाभिधमिन्दिराश्रितपदं हस्तस्थरत्नादिव-
त्तत्त्वं तत्त्वविदुत्तमौ क्षितितले यौ दर्शयाञ्चक्रतुः।
मायावादमहान्धकारपटलीसत्पुष्पवन्तौ सदा
तौ श्रीरूपसनातनौ विरचिताश्चर्यौ सुवर्यौ स्तुमः ॥४॥

भावश्च। कृष्णचैतन्यरूपे शचीसुतात्मनि मुरारौ कृष्णे। पक्षे परेशतया कृष्णचैतन्यं निरूपयति। मुरारौ तन्नामके स्वपूर्वचतुर्थे। श्लेषोऽत्रालङ्कारः॥ २॥

अथ निखिलकुमतविमर्दकं बादरायणस्य भगवतो विजयमाह–देवेति। विकसितार्थं पद्यम्। ज्ञानं प्रकृतिजीवेश्वराणां मिथो विवेकेन बोधः। साङ्गरूपकमेतत्। रत्नाधिक्याविर्भावेनान्याम्बुधेराधिक्याद् व्यतिरेकः। भक्त्यादेरादान++तत्क्रियाभिसम्बन्धात्तुल्ययोगिता चात्रालङ्कारः॥ ३॥

अथ स्वसिद्धान्तदेशिकौ स्तौति-गोविन्देति। तत्त्वं पुरुषोत्तमलक्षणम्। तत्त्वं वाद्यप्रभेदे स्यात् स्वरूपे परमात्मनि इति विश्वः। अत्र वतिसाधुत्वार्थं तद्वत्प्रत्यक्षीभवदिति देयम्। एवं क्वचिदन्यत्रापि ज्ञेयम्। मायावादरूपा या महान्धकारपटली तस्या विनाशाय सत्पुष्पवन्तौ तापक्षयलाञ्छनदोषाभावात् शोभमानौ सहोदितौ चन्द्रसूर्यौ एकस्योक्त्या पुष्पवन्तौ

Digitization by Arya Samaj Charitable Foundation, Chennai

इह हि सुखदुःखप्राप्तिपरिहारयोर्लोकप्रवृत्तिर्दृश्यते। तौ चोपेयभूतावुपायमन्तरा न संभवेताम्। अतः सारासारविचारज्ञा महर्षयस्तत्रोपायं प्रकीर्त्तयन्ति। तत्र प्रकृतिपुरुषाविवेकादस्य त्रिविधदुःखोत्पादः तद्विवेकात्पुनरनाद्यविवेकनिवृत्तौ पुरुषं प्रति निवृत्ताधिकारा प्रकृतिर्भवतीति तस्य त्रिविधस्य दुःखस्य प्रध्वंसः स्यात्।

दिवाकरनिशाकरावित्यमरः। ईदृशाकारत्वाद्विराचितेत्यादिलक्षणौ ॥ ४ ॥

भगवद्व्यासकृतया मीमांसया परिनिष्पन्नं परमार्थतत्त्वमुपादित्सुस्तदन्यकृता मीमांसाः प्रत्याचिख्यासुरवतारयति-इहेति। लोकानां सुखपरिहारे च प्रवृत्तिरस्ति। किन्तु ते तत्रोपायं न जानन्ति तेषां तत्सिद्धये महर्षयस्तं वदन्तीत्यर्थः। तत्रादौ कपिलमतं दर्शयति—तत्र प्रकृतीति। त्रिविधदुःखेति। आध्यात्मिकमाधिभौतिकमाधिदैविकश्चेति त्रिविधं दुःखम्। शारीरं मानसं चेत्यादिमं द्विभेदम्। वातपित्तादिवैषम्यहेतुकं शारीरम्। कामक्रोधादिहेतुकं मानसम्। एतद्द्वयमान्तरोपायसाध्यत्वादाध्यात्मिकमुक्तम्। मनुष्यपश्वादिहेतुकमाधिभौतिकम्। यक्षराक्षसाद्यावेशहेतुकमाधिदैविकमिति। इदं दुःखत्रयं प्रकृतिमूलकं विवेकात् प्रकृतेर्विनिवृत्तौ विनश्येदेव। यद्यप्यौषधकामिनीदुर्गमन्त्रोपासनैरस्य निवृत्तिस्तथापि दण्डवत्पुनरुत्पद्यते मूलस्यानिवृत्तेः। अतस्तद्विवेकाभ्यास एव तदात्यन्तिकनाशहेतुः। स चेति। भावभूतं घटादिकार्यमनित्यम्। अभावभूतं घटादिध्वंसकार्यन्तु

Digitization by Arya Samaj Charitable Foundation, Chennai

स च कार्योऽपि नित्यः अभावरूपत्वात् । स एवानन्दावाप्तिरित्युपचरितः भारापगमे सुखी संवृत्त इतिवत्, न तु तस्मात् साऽतिरिच्यत इति कपिलः ॥ ५ ॥

प्रकृतिपुरुषविवेकाभ्यासवैराग्यपरिपाकाद्यमनियमासनप्राणायामप्रत्याहारधारणध्यानसंप्रज्ञातसमाधिपूर्वकात् परमेश्वरप्रसादजात् पञ्चचित्तनिरोधादेव धर्ममेघशब्दवाच्यादसंप्रज्ञातसमाधेरस्य तान्विति पतञ्जलिः ॥ ६ ॥

नित्यम्। ध्वंसस्य घटादेः पुनरनावृत्तेरिति भावः। स एव दुःखध्वंस एव। तस्मात् दुःखप्रध्वंसात् सानन्दावाप्तिः । कपिल इति। अग्निवंशजोऽयं निरीश्वरः पञ्चविंशतितत्त्ववादी। यस्तु कार्दमिलः स वासुदेवः षड्विंशतितत्त्ववादीति बोध्यम् ॥ ५ ॥

अथ पतञ्जलिमतमाह—प्रकृतिपुरुषेति । यमेत्यष्टाङ्गको योगो दर्शितः । अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति, शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति च पतञ्जलेः सूत्रम्। आसनप्राणायामौ ख्यातौ। विषयेभ्य इन्द्रियाणां वियोजनं प्रत्याहारः। नाभिचक्रनासाग्रादौ निर्विषयस्य चित्तस्य स्थिरीकरणं धारणा। संप्रज्ञातेति। वृत्तिमति चित्ते यः समाधिः स संप्रज्ञातसंज्ञः। पञ्चविधेति। प्रमाणविपर्ययसंकल्पनिद्रास्मृतयश्चित्तस्य पञ्च वृत्तयः। धर्ममेघेति। परमपुमर्थहेतुं धर्मं मेहति सिञ्चतीति धर्ममेघः "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः" इति पतञ्जलेः सूत्रम्(यो सू४।२९)। प्रसंख्यानं तत्त्वानां मिथो विलक्षणस्वरूपपरिभावनं, तस्मिन् सत्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

देहेन्द्रियादिविलक्षणो विभुरयमात्मा नवविशेषगुणाश्रयस्तस्य द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानेन साक्षात्कारादीश्वरोपासनासहितान्नवानां वैशेषिकगुणानां प्रागभावासहवृत्तिर्ध्वंसो भवेत्, स एवानन्दावाप्तिरिति कणादः ॥ ७ ॥

प्रमाणप्रमेयादिषोडशपदार्थानामुद्देशलक्षणपरीक्षाभिरात्मादिद्वादशविधप्रमेयनिष्कर्षेणात्मसाक्षात्कारात् श्रवणमनननिदिध्यासनपूर्वकात् सवासनमिथ्याज्ञाननिवृत्तौ तत्कार्याणां रागद्वेषमोहानां निवृत्तिस्तत-

---

प्यकुसीदस्य फलमलिप्सोः प्रत्ययान्तराणामनुदयेन सर्वप्रकारविवेकख्यातेः परिपोषाद्धर्ममेघसमाधिर्भवति । अत्र चित्तं वृत्तिहीनमुक्तम् । अस्येति पुरुषस्य ॥ ६ ॥

अथ वैशेषिकमतं दर्शयति—देहेति॥ नवेति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनारूपसंस्कारा नवात्मनो विशेषगुणाः । प्रागिति । येषां प्रागभावस्तेषामुत्पत्तिरिति भावः । एतन्मते मुक्तौ पाषाणकल्प आत्मा ॥ ७ ॥

अथ नैयायिकमतं दर्शयति—प्रमाणेति । आदिना संशयादेर्ग्रहणम् । तथाच गौतमसूत्रम्—"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पावितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" (न्या० सू० १. १. १) इत्येतत् । आत्मादिद्वादशविधेति। तथाच गौतम-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्तत्कार्ययोः प्रवृत्तिपूर्वकयोर्धर्माधर्मयोस्ततः पूर्वार्जितकर्मणां कायव्यूहपूर्वकं भोगेन परिक्षयात् देहान्तरानारम्भस्ततो बाधनालक्षणस्यैकविंशतिविधस्य दुःखस्यात्यन्तिकी निवृत्तिर्भवेत्, सैव सुखावाप्तिरिति गौतमः ॥ ८ ॥

वेदोक्तैः शुभकर्मभिर्दुःखहानिः सुखलाभश्चेति जैमिनिः ॥ ९ ॥

सर्वे ह्येते उपायास्तयोरात्यन्तिकयोः सिद्धये नाङ्गीकार्याः परमाचार्येण भगवता श्रीबादरायणेन तत्तन्मतानां निराकृतत्वात् ॥ १० ॥

सूत्रम्—"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" (न्या० सू० १. १.९) इत्येतत् । एकविंशतीति । शरीरं षडिन्द्रियाणि षड् विषयाः षड् बुद्धयः सुखं दुःखञ्चेति दुःखमेकविंशतिप्रकारम् । अस्यापि मोक्षे पाषाणतुल्य आत्मा ॥ ८ ॥

अथ जैमिनिमतं दर्शयति—वेदोक्तैरिति । ईश्वरार्चनरूपैर्वैदिकैः कर्मभिः पुण्यादृष्टैः दुःखहानिर्दुरदृष्टक्षतिः सुखस्य स्वर्गस्य मोक्षस्य च प्राप्तिरित्यर्थः । अस्यां पञ्चमत्यां विशेषास्तु तत्तद्ग्रन्थेषु बोध्या ग्रन्थगौरवभयान्न लिखिताः ॥ ९ ॥

एताः पञ्चमतीः त्यक्तुमाह—सर्वे हीति । हिर्निश्चये । तयोः सुखदुःखप्राप्तिपरिहारयोः आत्यन्तिकयोरिति । प्राप्तस्य सुखस्यानिवृत्तिरात्यन्तिकी प्राप्तिः । निवृत्तस्य दुःखस्य पुनरनुत्पत्तिरात्यन्तिकः परिहारः ॥ १० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

किन्तु सर्वेश्वराभिख्यस्य पुरुषोत्तमस्य स्वरूपतो गुणतश्च परिज्ञानं स्वज्ञानपूर्वकं तस्यै कल्पते।

तथा हि—

"ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैः जन्ममृत्युप्रहाणिः।
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवलमाप्तकामः" ॥

"यदा तत्त्वेन तु ब्रह्मतत्त्वं
दीपोपमेनेह युक्तः प्रपश्येत्।

बादरायणमतं दर्शयति—किन्त्विति ॥ किन्तु कामवितर्कयोरिति श्रीधरः। वक्ष्यमाणार्थो वाञ्छित इत्यर्थः। तस्यैतयोरात्यान्तिकयोः सिद्धये। सर्वेश्वरस्य ज्ञानं मोचकमित्युदाहरति-ज्ञात्वेति। तदेवं सर्वाराध्यं सर्वेश्वरं हरिं वेदाज्ज्ञात्वा स्थितस्य मुमुक्षोः सर्वेषां देहदैहिकममतापाशानां हानिश्छेदो भवति। तत्पाशहेतुकैः क्लेशैः क्षीणैः विशिष्टस्य तस्याऽऽप्रारब्धभोगपूर्त्तेः पुनः पुनर्जायमानस्य जन्ममृत्युप्रहाणिर्भवति। विडालीदन्तस्पर्शेन तदर्भकस्येव जन्मादिभ्यां तस्य क्लेशो न भवतीत्यर्थः। अथोत्तरत्र तस्य देवस्याभिध्यानाल्लिङ्गदेहस्य भेदे प्रध्वंसे सति चान्द्रब्राह्मापेक्षया तृतीयं भागवतं पदं स देवज्ञो विन्दतीति शेषः। तृतीयं तत् कीदृक् विश्वैश्वर्यमनन्तनित्यदिव्यविभूतिकं केवलं प्रकृतिगन्धेनाप्यस्पृष्टम्। ततः स देवज्ञ आप्तकामो भवति। सर्वेश्वरज्ञानं जीवज्ञानपूर्वकं मोचकमित्युदाहरति-

Digitization by Arya Samaj Charitable Foundation, Chennai

अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं
ज्ञात्वा देवं मुच्यते सर्वपाशैः॥" इत्यादिश्रवणात्॥११॥

ननु किन्तस्य पुरुषोत्तमस्य स्वरूपं के तस्य गुणाः कीदृशाश्च ते यद्विभानाद्विमुक्तिरिति चेत्। उच्यते—विज्ञानानन्दस्तस्य स्वरूपं "विज्ञानमानन्दं ब्रह्म

यदेति। दीपोपमेनात्मतत्त्वेन स्वज्ञानेन युक्तो मुमुक्षुर्यदा ब्रह्मतत्त्वं प्रपश्येद्विचिन्तयेत्तदा 'देवं ज्ञात्वा सर्वपाशैर्मुच्यते' इत्यनुषङ्गः। देवं कीदृशं। अजं जन्मादिविकारशून्यं। ध्रुवमचलपूर्णं। सर्वतत्त्वैः प्रधानाद्यैर्विशुद्धं तैरस्पृष्टम् ॥११॥

सर्वेश्वरतत्त्वं पृच्छति—ननु किमिति। 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। उत्तरयति उच्यत इत्यादिना। रातिरिति। दातुर्यजमानस्य रातिः फलार्पकमित्यर्थः। यदात्मक इति नैरुक्तश्रुतिः। स्वयं विमृशति। भगवान् यदात्मकस्तस्य व्यक्तिर्मूर्तिस्तदात्मिका यो भगवान् सा मूर्तिरिति। नास्त्यत्र स्वगतभेदोऽपि 'नेह नानास्ति किञ्चन' 'स्वगतभेदविवर्जितात्मा' इत्यादिवाक्येभ्यः। विशेषबलात्तु भेदव्यवहारेण भाव्यमिति भावः। अत्र श्रुतिः पृच्छति—किमात्मक इति। स्वयमुत्तरयति ज्ञानात्मक इत्यादिना। ज्ञानात्मकश्चिदेकधातुः। किं निर्विशेषा चित्तत्राह—ऐश्वर्येति। स्वानुबन्धिषडैश्वर्य इत्यर्थः। सुभगे ऐश्वर्यशब्दप्रयोगात्। ऐश्वर्याणि चैतानि तत्र कुतस्तत्राह—शक्त्यात्मकश्चेति। शक्तिरत्र पराख्या, तस्या एव वह्न्युष्णत्ववत् स्वानुबन्धित्वात्। तथा च ज्ञानैश्वर्यपरात्मको भगवानेव मूर्ति-

Digitization by Arya Samaj Charitable Foundation, Chennai

रातिर्दातुः परायणम्", "आनन्दो ब्रह्मेति व्यजानात्", "रसो वै सः" इत्यादिश्रवणात्। तदेव विग्रहरूपमिति मन्तव्यम्। न तु स्वरूपाद्विग्रहस्यातिरेकः। यदात्मको भगवांस्तदात्मिका व्यक्तिः। किमात्मको भग-

---

रिति। इतिशब्दो हेतौ वस्तुन एवैवंविधत्वात्। सर्वज्ञा वयं श्रुतयो भगवन्तमेवाविचिन्त्यस्वानुबन्धिशक्त्या बुद्ध्यादिमन्तं लक्षयामहे पश्याम इत्यर्थः। अभिनयेनाह–बुद्धिमानित्यादि। अगूढार्थमन्यत्। हरिवंशेऽपि कृष्णं प्रत्येवमुक्तं दुर्वाससा। 'वेदे यत्प्रथितं तेजस्तव चेदं विभाव्यते। येन विज्ञानतृप्तास्तु योगिनो वीतकल्मषाः॥ पश्यन्ति हृत्सरोजे हि तदेवेदं वपुः प्रभो॥ वेदे यत् कीर्त्यते तेजो ब्रह्मेति प्रविभज्य वै। तदेवेदं विज्ञानेऽहरूपमीश्वर' इति।

एवमात्मत्वादेव भगवद्विग्रहस्य नित्यत्वमसन्देहमापद्यते तत्र दुर्धियां शङ्कां निराकर्तुमाह तदेवमिति।वैष्णवादीति।पञ्चमेंशे पठ्यते-'चंक्रम्यमाणौ तौ रामं वृक्षमूलकृतासनम्। ददृशाते मुखाच्चास्य निष्क्रामन्तं महोरगं॥ निष्क्रम्य स मुखात्तस्य महानागो भुजङ्गमः। प्रययावर्णवं सिद्धैः स्तूयमानो महोरगैः॥ गते तस्मिन् स भगवान् संयोज्यात्मानमात्मनि। तत्याज मानुषं देहमतीत्य त्रिविधां गतिम्॥ अर्जुनोऽपि तदान्विष्य कृष्णं रामकलेवरे। संस्कारं लम्भयामास तथान्येषामनुक्रमात्॥ अष्टौ महिष्यः कथिताः रुक्मिणीप्रमुखास्तु याः। उपगूह्य हरेर्देहं विविशुस्ता हुताशनम्॥ रेवती चैव रामस्य देहमाश्लिष्य सत्तम। विवेश ज्वलितं वह्निं तत्सङ्गादतिशीतलम्॥' एवमेव मौशले पर्वणि-

Digitization by Arya Samaj Charitable Foundation, Chennai

वान्? ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकश्चेति । बुद्धिमनोऽङ्गप्रत्यङ्गवतो भगवतो लक्षयामहे "बुद्धिमान् मनोवानङ्गप्रत्यङ्गवानिति" इति "तमेकं गोविन्दं सच्चिदानन्दविग्रहम्" इति "अर्द्धमात्रात्मको रामो ब्रह्मानन्दैकविग्र-

---

'ततः शरीरं रामस्य वासुदेवस्य चोभयोः । अन्विष्य दाहयामास पुरुषैराप्तकारिभिः' इति ॥ अर्जुन इति प्रकरणाद् बोध्यम् । श्रीभागवते चैवम्—'ययाऽहरद् भुवो भारं तां तनुं विजहावजः । कण्टकं कण्टकेनेव द्वयं चापीशितुः समम् ॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः । भूभारः क्षपितो येन जहौ तच्च कलेवरम्' इति प्रथमे । 'हरिरपि तत्याज आकृतिं त्र्यधीशः' इति तृतीये च । पञ्चमांशवन्मौशलवच्चैकादशेऽप्यन्तिमं चरितमभिहितम् । एवं षोडशराजकीये 'रामं दाशरथिं चैव मृतं शुश्रुम सृञ्जय' इति दाशरथेरपि नारदेन तदुक्तम् । एषु वाक्येषु भगवद्विग्रहस्य विनाशोक्तेरनित्यत्वं प्रस्फुटमिति दुर्धियो वदन्ते । तन्निराकरोति—तत्त्विति । लोकवैराग्याय माययैव तथा भगवता प्रत्यायितं आसुरप्रकृतिभिस्तु तद्यथावदेव गृहीतम् । ऐन्द्रजालिकः खलु स्वरूपेण स्थित एव स्वशिरश्छेदादिकं प्रत्याययन् दृष्टः किमुत महामायी परेशः स इति । कुतस्तत्प्रत्ययनं मायिकमित्यत्र हेतुमाह—राजन्निती-ति । युक्तं हरेर्निर्याणं श्रुत्वा तदेकान्ती परीक्षिदतिखिन्नो मा भूदिति तस्य मायिकत्वं तावदाह—हे राजन् तनुभृतो मनुष्यस्येच्छया जननाप्ययेहा उत्पत्तिमरणरूपा चेष्टा परस्य मया वर्णिता तन्नटस्यैन्द्रजालिकस्येव माया विडम्बनमित्यवेहि इति । न तच्छ्रुत्वा त्वया खिन्नेन भाव्यमिति भावः । इतः प्राक् च मौशलचरित-

Digitization by Arya Samaj Charitable Foundation, Chennai

हः''इति चैवमादिश्रवणात्,"वेदान्ते प्रथितं तेजः"इत्यादिस्मृतेश्च। इत्थञ्च' सत्त्वमेव जडं भगवद्वपुः'इति 'ज्ञानमेवाचेतनं तत्'इति च प्रत्युक्तम्।तदेवं भगवद्विग्रहस्यैव

मेतन्मायिकमेवेत्युक्तं दारुकं प्रति भगवता-'त्वन्तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः। मन्मायारचितामेतां विज्ञायोपशमं व्रजे'इति । आदिना स्वतन्त्रवाक्यश्च । 'असङ्गश्चाव्ययोऽभेद्योऽनिग्राह्योऽशोष्य एव च । विद्धोऽसृगाचितो बद्ध इति विष्णुः प्रदृश्यते ॥ असुरान् मोहयन् देवः क्रीडत्येष सुरेष्वपि । मानुषान् मध्यया दृष्ट्या न मुक्तेषु कथञ्चन'इति । 'अविज्ञाय परं देहमानन्दात्मानमव्ययम्। आरोपयन्ति जनिमत् पञ्चतत्त्वात्मकं जडम्'इति चानारायणीयवाक्यं-'एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते । इच्छन्मुहूर्तान्नश्येयमीशोऽहं जगतो गुरुः ॥ माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि' इति । नश्येयमदृश्यः स्यामित्यर्थः । वाराहवाक्यच—'न तस्य प्राकृता मूर्ति (र्मे) दोमज्जास्थिसंभवा । न योगित्वादीश्वरत्वात् सत्यरूपोऽच्युतो विभुः' इति । महायोगित्वादिच्छाकृतं तस्य रूपं न किन्त्वीश्वरत्वान्नित्यमेव तदित्यर्थः । निर्य्याणचरितं मायिकमेवेति स्फुटयितुं तत्र तत्राप्यन्त एवमुक्तम् ।
तत्र वैष्णवे-'नातिक्रान्तमलं ब्रह्मंस्तदद्यापि महोदधिः ।
नित्यं सन्निहितस्तत्र भगवान् केशवो यतः' इति ।
एकादशे च—
'द्वारिकां हरिणा त्यक्तां समुद्रोऽप्लावयत् क्षणात् । वर्जयि-

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्मत्वात्तस्य वैष्णवादिवाक्याद्यदन्यथा प्रत्ययनं तत्त्वासुरान् प्रति माययैव—

"राजन् परस्य तनुभृज्जननाप्ययेहा
मायाविडम्बनमवेहि यथा नटस्य"
इत्यादिकादेकादशादिवाक्यादेव ॥१२॥

ज्ञानानन्दविग्रहता तु तस्य श्रुतिमात्रेण गम्या न तु तर्कैः,अचिन्त्यालौकिकवस्तुत्वात् । तदिदमभिहितं

त्वा महाराज श्रीमद्भगवदालयम् ॥ नित्यं सन्निहितस्तत्र भगवान् मधुसूदनः' इति । राजन्नित्यतः प्राक्स्वतनुमदग्ध्वा तथैव स्वधाम विशतः । कृष्णस्य सौदामन्या इव गतिर्देवैर्नालक्षीति । तदनन्तरं गुरुपुत्रानयनादेः कथनेन स्वतनुरक्षणे कैमुत्यदर्शनञ्च उद्धवस्त्वेवं स्फुटमाख्यत । 'आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम्'इति तृतीये । श्रीरघुपतेस्तु निर्याणे द्विभुजस्यैव तस्य चतुर्भुजत्वमभूदित्युक्तमुत्तरकाण्डे—'यामिच्छसि महावीर्य तां तनुं प्रविश स्वकाम् । पितामहवचः श्रुत्वा विनिश्चित्य मतिं ततः । विवेश वैष्णवं तेजः सशरीरः सहानुजः' इति॥षोडशराजकीयन्तु पुत्रशोकनिवृत्तिफलकप्रपञ्चानित्यत्वनिवेदनफलकमेव तदन्तःपठितं दाशरथेस्तत्त्वसंभवादेवान्तर्धानपरं प्रपञ्चत्यागपरं चाभावीति न किञ्चिदवद्यम् ॥ १२ ॥

ननु ज्ञानानन्दयोर्विग्रहत्वं युक्तिविरुद्धमिति चेदोमित्याह-ज्ञानेति । न तु तर्कैरिति । तर्कधर्मकैरनुमानैरित्यर्थः । तदिदमिति ज्ञानानन्दविग्रहत्वं । अरूपेति । रूपं विग्रहस्तद्विशिष्टं ब्रह्म

Digitization by Arya Samaj Charitable Foundation, Chennai

भगवता सूत्रकारेण—"अरूपवदेव हि तत्प्रधानत्वात्" (ब्र.सू.३-२-१४) "प्रकाशवच्चावैयर्थ्यम्" (ब्र.सू.३-२-१५) "आह च तन्मात्रम्" (ब्र.सू.३-२-१६), "दर्शयति चाथो अपि स्मर्यते" (ब्र.सू.३-२-१७) इत्यस्मिन्नधिकरणे तथैव भाषितञ्च ॥ १३ ॥

परमात्मजिज्ञासोस्तु तर्कोऽनुपादेय एव "नैषा तर्के-

नेत्यरूपवदित्युच्यते। कुतः। तस्यैव रूपस्य प्रधानत्वादात्मत्वाद् द्विभुजत्वज्ञानित्वादिधर्मधर्मित्वादित्यर्थः। तस्माद्रूपाद् भिन्नं ब्रह्मेति। ननु ध्यातेन विज्ञानानन्देन ब्रह्मणा जडदुःखरूपत्वात्तद्विरुद्धा प्रकृतिनिर्वारितैव ज्योतिषेव तिमिरं, तत्र विग्रहत्वं व्यर्थमिति चेत्तत्राह—प्रकाशेति। प्रकाशैकरसे सूर्ये यथा ध्यानहेतुत्वाद्विग्रहत्वमव्यर्थं तथा ज्ञानानन्दे ब्रह्मणीति। एवंभावे प्रमाणं दर्शयति—आहेति। तमेवं तन्मात्रम्। 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः। तं विग्रहमेव यस्मात्परमात्मानमाह श्रुतिः—'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्। द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरम्' इत्याद्या। इह पुण्डरीकाक्षत्वादिधर्मो विग्रह एवेश्वर इति प्रस्फुटम्। दर्शयतीति। सा 'प्रकृतिपरोऽयमात्मा गोपालः' इति श्रुतिः 'सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः' इति स्मृतिश्च परमात्मानं विग्रहं वदन्ति। तस्माद्विग्रहत्वं प्रामाणिकं सूत्राभ्यां व्यतिहारो लब्धः ॥ १३ ॥

नैषेति। काठके हि प्रेष्टे नाचिकेता। एषा ब्रह्मोपासनयोग्या मतिस्त्वया तर्केण नापनीया न घटनीया। अन्येन वैदिकेन

Digitization by Arya Samaj Charitable Foundation, Chennai

ण मतिरापनीया प्रोक्ताऽन्येन सुज्ञानाय प्रेष्ठ "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्"(म.भा.) इत्यादिश्रुतिस्मृतिभ्यः । ननु मन्तव्य इति तर्काभ्युपगमः । सत्यम् । वेदान्तार्थानुगुणोऽसौ न निवार्यते । "पूर्वोत्तराविरोधेन कोऽत्रार्थेऽभिमतो भवेत्" इत्याद्यमूहनं तर्कः । शुष्कतर्कन्तु वर्जयेदित्यादिस्मृतेः । तदेवं विज्ञानानन्दविग्रहानतिरेकि तस्य स्वरूपमिति सिद्धम् ॥१४॥

गुणाश्च सत्यकामत्वसत्यसंकल्पत्वादयो ज्ञानानन्दादयश्चानन्ताः,तेऽपि स्वरूपान्नातिरिच्यन्ते "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इति "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः" इति "आनन्दं ब्रह्मणो विद्वान्"इति चैवमादिश्रवणात् । "यथोदकं दुर्गे वृष्टं पर्वतेषु

गुरुणा प्रोक्तोपदिष्टा सती सुज्ञानाय ब्रह्मानुभवाय भविष्यति । अचिन्त्या इति भारते । नन्विति । असौ तर्कः । पूर्वोत्तरेति कौर्मे ॥ १४ ॥

गुणान् प्रमाणयत्येष इति छान्दोग्ये । विजिघत्सो बुभुक्षारहितः । गुणानां स्वरूपानतिरेकं प्रमाणयति यथेति काठके । पर्वतेषु वृष्टमुदकं यथा दुर्गे निम्नस्थाने विधावत्येवं ब्रह्मणो धर्मास्ततः पृथक् पश्यन् जनस्तान् प्रसिद्धान्नरकानित्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

विधावति। एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति॥ ब्रह्मणस्तद्गुणानां च भेददर्श्यधमं तमः। भेदाभेदप्रदर्शी तु मध्यमं तु तमो व्रजेत्" (कठ.उ. २-४-१४) इत्यादिषु गुणातिरेकदर्शिनो विगर्हितत्वश्रवणात्। अतएव "नेह नानास्ति किञ्चन" इति तदन्यत् प्रतिषिद्धम्॥ १५॥

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" (वि० पु०) इत्यत्र धर्माणामपि धर्मिशब्दवाच्यता स्मृता। "अनन्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद् भृतभूतसर्गः। गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य" (भाग. १०-१४-७) इत्यादिषु च धर्मिणो धर्मानतिरेकः स्मर्यते। एवमभेदेऽपि भेदव्यपदेशो जलकल्लोलवद्द्रष्टव्यः। तदिदमभिहितं भगवता सूत्रकारेण-"उभयव्यपदेशात्त्वहिकुण्डलवत्" (ब्र. सू. ३-२-२८) इत्यस्मिन्नधिकरणे॥ १६॥

ब्रह्मणस्तदिति। अत एवेति। तदन्यत् स्वरूपाद्भिन्नं विग्रहणादि प्रतिषिद्धं श्रुत्यैव निवारितम्॥ १५॥

गुणगुणिनोर्व्यतिहारमभेदमाह—ज्ञानशक्तीति। षष्ठे व्याख्यास्यते। गुणात्मनस्तेऽपीति श्रीदशमे ब्रह्मवाक्यम्। तदिदं गुणगुणिनोर++तं। उभयेति।'विज्ञानमानन्दं ब्रह्म' 'यः सर्वज्ञः सर्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु सच्चिदानन्दविग्रहानतिरेकि भगवतः स्वरूपं ज्ञानानन्दादयो गुणाश्च तस्मान्नातिरिच्यन्ते इति स्वरूपतो गुणतश्च निर्भिन्नं तत्त्वमिति नोपयुक्तम्। सच्चिदानन्दशब्दानां प्रवृत्तिनिमित्तभेदेन तद्वाच्यानां सच्चिदानन्दानां भेदस्यावश्यकत्वादिति चेत्। मन्दमेतत्। अचिन्त्येऽलौकिकेऽर्थे युक्तेरनवतारात्। परमं तत्त्वं खलु तर्कगोचरं न भवति "नैषा तर्केण" इत्यादिश्रुतिभ्यः, किन्तु श्रुत्येकगम्यमेव तत्, यथाह भगवान् सूत्रकारः "श्रुतेस्तु शब्दमूलत्वात्" (ब्र. सू० २-१-२७) इति ॥ १७ ॥

वित्' 'आनन्दं ब्रह्मणो विद्वान्' इति द्विविधश्रुतिवचनाद्विज्ञानानन्दरूपं ब्रह्म विज्ञानानन्दीति मन्तव्यम्। यथा कुण्डलात्मनो हेम्नः कुण्डलं विशेषणं तद्वत् ॥१६॥

इह शाब्दिकास्तार्किकाश्च शङ्कन्ते—नन्विति। निर्भिन्नमिसभिन्नमित्यर्थः। 'निर्निश्चयनिषेधयोः' इत्यमरः। सच्चिदानन्दशब्दानामिति। यथा गोघटादिशब्दानां प्रवृत्तिनिमित्तभेदात्तद्वाच्यानां भेदस्तद्वत् ।इति चेदिति।'पक्षान्तरे चेद्यदि च' इत्यमरः। निरस्यति—मन्दमिति। परमं सश्रीकं तत्त्वं परब्रह्म। अत्रार्थे व्याससम्मतिमाह—यथाहेति। श्रुतेस्त्विति। नेत्यनुवर्तते। देहदेहिभावेन गुणगुणिभावेन भातमपि ब्रह्म स्वगतभेदेनापि नोपेतम्। कुतः? 'नेह नानास्ति किञ्चन' इति तथैव श्रुतेः। ननु बाधितं श्रुतिः कथं ब्रूयात्तत्राह—शब्देति। अचिन्त्यार्थस्य शब्दैकप्रमाणत्वादित्यर्थः! दृष्टं चेदं मन्त्रौषधादिषु ॥ १७ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वगतभेदोऽपि तत्र नेत्यभिप्रेत्याह श्रुतिः "नेह नानास्ति किञ्चन" इति । स्मृतिश्च—"निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः । आनन्दमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मा" (ना-पञ्चरात्र) इति । तथापि वैदूर्यवदविचिन्त्येन विशेषमहिम्ना तैः शब्दैर्व्यवहारो विदुषामपि निर्बाधः । न चैवं भेदाभेदौ स्यातां निषेधकवाक्यव्याकोपात् । तस्मादविचिन्त्यतैव शरणमिति स-

---

उक्तं स्वगतभेदाभावं स्फुटयति । इह परमात्मनि यत्किञ्चन विग्रहादिकमस्ति तन्नाना तत्तो भिन्नं नास्ति, किन्तु तत्स्वरूपानुबन्ध्यस्तीत्यर्थः । 'नानानेकोभयार्थयोः' इत्यमरश्रीधरौ । निर्विशेषत्वे विवक्षिते नेह किञ्चनास्तीति ब्रूयात् । निर्दोषेति । नारदपञ्चरात्रे दृष्टम् । मौग्ध्यादिदोषशून्यः सार्वज्ञ्यादिगुणपूर्णो विग्रहो यस्य (स) परमात्मा । किं मायिनामिव विशुद्धसत्त्वरूपस्तस्य विग्रहस्तत्राह—निश्चेतनेति । चिद्विग्रहश्चिद्गुणकत्वेन विशेषाद्विभात इत्यर्थः । किं सांख्यानामिव चिदेकधातुस्तत्राह—आनन्देति । चिदानन्दविग्रह इत्यर्थः । किं त्रिदण्डिनामिव देहिदेहिभेदवान् तत्राह—सर्वत्रेति । देहदेहिभावे गुणगुणिभावेऽपि सति स्वगतभेदेनापि शून्य इत्यर्थः । आम्रो निम्बो नेति सजातीयः आम्रोऽम्लो नेति विजातीय आम्रमुकुलमाम्रो नेति स्वगतश्च भेदः । तथापीति । वैदूर्यान्नीलपीतादयो गुणा अभिन्ना एव यथा मिथो भिन्ना व्यवह्रियन्ते

Digitization by Arya Samaj Charitable Foundation, Chennai

न्तोऽष्टव्यम् ॥ १८ ॥

विशेषस्त्ववश्यं स्वीकार्यः । स च भेदप्रतिनिधिर्भेदाभावेऽपि भेदकार्यस्य धर्मधर्मिभावव्यवहारस्य सत्यादिशब्दापर्यायतायाश्च निर्वर्तकः, इतरथा सत्ता सती भेदो भिन्नः कालः सर्वदाऽस्ति देशः सर्वत्रेत्यबाधितव्यवहारानुपपत्तिः । परेषामप्यावश्यकस्तत्स्वीकारः । इतरथा "विज्ञानमानन्दं ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ. २-१) इत्यादिषु स्वरू-

---

तथा सद्रूपाद् ब्रह्मणो विज्ञानानन्दौ सार्वज्ञ्यादयो गुणाश्चाभिन्ना एव भेदेन व्यवह्रियन्ते विशेषादित्यर्थः । निषेधकेति । 'एवं धर्मान् पृथक् पश्यन्'इति श्रुत्यर्थबाधापत्तेरित्यर्थः ॥ १८ ॥

निर्भेदेऽपि वस्तुनि विशेषबलेन गुणगुणिभावमापाद्य तं विशेषमन्यान् ग्राहयितुमाह—विशेषस्त्विति । अनिच्छद्भिरपि सर्वैरित्यर्थः । सत्यादिशब्देति । निर्भेदेऽपि ब्रह्मणि विशेषात् सत्यत्वादिगुणभाने भिन्नवाच्यवाचित्वात् सत्यादिशब्दानामपर्यायतास्माकं सिध्येत् । एकवाच्यवाचित्वं खलु पर्यायत्वं । ये त्वतद्व्यावृत्त्या सत्यादिशब्दैर्निर्गुणमेकं वस्तु प्राहुः केवलाद्वैतिनस्तन्मते तु तेषां पर्यायता दुर्वारा एकवाच्यवाचित्वादिति षष्ठे विस्फुटिष्यति । इतरथेति । निर्भेदे वस्तुनि गुणगुणिव्यवहारहेतोर्विशेषस्यानङ्गीकारे सतीत्यर्थः । सत्ताऽस्तीत्यत्र सत्तायाः सत्ताश्रयत्वं विशेषादेव भासते घटः पटो न भवतीत्यत्र घटभेदः पटे प्रतीतस्तस्य पटात्मकस्यापि घटभेदवान् पट इति

Digitization by Arya Samaj Charitable Foundation, Chennai

पमात्रबोधकानां विज्ञानादिशब्दानां पर्यायतापत्तिः । भ्रमाधिष्ठानत्वादिना चैतन्यस्य सर्वदा भानेऽपि तदभिन्नानन्दादेरिवेदानीमप्रकाशानुपपत्तिश्च । स्वभावस्तु विशेषात्मा ॥ १९ ॥

न च विज्ञानत्वादिधर्मविशिष्टाभिधायिभिर्विज्ञा-

पटाभेदेन प्रतीतिर्विशेषादेव । कालः सर्वदाऽस्तीति कालस्य कालाधारत्वं देशः सर्वत्रेति देशाधारत्वं च तस्माद्देवेत्यर्थः । परेषामिति । केवलाद्वैतिनाम् । इतरथेति । वैशिष्ट्यापत्तिभयाद् गुणावभासकं विशेषमस्वीकृत्य शब्दशक्तेरविचिन्त्यत्वाद्विनैव प्रवृत्तिनिमित्तानि विज्ञानादिशब्दैर्विज्ञानादिस्वरूपे ब्रह्मणि निगदिते सतीत्यर्थः। दोषान्तरमाह—भ्रमेति। रजतभ्रमे यथा तदधिष्ठानस्य शुक्तेरस्ति साक्षात्कारस्तथा प्रपञ्चभ्रमे तदधिष्ठानस्य चैतन्यस्य सोऽस्ति चैतन्यवत्तदभिन्नस्यानन्दादेरिदानीं व्यवहारदशायां यदप्रकाशस्तत्र चैतन्यनिष्ठो विशेष एव हेतुः तदस्वीकारे चैतन्यमिवानन्दोऽपि प्रकाशेतेत्यर्थः । ननु सत्तादीनां सत्ताद्यन्तराभावेऽपि वस्तुस्वभावादेव सतीत्यादिव्यवहारः स्यादिति चेत्तत्राह—स्वभावस्त्विति । स स्वभाव एवास्माभिर्विशेषशब्देनोच्यते इत्यर्थः । तस्मादलं नाममात्रविरोधेनेति ॥ १९ ॥

सर्वशब्दावाच्ये लक्षणाया असंभवात्तत्त्वमस्यादिवाक्ये तादिनैवाचिन्त्यशक्त्या निर्विशेषं चैतन्यं बोध्यमिति नव्यमतं पर्यायतापत्त्या दूषयित्वा विशेषो ग्राहितः। अथ लक्षणवादिनं प्राञ्चं दूषयन् विधान्तरेण तं ग्राहयति न चेत्यादिना । विज्ञानादिशब्दानां मिथोभिन्नविज्ञानत्वादिधर्मवाचित्वान्न पर्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

नादिशब्दैर्विशिष्टमभिधेयं, शुद्धमखण्डं तु लक्ष्यमिति वाच्यम् । सर्वशब्दानभिधेयस्य तस्य लक्ष्यत्वायोगात् । तथापि तत्त्वमसीत्यत्र शोधितात् पदार्थाद् वाक्यार्थस्यैक्यस्य भेदो भेदाभेदो वा तव नोभिमतः । तथा सत्यैक्यस्य मिथ्यात्वाद्यापत्तेः तत्र चेद्विशेषा न स्यात्तर्हि कथं स्वप्रकाशचित्प्रकाशेऽप्यैक्यस्याप्रकाशः । चित्प्रकाशस्य भेदभ्रमविरोधित्वेऽपि तदभिन्नैक-

---

यता । धर्मान् विहाय स्वरूपमात्रे लक्ष्ये का नः क्षतिरित्येवं न वाच्यमित्यर्थः । तत्र हेतुः—सर्वशब्देति । त्वन्मते सर्वशब्दावाच्यं ब्रह्म 'यतो वाचो निवर्त्तन्ते' इत्यादिवचनात् । तत्र कथं लक्षणा । सोऽयं देवदत्त इत्यादौ वाच्यमेव पिण्डमात्रं लक्ष्यं दृष्टमिति भावः । दूषणान्तरमर्पयितुमाह—तथापीति । सर्वशब्दावाच्ये ब्रह्मणि लक्षणायामनिरुद्धायामपीत्यर्थः । शोधिताद्विहीनसर्वज्ञत्वाल्पज्ञत्वादिगुणकादित्यर्थः । तथा सतीति । शोधिताव पदार्थाद्वाक्यार्थस्यैक्यस्य भेदे भेदाभेदे वाऽभिमते सतीत्यर्थः । मिथ्यात्वाद्यापत्तेरिति । ब्रह्माभिन्नं सर्वं तत्राध्यस्तत्वान्मिथ्येति त्वत्सिद्धान्तादित्यर्थः । तत्र चेदिति ॥ तत्रैकस्मिन् शुद्धे ब्रह्मणि चित्प्रकाशे भेदभ्रमो न निवर्ततेऽतः स न तद्विरोधी । ऐक्यप्रकाशे जाते भेदभ्रमो विनिवर्ततेऽतः स तद्विरोधीति निर्भेदेऽपि तत्त्वे भेदकार्यं बदतस्ते विशेषो गळे निपतित इति भावः । तस्मादिति । नाप्यनुमेय एव विशेषः । 'अव्यक्तबुद्ध्यहङ्कारमनोभूतेन्द्रियाणि च । तन्मात्राणि विशे-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशस्य तद्विरोधश्चेति तस्मादवश्याभ्युपेयो विशेषः ॥ २० ॥

स च वस्त्वभिन्नः स्वनिर्वाहकश्चेति नानवस्था । तस्य तथात्वञ्च धर्मिग्राहकप्रमाणसिद्धम् ॥ २१ ॥

ननु जीवत्वेश्वरत्वादिव्यवहारोऽपि विशेषादेवा-

षाश्च तस्मै तत्त्वात्मने नमः' इति भारते भीष्मस्तवराजवचनेनापि सिद्धेः ॥ २० ॥

ननु विज्ञानानन्दे स्वरूपे विज्ञातृत्वादिगुणभानं विशेषादित्युक्तम् । अथ तस्मिन् विशेषभानं कस्मादित्यत्र विशेषान्तरादिति चेदनवस्थेति केवलाद्वैतिभिराक्षिप्तो ब्रवीति—स चेति । विशेषस्य तथात्वं वस्त्वाभिन्नत्वं स्वनिर्वाहकत्वं च केन प्रमाणेनावगतमिति चेत्तत्राह—धर्मिग्राहकेति । येनैवंधर्मानित्यादिश्रुत्याऽर्थापत्त्या वा प्रमाणेन निर्भेदेऽपि वस्तुनि गुणगुणिभावोज्जृम्भको विशेषो धर्मो गृह्यते तेनैव तस्य वस्त्वाभिन्नत्वं च इतरथानवस्थापत्तेः । तथैव स्वनिर्वाहकत्वं च स्वस्य तद्भावोज्जृम्भकमचिन्त्यत्वं च तेनैव गृह्यते । अचिन्त्यत्वं विना निर्भेदे वस्तुन्युभयोज्जृम्भणासंभवादित्यर्थः । यथा न्यायनये पृथिव्यर्णवादिरूपं जगदीश्वरकर्तृकं जीवाशक्यरचनत्वे सति कार्यत्वादित्यनुमानेन जगतः कर्तृतया सिध्यन् धर्मीश्वरस्तेनैव स्वकर्तृत्वनिर्वाहकान् ज्ञानेच्छाप्रयत्नानादायैव सिध्यति तद्वतामेव लोके कर्तृत्ववीक्षणादिति धर्मिग्राहकेणानुमानेन तज्ज्ञानादि गृहीतं तद्वव जगतः कार्यत्वं तु सावयवत्वात् सर्वसंमतम् ॥ २१ ॥

विशेषाङ्गीकारात्परिहृष्टाः स्वाभेदश्रद्धाजाड्यभाजः केचिद-

Digitization by Arya Samaj Charitable Foundation, Chennai

रतु। मैवम्। यत्र भेदाभावो भेदकार्यं च प्रमिते तत्रैव भेदप्रतिनिधिविशेषः कल्प्यते न तु प्रमितभेदेषु प्रकृतिजीवेशेषु। न हि सोमवल्लीलाभे पूतिकस्तत्प्रतिनिधिः कल्पनीयः, तस्मान्निर्भेदेऽपि तत्त्वे भेदव्यवहारो विशेषबलादिति सिद्धम् ॥ २२ ॥

अत्राहुः—विग्रहो गुणाश्च स्वरूपादतिरिच्यन्ते इतरथा "यदात्मको भगवांस्तदात्मिका व्यक्तिः" "आनन्दं ब्रह्मणो विद्वान्" (तै. उप. २-६-१) इ-

---

पूर्ववैष्णवाः प्राहुः-नन्विति। तान् प्रत्याख्याति—मैवमिति। प्रमितभेदेष्विति। "ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोगार्थयुक्ता" (श्वे० उप १–९) "भोक्ता भोग्यं प्रेरितारं च मत्वा (श्वे. उ. १–१२)" इत्यादिश्रुतिभिर्भोग्यत्वभोक्तृत्वानियन्तृत्वैः प्रमाणितमिथोऽन्यत्वेष्वित्यर्थः ॥ २२ ॥

अत्रेति। अत्र भगवद्वस्तुनिरूपणे त्रिदण्डिनो वदन्तीत्यर्थः। इतरथा विग्रहादेरतिरेकास्वीकारे। यदिति। चिदात्मको भगवान् चिदात्मिका तस्य मूर्तिरित्युभयोश्चित्त्वे सादृश्यमेव न त्वभेदः। एतदुपोद्बलकं च—'मम देहे गुडाकेश' इत्यादि। यदात्मको घटः तदात्मकः करक इतिवत्। तत्र किमात्मक इति पृष्ट्वा स्वयमुत्तरयति—ज्ञानेत्यादि। विशेष्यभूतो धर्मिज्ञानात्मकः। ऐश्वर्यशक्त्योरपृथक्सिद्धधर्मत्वात्तदात्मकश्च स इत्यर्थः। अन्यथा षष्ठीश्रवणं व्याकुप्येत्। इतिशब्दो हेतौ। यस्मात् स ऐश्वर्यशक्तिभ्यां तादृग्भ्यां नित्योपेतस्तस्मादनादितत्सिद्धानि तस्मादपृथक्सिद्धानि बुद्ध्वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्यादिश्रुतेः "मम देहे गुडाकेश" (गी०) "हरेर्गुणाक्षिप्तमतिः" इत्यादिस्मृतेश्च स्वारस्यभङ्गः । न च विग्रहादेरपि ज्ञानादिरूपत्वं निष्प्रयोजनं प्रमाणेन प्रयोजनमुखानिरीक्षणात् ॥ २३ ॥

विशेष्येण स्वरूपेण सह तस्य संबन्धो नित्योऽपृथक्सिद्धविशेषणत्वात् । नित्यसम्बन्धापेक्षीण्येव स्वरूपानतिरेकित्ववचांसि ॥ २४ ॥

न च विशेष्यविशेषणयोर्ज्ञानादिरूपत्वे नित्यसं-

दीनि विशेषणानि वयं लक्षयामहे इत्यर्थः । न चेति । आत्मनो ज्ञानादिरूपत्वेन प्रकाशनादिफले सिद्धे विग्रहादेस्तत्त्ववर्णनं निष्फलमिति न वाच्यम् । विशुद्धसत्त्वरूपत्वन्तु युक्तं वक्तुमिति भावः । प्रमाणेनेति । प्रमाणं हि वस्तुतः स्वभावमपेक्ष्य तत्र प्रवर्तते न तु फलमपेक्ष्येत्यर्थः ॥ २३ ॥

न च विग्रहादेर्भिन्नत्वात् कदाचित् स्वरूपाद्वियोगः स्यादस्मद्विग्रहादिवदिति चेत्तत्राह–विशेष्येणेति । ननु विग्रहादेर्भेदे तदभेदबोधकानि 'नेह नानास्ति किञ्चन' 'अनन्तकल्याणगुणात्मकोऽसौ' इत्यादिवचांसि कथं संगतानि तत्राह–नित्येति ॥ २४ ॥

स्वरूपरूपयोर्भेदकान् धर्मान् वक्तुमाह–न चेति । यथा नारायणस्य वासुदेवादेश्च व्यूहस्य ज्ञानादिरूपत्वान्नित्यसम्बन्धाच्चाभेदस्तथा नारायणस्य तद्विग्रहादेश्च समा++क्तहेतोरिति न वाच्यमित्यर्थः । तत्र हेतुर्विशेष्यत्वेति । एकं विशेष्यं भगव-

Digitization by Arya Samaj Charitable Foundation, Chennai

बन्धे च स्वीकृते भेदानुपपत्तिर्विशेष्यत्वविशेषणत्वाभ्यां तयोर्भेदात्। एकं ज्ञानादिमत् परन्तु ज्ञानादिरूपमिति। इतरथा जीवेशयोरभेदापत्तिः ॥ २५ ॥

"यथोदकं दुर्गे वृष्टम्" (कठ० उप० ४–१४) इत्याद्या श्रुतिस्तु पृथक्सिद्धिवादिनं निन्दति। तस्मात् स्वरूपाद्विग्रहस्य गुणानां च भेद एवेति ॥ २६ ॥

नैतदतिचारु, यदित्यादिश्रुतिस्मृतिस्वारस्यभङ्गात्।

द्वस्तु परं विशेषणं तद्विग्रहादिवस्तु। पूर्वं चेतनं परन्तु चैतन्यमित्यर्थः। परव्यूहयोस्तु न विशेष्यविशेषणभावोऽस्ति परस्यैव व्यूहात्मनावस्थितेरिति न किञ्चिदवद्यम्। इतरथेति। ज्ञानादिरूपत्वान्नित्यसम्बन्धाच्च भेदास्वीकारे सतीत्यर्थः। तथा च जीवेशभेदावेदकानि 'द्वा सुपर्णा' (श्वे० उ० ४–६) इत्यादिवाक्यानि व्याकुप्येयुः ॥ २५ ॥

ननु गुणभेदवादिना तदभेदबोधिका श्रुतिः कथं संगता तत्राह–यथोदकमिति। न ह्येषा श्रुतिः गुणान् ब्रह्माभिन्नानाह किन्तु ये तान् पृथक्सिद्धान् प्रकृतिगतान् वदन्ति तान् गर्हयतीत्यर्थः। विज्ञातृत्वादयो गुणाः प्रकृतेरेव न तु पुंसः। किन्तु प्रकृतिसंसर्गात्ते पुंसि भवन्ति जपापुष्पारुण्यमिव स्फटिक इति साङ्ख्याः ॥ २६ ॥

निरस्यति–नैतदिति। अत्र हेतुर्यदिति। यो नारायणः परः स वासुदेवो व्यूह इतिवत् यो भगवान् सा व्यक्तिरिति श्रुते ऋज्वर्थः प्रतीयते। अत एव कल्याणेत्यादिस्मृतेश्च गुणा-

Digitization by Arya Samaj Charitable Foundation, Chennai

"श्रुतेस्तु शब्दमूलत्वात्" (ब्र०सू०२–१–२७) इति हि नः स्थितिरिति ॥ २७ ॥

सगुणवादिवाक्यानां गुणानुवादित्वेन गुणविधाने तात्पर्याभावान्निर्गुणं चैतन्यमेव पारमार्थिकं न तु सगुणं ब्रह्मेति दुरुक्तिस्तूपरिष्टान्निराकरिष्यते ॥ २८ ॥

तथा च विग्रहादेः स्वरूपानतिरेकेऽपि विशेषादेव भेदव्यवहारः । प्रवृत्तिनिमित्तभेदादर्थभेदस्तु लौकिकोऽस्माभिः स्वीकृतः । न त्वलौकिके श्रुतिमात्रगोचरे परस्मिंस्तत्त्वे स स्वीकर्तुं शक्यते ॥ २९ ॥

भिन्नः परात्मेत्यार्जवेनार्थोऽवगम्यते तस्य भङ्गः स्याद्यदि कष्टकल्पना तत्र विधेयेत्यर्थः । किं चात्मनिष्ठे बुद्धिमनसी विग्रहनिष्ठे स्वङ्गप्रत्यङ्गे प्रसिद्धे तेषां सर्वेषामिहात्मनिष्ठताश्रूयमाणतयोरैक्ये समञ्जसाभाविनीति । श्रुतेस्त्विति । ज्ञानं क्षणिकमिति बौद्धाः । ज्ञानं निराकारमिति मायिनः संगिरन्ते । तस्य श्रुतिबलादेव नित्यत्वं साकारत्वं च यूयं ब्रूथेति भावः ॥ २७ ॥

केवलाद्वैतिनः शङ्कामवहेलयन्नाह–सगुणेति । गुणा विग्रहो धर्मश्च । तद्विशिष्टब्रह्मवादिनामित्यर्थः । उपरिष्टाच्चतुर्थे पादे ॥२८॥

प्रकरणमुपसंहरति–तथा चेति । लौकिक इति । ब्राह्मणः श्यामः पाचको डित्थ इति व्याकरणादिशास्त्रोक्त इत्यर्थः । न त्वलौकिके इति । स प्रवृत्तिनिमित्तभेदादर्थभेदः, प्रवृत्तिनिमित्तभेदस्तु विशेषबलादिति बोध्यम् ॥ २९ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेवं तथाभूतस्य भगवतो ज्ञानादेवास्य जीवस्य तयोरात्यन्तिकयोः सिद्धिर्न त्वन्यस्मादिति सिद्ध्यति, "तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय" (श्वेता० उ० ३-८) इति श्रवणात्, "विद्यैव तु तन्निर्धारणात्" (ब्र० सू० ३-३-४७) इति न्यायाच्च, "प्लवा ह्येते अदृढा यज्ञरूपाः" (मुण्ड० उ० १-२-७) "नास्त्यकृतः कृतेन" (मुण्ड० उ० १-२-१२) "न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः" (महानारा० उ० १०) "यथा दृढैः कर्ममयैः क्रतुभिर्मामनोनिभैः" (भाग १०) "विद्यामान्वीक्षिकीं हित्वा

मुख्यं प्रकरणमुपसंहरति—तदेवमिति । तयोः सुखप्राप्तिदुःखपरिहारयोः। अन्यस्मात् कर्मतः। तमिति पुरुषसूक्ते तं परेशं विदित्वा ज्ञात्वोपास्य च अतिमृत्यु मोक्षं तद्वेदनादन्यः पन्था उपायो अयनाय मोक्षप्राप्तये न विद्यते । यलोपश्छान्दसः विद्यैवेति सूत्रम् । विद्यैव ज्ञानपूर्विकोपासनैव मोक्षहेतुः । कुतः तमेवेत्यादिश्रुतौ तस्यास्तद्धेतुत्वविनिश्चयादित्यर्थः न त्वन्यस्मादित्येतत् समर्थयन् प्राह—प्लवा इति मुण्डके। अदृढा जीर्णाः। नास्त्यकृत इति । अकृतो भगवल्लोकः कृतेन कर्मणा नास्ति न सिध्यति । साध्यसाधनयोस्तयोर्वैरूप्यादित्यर्थः । किन्तु विद्ययैव सिध्यति । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति वाक्यशेषात् । न कर्मणेति तैत्तिरीयारण्यके । एके विरक्तास्त्यागेन विरागपूर्वकेण विज्ञानेनेत्यर्थः । यथा दृढैरिति श्रीदशमे श्रुतः

Digitization by Arya Samaj Charitable Foundation, Chennai

तं प्रति भवार्णवम्'' इत्यादिश्रुतिस्मृतिभ्यः ॥ ३० ॥

स्यादेतत्। योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया। ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कर्हिचित्" (गीता) इति भगवता त्रिकं निःश्रेयसहेतुरित्युक्तम् । विद्यैव तद्धेतुरिति कथमिति चेत् । उच्यते-कर्मणः साक्षात्तद्धेतुत्वं नास्ति पूर्वोक्तश्रुत्यादिभ्यः ।किन्तु चित्तशुद्धिद्वारा तदुभयाङ्गतैव "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन" (बृ० उ० ४-४-२२) इत्यादिश्रुतेः, "यथेच्छावासनिरताः सर्वबाधाविवर्जिताः। शुद्धान्तःकरणाः शुद्धाः कर्मानुष्ठाननिर्मलाः ॥ शुद्धे च तासां मनसि शुद्धेऽन्तः

वाक्यम् । आन्वीक्षिकी आत्मविद्या । तथा च कर्मैव स्वर्गमोक्षहेतुर्विद्या तु तस्य द्वारमिति जैमिनिमतं निरस्तम् ॥ ३० ॥

स्यादिति । ज्ञानस्यैव तदुभयहेतुत्वं यत्त्वयोक्तं तदेतत् स्याद्यदि मदुक्तं नोपपद्येतेति शेषः। त्वया किमुच्यते इति चेत्तत्र वक्तव्यमाह—योगा इत्येकादशे । विद्यैवेति । ज्ञानमेवेत्यर्थः। उच्यत इति । तदुभयाङ्गता ज्ञानभक्तिपोषकतेत्यर्थः । तमिति । बृहदारण्यके तं जीवांशिनमीश्वरं वेदानुवचनेन स्वाध्यायपठनेन ब्रह्मचारिणः यज्ञेन दानेन च गृहिणः तपसा वनिन अनाशकेन यतयः। यथेति श्रीवैष्णवे । ब्रह्मणा सृष्टा प्रजा इति बोध्यम् । तासां प्रजानां येन शुद्धेन ज्ञानेन विष्णवाख्यं पदं वस्तु

Digitization by Arya Samaj Charitable Foundation, Chennai

संस्थिते हरौ। शुद्धज्ञानं प्रपश्यन्ति विष्ण्वाख्यं येन तत्पदम्” इत्यादिस्मृतेश्च । किन्तु ज्ञानभक्त्योरेव साक्षात्तद्धेतुत्वम् ॥ ३१ ॥

भक्तिरपि ज्ञानविशेषो भवतीति ज्ञानत्वसामान्यात्तमेवेति विद्यैवेति व्यपदेशः। जातिं पुरस्कृत्य बहुष्वैक्यं व्यपदिश्यते । यदाह भरतः “रसादीनामनन्तत्वाद् भेद एको हि गुण्यते” इति । विवृतं चैतत् । असंलक्ष्यक्रमत्वं जातिमादाय रसादिरेक एव गण्यते । अन्यथा तद्गणनमशक्यं प्रत्येकं भेदबाहुल्यादिति । ज्ञानविशेषे भक्तिशब्दस्य प्रयोगः कौरवविशेषे पाण्डवशब्दवद् बोध्यः ॥ ३२ ॥

अयमत्र निष्कर्षः । विद्यावेदनपर्यायं ज्ञानं द्वि-

लभ्यं भवतीति । ‘पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु’ इति नानार्थवर्गः । साक्षात्तद्धेतुत्वमव्यवधानेन मोक्षकारणत्वमित्यर्थः ॥ ३१ ॥

ननु भगवद्वाक्याज्ज्ञानभक्त्योरुभयोस्तद्धेतुता प्रतीता न तु श्रुतौ सूत्रे च तत्राह—भक्तिरपीति । स्फुटार्थम् । बहुष्वित्युभयोरुपलक्षणम् । विवृतमिति । साहित्यकौमुद्यामिति बोध्यम् । तद्गणनं रसादिसंख्याकरणम् ॥ ३२ ॥

ज्ञानस्य द्वैविध्यं विशदयति-अयमत्रेति । तत्र शुद्धेति । पञ्चाग्निविदः खलु जीवस्वरूपं विज्ञानविज्ञातुपरेशांशमनुदधते । तत्र

Digitization by Arya Samaj Charitable Foundation, Chennai

विधम्। एकं निर्निमेषवीक्षणवत्त्वंपदार्थानुभवरूपं, द्वितीयं त्वपाङ्गवीक्षणवद्विचित्रं भक्तिरूपमिति । तत्र शुद्धत्वंपदार्थानुसन्धिनाऽस्य जीवस्य तत्पदभाजोऽपि पतित्यक्तपत्नीवद् भगवत्प्रसादसौभाग्यहीनस्य कैवल्यलक्षणो मोक्षः स्यात् "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्" (बृह०उप० १–४–१२) इत्यादिश्रुतेः ॥ २३ ॥

तत्पदार्थपरिशुद्धिविज्ञानात्त्वमात्यसैन्याधिपादिवद्यथायथं तत्प्रसादसौभाग्यभाजनस्य तस्य सालो-

---

स्वानुसंधावपि परेशानुसंधिरस्तीति मैवेत्यादिश्रुतिसूत्राभ्यां सहाविरोधः। दृष्टान्तादप्येवं लब्धं-त्यक्तायाः पत्न्याः पतिज्ञानमस्त्येव। कैवल्येति । विशुद्धः सन् तल्लोके तिष्ठतीति नास्य लोकाध्यक्षतेति भावः। आत्मानमिति बृहदारण्यके। पुरुषो जीवश्चेदात्मानं स्वं विजानीयात् ,कथम् अयं विज्ञानविज्ञातृवपुः परेशांशोऽस्मदर्थो भवानीति विद्यात्तदास्य सिद्धः पुमर्थः। अथायं किं वस्त्विच्छन् कस्य कामाय वांछनीयाय शरीरमनुसंज्वरेन्निरन्तरं संतापयेत् । तावता ज्ञानेनायं निर्दुःखः साक्षात्कृततादृगात्मा नास्य काचिद्वाञ्छा यस्त्वस्याश्रीपरेशः सोऽपि पूर्ण एवेति न किंचित् कार्यमस्ति। 'कामः स्मरेच्छयोः काम्ये' इति श्रीधरः ॥ २३ ॥

तत्पदार्थेति । चिदेकरसपरेशानुभवादित्यर्थः । सालोक्यादीति । लोकाध्यक्षत्वसारूप्यसामीप्यसार्ष्टिलक्षणेत्यर्थः। ए-

Digitization by Arya Samaj Charitable Foundation, Chennai
BVBSSMV

क्यादिलक्षणा मुक्तिर्भवति । "एतद्वै सत्यकाम परं चापरं ब्रह्म यदोंकारः" इत्युपक्रम्य "यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्य्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं हैव स पाप्मभिर्विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" इति श्रवणात् । शास्त्रीयज्ञानं त्वत्र परत्र च द्वारभूतं स्वीकार्यम्, इतरथा प्रवृत्त्यनुपपत्तेः ॥३४॥

भक्तिरूपेण तु ज्ञानविशेषेण स्नेहसौन्दर्यादिगुणा-

तद्वै षट्प्रश्नं पिप्पलादस्य महर्षेर्वाक्यम् । हे सत्यकाम परं नारायणाख्यं अपरं विरिञ्चाख्यं यद् ब्रह्म तदेते देवा योऽयमोंकार इति । ॐकारस्य परब्रह्मत्वं हंसादिवदक्षररूपतदवतारत्वात् । अपरब्रह्मत्वं अपरस्य परकार्यत्वात् । तस्मादोंकारं ब्रह्मद्वयात्मकं जानन् विद्वान् एतेनोंकारेण ध्यानेन परापरयोर्ब्रह्मणोरेकतरमन्वेति । यथाध्यानं लभते पादोदरः सर्वः जीवघनात् सर्वजीवाभिमानिनो विरिचात्परं पुरि परमे व्योम्नि शयं स्थितं नारायणमीक्षते प्राप्नोतीति । अस्य परेशाध्यायित्वात् तत्प्रसादाल्लोकाध्यक्षत्वादिकं भवतीति गम्यते । शास्त्रीयं ज्ञानं त्विति । अत्र तत्त्वंपदार्थानुभवरूपे परत्र च भक्तिरूपे विज्ञाने इत्यर्थः । इतरथा शास्त्रीयं ज्ञानं विना तत्र तत्र प्रवृत्तिर्न स्यात् ॥३४॥

भक्तिरूपेणेति । निष्कामभक्तिरूपेणेति बोध्यम् । वरि-

Digitization by Arya Samaj Charitable Foundation, Chennai

क्षितियुवतिरत्नवद् भगवद्वशीकारप्रसादपात्रस्य तदङ्घ्रिवरिवस्यानन्दलक्षणः पुरुषार्थो भवति। "भक्तिरेवैनं नयते भक्तिरेवैनं दर्शयति भक्तिवशः पुरुषो भक्तिरेव भूयसी" इति "विज्ञानघनानन्दघना सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति" इति च श्रुतेः, "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज। साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥ मयि निर्बद्धहृदयाः साधवः समदर्शिनः। वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः

वस्या परिचर्य्या। 'वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्'इत्यमरः। भक्तिरेवेति माठरश्रुतिः। एनं भक्तं नयति तद्धाम प्रापयति दर्शयति। धामिनं हरिं कुत एव तत्राह—यतः पुरुषो हरिर्भक्तिवशः। कुतस्तद्वश्यत्वं तस्य तत्राह—भक्तिरेवेति। भूयसी सर्वतत्प्राप्तिसाधनेभ्यो बहुतरा श्रेष्ठेत्यर्थः। भक्तेः स्वरूपं निर्दिशन् पुरुषस्य तस्य तद्वश्यतामाह—विज्ञानेति। श्रीगोपालतापिन्यां कृष्णस्य द्वादशी मूर्तिः।भक्तियोगेति। तद्वश्यास्तीत्यर्थः। कीदृशी सेत्याह-विज्ञानघना मूर्तविज्ञानरूपा आनन्दघना मूर्तानन्दरूपा। मूर्त्तौ घन इति पाणिनिसूत्रम्। मूर्त्तौ काठिन्यर्थे हन्तेरप् स्याद्घनश्चादेश इति सूत्रार्थः। सैन्धवघनोदधिघनमिति तदुदाहरणम्। भक्तियोगे कीदृशीत्याह—सच्चिदिति। ह्लादिन्यादिसारे इत्यर्थः। अहमिति नवमे भगवद्वाक्यम्। अस्वतन्त्रो जीवो यथा परस्योत्कृष्टस्याधीनस्तथा परेशोऽप्यहं भक्ताधीन इत्यर्थः। भक्ताधीनता मे सुखायैवेति दृष्टान्तेनाह—सव

Digitization by Arya Samaj Charitable Foundation, Chennai

सत्पति यथा" इत्यादिस्मृतेश्च ॥ ३५ ॥

सालोक्यादेस्तु नेहाभिलाषः स्वतः संभवात् "मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम्। नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत् कालविप्लुतम्" इति स्मृतेः। भक्तिलक्षणेऽप्येवं पठ्यते "भक्तिरस्य भजनम्। तदिहामुत्रोपाधिनैरास्येनामुष्मिन् मनःकल्पन-

---

त्वमिय इति ॥ ३६ ॥

अस्या भक्तेर्निष्कामतां दर्शयति—सालोक्यादेरिति। इह निष्कामभक्तिरूपे ज्ञाने। स्वत इति। भोजनेनेव तृप्तेरिति भावः। अत्र प्रमाणं हेतुत्वेनाह—मदिति। नवमे श्रीभगवद्वाक्यम्। इह पूर्वा सेवा साधनभक्तिः परा तु प्रेमभक्तिरिति बोध्यम्। प्रतीतमनुषङ्गलब्धम्। अन्यत् स्वर्गसुखम्। नन्वेषां सालोक्याद्यनिच्छा न युक्ता तस्याप्राकृतत्वेनैष्टव्यत्वात्। सत्यम्। सालोक्यादिस्वभावजं सुखैश्वर्यं नेच्छन्ति सेवाविरोधित्वात्। तदविरोधि चेदिच्छन्त्येव। सेवानुपेतं तत् सुखरूपं सेवोपेतं तु परमसुखरूपं सेव्यस्य तद्रूपत्वादिति। स्वार्थनिपुणत्वमेषामुक्तम् 'आराधनं भगवत ईहमाना निराशिषः। ये तु नेच्छन्त्यपि परन्ते स्वार्थकुशलाः स्मृताः॥' इति शक्रेण, एवमहैतुक्यव्यवहितेत्यादौ बोध्यम्। एषां भक्तिरकिञ्चनेति तदनुष्ठातृमुखेन पौराणिकैरुच्यते—'न येषां भजनादन्यच्चिकीर्षितमभीप्सितम्। जिज्ञासितं च किञ्चित्ते ज्ञेया निःकिञ्चना बुधैः' इति। भक्तिरस्येति गोपालतापन्याम्। अस्य कृष्णस्य भक्तिरानुकूल्येन श्रवणादिभि-

Digitization by Arya Samaj Charitable Foundation, Chennai

मेतदेव नैष्कर्म्यम्" इत्यथर्वशिरसि "सर्वविधिविनिर्मुक्त तत्परत्वेन निर्मलम् । हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते" इति नारदपञ्चरात्रे च ॥ ३६ ॥

एवं च "यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" "नायं सुखापो भगवान् देहिनां गोपि-

---

जनस्। अस्मै रोचमाना प्रवृत्तिरानुकूल्यं तथामुष्मिन्न कृष्णे मनः कल्प्यते निवेश्यतेऽनेनेति निरुक्तेश्चित्तानुरञ्जनात्मकः श्रवणादिहेतुको भाव इत्यर्थः। उत्तमात्वसिद्धये–तदिहेति। इहलोके परलोके चोपाधेः कृष्णान्यफलेच्छाया नैरास्येन विरहेण कृष्णैकस्येहया जायमानमित्यर्थः। एतदेव नैष्कर्म्यं नित्यनैमित्तिकादिकर्मानावृतम्। स्वार्थे ष्यञ्। एवशब्दः सकामाया भक्तेर्व्यावृत्तये। यद्वा, अनुषङ्गेन कर्मरूपाविद्यानिवर्तकम्। आयुर्घृतमितिवत् प्रयोगः। सर्वेति। सर्वैरुपाधिभिर्हृषीकेशान्याभिलाषैर्निर्मुक्तम्। निर्मलं कर्मयोगाद्यनाविलं तत्परत्वेनानुकूल्येन विशिष्टम्। हृषीकेशस्य कृष्णस्य हृषीकेण श्रोत्रादीन्द्रियेण सेवनं कायिकं वाचिकं मानसिकं च परिशीलनमित्यर्थः॥ ३६॥

एवमिति। तत्त्वंपदार्थानुसन्धिरूपतया श्रवणादिभक्तितत्साध्यप्रेमरूपतया च ज्ञानद्वैविध्ये सतीत्यर्थः। यथेति छान्दोग्ये। यथाक्रतुर्यादृशोपासनः इतो लोकात्प्रेत्य परलोकमासाद्य तथा तदुपासनानुयायिफलो भवतीत्यर्थः। ये यथेति। ये यथेति श्रीगीतासु। नायमिति श्रीदशमे। अयं गोपिकासुतो यशोदो-

Digitization by Arya Samaj Charitable Foundation, Chennai

कासुतः । ज्ञानिनां चात्मभूताना यथा भक्तिमता-मिह" इत्यादीनि फलतारतम्यवाक्यानि सङ्गच्छेरन्निति ॥ ३७ ॥

अत्रैवं पुनश्चिन्त्यते भगवद्वशीकारहेतुभूता शक्तिः किंस्वरूपेति—किं प्राकृतसत्त्वमयज्ञानानन्दरूपा किं वा भगवत्स्वरूपज्ञानानन्दरूपा अथवा जैवज्ञाना-नन्दरूपा उत ह्लादिनीसारसमवेतसंवित्साररूपेति । नाद्यः भगवतो मायावश्यत्वाश्रवणात् स्वतः पूर्णत्वाच्च । न द्वितीयः अतिशयासिद्धेः । नापि तृतीयः जैवयोस्तयोः क्षोदिष्टत्वात् । किन्तु चतुर्थ एवासौ भवेत् ॥ ३८ ॥

रस्यो भगवान् कृष्णः देहिनामारुरुक्षुज्ञानिनामात्मभूतानामारूढज्ञानिनां च तथा सुखदो न यथेह गोपिकासुते भक्तिमतामित्यर्थः ॥ ३७ ॥

मायावश्यत्वेति । 'माया परैत्यभिमुखे च विलज्जमाना' इत्यादिस्मृतिभ्यः स्वतः 'पूर्णमदः पूर्णमिदम्' इत्यादिश्रुतिभ्यः । अपूर्णो हि जीवः प्राकृतं ज्ञानानन्दमिच्छति तदर्थमुद्यतते । अतिशयासिद्धेरिति । आनन्दस्वरूपोऽपि भगवान् भक्त्यानन्दातिशयी भवतीति वक्ष्यमाणस्यानन्दाधिक्यस्यासंभवादित्यर्थः । किन्त्विति । चतुर्थस्तदुभयसारात्मा चतुर्थप्रकार एवासौ भक्तिरित्यर्थः ॥ ३८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

भक्तौ खलु भगवान् स्वयमेव वशीभूतस्तिष्ठति तामरसकोशे मधुप इव रसिकयुवत्यां रसिकयुवेवेति श्रुतिस्मृतिभ्यः प्रतीयते । तत्प्रतीतार्थान्यथानुपपत्तिप्रसूतयार्थापत्त्या तु "ह्लादिनीसंधिनीसंवित्त्वय्येका सर्वसंश्रये । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" इति श्रीविष्णुपुराणोक्तस्वरूपविशेषभूतह्लादिनीसंवित्-

---

अथ लौकिकदृष्टान्तेन सुखरूपां भगवतो भक्तिवश्यतां ग्राहयति भक्तावित्यादिना । श्रुतिस्मृतिभ्य इति । 'भक्तिवशः पुरुषो भक्तियोगे तिष्ठति' 'अहं भक्तपराधीनः' इत्यादिभ्य इत्यर्थः । तत्प्रतीतीति । ताभ्यः श्रुत्यादिभ्यः प्रतीतोऽधिगतो यो भगवतो भक्तिवश्यतालक्षणोऽर्थः सोऽत्ययाभक्तेर्भगवत्स्वरूपविशेषभूतह्लादसंवित्सारत्वाभावे नोपपद्येत न सिद्ध्येत् तत्प्रसूतया तदन्यथानुपपत्तिज्ञातयार्थापत्त्या प्रमाणेन तु ह्लादिनीत्यादिवाक्यसिद्धतदुभयसारात्मा भक्तिरिति लभ्यते इत्यर्थः । असिध्यदर्थदृष्ट्या तत्साधकान्यार्थकल्पना ह्यर्थापत्तिः । पीनश्चैत्रोऽह्नि न भुङ्क्ते इत्यत्र यथाऽह्न्यभुञ्जाने चैत्रे पीनत्वमसिध्यत् तत्साधकं तत्र रात्रिभोजित्वं कल्पयति तथा श्रूयमाणं भगवतो भक्तिवश्यत्वमसिध्यत्तत्साधकं भक्तेस्तद्विशेषभूतह्लादसंवित्सारत्वं कल्पयतीति । ह्लादिनीति ध्रुववाक्यम् । जीवाद्वैलक्षण्येनेश्वरं स्तौति—हे भगवन् सर्वसंश्रये निखिलपरमाश्रये त्वयि ह्लादिन्यादित्रिवृत्तिका एकाऽभिन्ना शक्तिर्वर्तते सत्त्वांशेन मनःप्रसादलक्षणाह्लादकरी तमोंऽशेन विषयवियोगादितापकरी रजोंऽशेन त-

Digitization by Arya Samaj Charitable Foundation, Chennai

सारस्वरूपा सेति निश्चीयते ॥ ३९ ॥

तथाच ह्लादसंविदोः समवेतयोः सारो भक्तिरिति सिध्यति । तत्सारत्वं च तन्नित्यपरिकराश्रयकतदानुकूल्याभिलाषविशेषः । इत्थंभूता भक्तिरित्यभिप्रायेणैव सच्चिदानन्दैकरसतया तां विशिनष्टि श्रुतिस्तस्या भगवद्वश्यतां च दर्शयति "विज्ञानघना" इत्यादिना "भक्तिरेवैनं नयते" इत्यादिना ॥ ४० ॥

ननु ह्लादिन्यादिरूपा सा भक्तिर्भगवत्स्वरूपभूताज्ज्ञानानन्दान्नातिरिच्यते यदसौ स्वरूपशक्तिरिति भव-

---

दुभयोदयान्मिश्रेत्येवं त्रिगुणप्रकृतिस्त्वयि नो वर्तते । कुत इत्याह—गुणेति । मायागुणास्पृष्टेत्यर्थः । सा तु जीवेष्वेव वर्त्तते इति जीवेभ्यस्त्वमन्योऽतिसुखैश्वर्यवानित्यर्थः ॥ ३९ ॥

निष्कृष्यति—तथा चेति । समवेतयोरभिन्नयोरित्यर्थः ।एकेत्युक्तेः । तत्सारत्वञ्चेति । ह्लादाभिन्नायाः संविदो यस्तदानुकूल्यांशः स तस्याः सार इत्यर्थः । स च क्षीरसारवत् पुष्पसौरभवच्च बोध्यः । अभिलाषविशेष इति । कृष्णान्यतृष्णाशून्या कृष्णमात्रतृष्णेत्यर्थः ।धर्मभूतज्ञानोद्गतया तादृश्या तत् तृष्णया सह क्षीरनीरन्यायेनैकीभूतस्तदानुकूल्यांशो भक्तिरिति यावत् । सा तथाभूता भक्तिर्नित्ये धाम्नि नित्यपार्षदेषु नित्यं चकास्ति सुरसरिदिव तद्भक्तप्रणाल्या प्रपञ्चेऽप्यवतरतीति भाष्येऽपि भाणितम् । इत्थंभूता वर्णितलक्षणा ॥ ४० ॥

पुनः शङ्कते—नन्विति । स्वरूपशक्तिरिति । स्वरूपभूता शा-

Digitization by Arya Samaj Charitable Foundation, Chennai

द्भिरेवोक्तम् । कथमधुना भगवतस्वरूपज्ञानानन्दत्वं भक्तेः प्रत्याख्यायत इति चेत् । अत्राचक्ष्महे—न खलूपगतनिर्विशेषचैतन्यमात्रवदत्र ब्रह्मरूपं स्वीकुर्महे किन्तु स्वरूपशक्तिमदेव, शक्तिश्च स्वरूपानतिरेकिण्यपि तद्विशेषतया च भासतेऽन्यथा तस्य शक्तिरिति व्यपदेशासिद्धेः ॥ ४१ ॥

अवयवावयविभाववदेष प्रत्ययः यथा करचरणाद्यवयविनः कराद्यवयवानामनतिरेकेऽपि तदभावप्रतीतिर्वैदुषी तथैतद्द्रष्टव्यम् । न ह्येषा निर्मूला कल्पना "नेह नानास्ति किञ्चन" इत्यादिश्रुतिस्मृतिभ्यः "प्रतिषेधाच्च" (ब्र० सू०) इति न्यायाच्च । तथा च वर्तु-

---

क्तिरित्यर्थः । न खल्विति । पराभ्युपगमेति । मायिरवीस्वीकृतेत्यर्थः । अत्रेति । मध्वमुनिसिद्धान्ते इत्यर्थः । किन्त्विति । सत्ता सतीत्यादौ सत्तादीनां सत्ताद्यभिन्नसत्तादिमत्त्ववत् स्वरूपाभिन्नतच्छक्तिमत् स्वीकुर्महे इत्यर्थः ॥ ४१ ॥

विद्वद्दृष्टान्तेनोक्तमर्थं हृद्यारोहयन्नाह—अवयवेति । प्रकटार्थं सांख्यादिमतेनेदं बोध्यं न तु नैयायिकादिमतेन तत्र तयोर्भेदाङ्गीकारादिति भाष्येऽस्य विस्तरः । प्रतिषेधाच्चेति ब्रह्मसूत्रम् । "परास्य शक्तिर्विविधैव श्रूयते" इति शक्तेः स्वरूपाद् भेदे विभातेऽपि स्वाभाविकीति भेदप्रतिषेधान्न गुणगुणिभेद इत्यर्थः । लौकिकदृष्टान्तेनापि निष्कृष्टं ग्राहयन्नाह—तथा च वर्तुलत्वेत्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

लत्वकोमलत्वादिविशिष्टो यूनो भुजो यथा युवत्याः स्कन्धे निहितस्तयोः परानन्दाय संपद्यते तथा भगवत्स्वरूपविशेषभूतह्लादिन्यादिसारात्मा भक्तिर्भगवत्यपृथग्विशेषणतया भक्ते च पृथग्विशेषणतया सिद्धा तयोरानन्दातिशयाय भवतीति सर्वं निरवद्यम् ॥४२॥

अत्र सन्धिनीसंवितह्लादिन्यो यथोत्तरमुत्कृष्टा ज्ञेयाः । तत्र सदात्मापि यया सत्तां धत्ते ददाति च सा सर्वदेशकालद्रव्यव्याप्तिहेतुः संधिनी, संविदात्मापि

दिना । तयोरिति यूनोरित्यर्थः । भुजो यथा यूनोऽभिन्नो युवत्यास्तु भिन्नस्तथा ह्लादिनीसाररूपा भक्तिर्भगवतोऽभिन्ना भक्ताच्तु भिन्नेत्यर्थः । पृथग्विशेषणतया भूषणादिवदभिन्नविशेषणभावेनेत्यर्थः । तयोरिति भगवद्भक्तयोः ॥ ४२ ॥

ह्लादिन्यादीनां तिसृणां स्वरूपाणि कार्याणि च वक्ष्यंस्तासामुत्तरोत्तरोत्कर्षबोधाय क्रममाह—अत्रेति । तत्र सदात्मेति । अस्तीत्येवोपलब्धव्य इत्याद्युक्ताऽस्त्यात्मकोऽपि 'यथा सदेव सौम्य' इत्याद्युक्तां सत्ताश्रयतां सत्तां धत्ते द्रव्यकर्मकालस्वभावजीवेभ्यः सत्तां तत्तत्कार्यक्षमतां च ददाति सा सन्धिनी । संविदात्मेति । 'सत्यं ज्ञानम्' इत्याद्युक्तसंविद्रूपोऽपि यया प्रकाशैशूइतिवद् 'यः सर्वज्ञः' इत्युक्तसंविद्वान् भवति, 'यतैव प्रज्ञा च तस्मात् प्रसृता पुराणी' 'त्वत्तो ज्ञानं हि जीवानाम्' इत्याद्युक्तधर्मभूतज्ञानविशिष्टान् जीवान् करोति सा संवित् । ह्लादात्मेति । "विज्ञानमानन्दं ब्रह्म" इत्याद्युक्तानन्दस्वरूपोऽपि यया "आ-

Digitization by Arya Samaj Charitable Foundation, Chennai

यया संवेत्ति सवेदयति च सा संवित्, ह्लादात्मापि यया ह्लादते ह्लादयति च सा ह्लादिनीति तत्तत्प्राधान्येन स्फूर्त्तेस्तत्तद्रूपं तस्या एकस्या वैदूर्य्यदवसीयते ॥ ४३ ॥

सा तदुभयसारांशरूपा रतिप्रेमाख्या भक्तिर्भक्ते भगवति चात्मानं निक्षिप्य मिथस्तावनुरञ्जयति । यदुक्तम्—"साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यन्नैव जानन्ति नाहं तेभ्यो मनागपि" इति, "विसृजति हृदयं न यस्य साक्षाद्धारिरवशाभिहितोऽ-

---

नन्दं ब्रह्मणो विद्वान्" इत्युक्तानन्दवान् भवति यया च संविदभिन्नया श्रवणादिभावादिनाम्न्या स्वानुकूल्यभूतया स्वसंमुखान् जीवानानन्दयति "रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्याद्युक्तप्रशस्तानन्दभाजः करोति सा ह्लादिनीति । एकस्यास्तस्याः शक्तेस्त्रिधा भानं दृष्टान्तेन ग्राहयति—तत्तदिति । यथैकस्यैव वैदूर्य्यस्य नीलपीतादिरूपसत्ता तथैकस्याः परायाः सन्धिन्यादिरूपतेत्यर्थः ॥ ४३ ॥

भगवति चात्मानं निक्षिप्येति। विशेषहेतुकाद्दास्तवाद् भेदकादिति भावः । साधव इति नवमे भगवद्वाक्यम् । विसृजतीत्येकादशे हरियोगेश्वरवाक्यम् । भक्तेष्विति । भगवत्कर्तृका भक्तानुकूललक्षणा भक्तिर्भगवद्भक्तिरानन्दसंविद्रूपेत्यर्थः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

घौघनाशः। प्रणयरसनया धृताङ्घ्रिपद्मः स भवति भागवतप्रधान उक्तः" इति च। भक्तेषु भगवद्भक्तिश्च दर्शिता "एवं स्वभक्तयो राजन् भगवान् भक्तभक्तिमान्। उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीमगात्" इत्यादौ ॥ ४४ ॥

अतएव भक्तानन्दाय तस्य विविधः प्रयत्नोऽपि "मुहूर्तेनापि संहर्तुं शक्तो यद्यपि दानवान्। मद्भक्तविनोदार्थं करोमि विविधाः क्रियाः। दर्शनध्यानसंस्पर्शैः मत्स्यकूर्मविहङ्गमाः। स्वान्यपत्यानि पुष्णन्ति तथाहमपि पद्मज" इति तदुक्तेः ॥ ४५ ॥

तस्मात् परमानन्दमयोऽपि ययानन्दाऽतिशयी भवति स्वरूपानन्दं चानुभवति तं तमनुभावयति च

एवमिति। श्रीदशमे शुकवाक्यम्। स्वभक्तयोः श्रुतदेवबहुलाश्वयोर्ब्रह्मर्षिराजर्षिवर्य्ययोर्मिथिलावर्तिनोः। उषित्वा स्थित्वा। तौ प्रति स सन्मार्गमादिश्य ॥ ४४ ॥

अत एवेति। भक्तभक्तिमत्त्वादेव। तस्य भगवतः। मुहूर्तेनेति पाद्मे। दर्शनेति। यथासंख्यमत्रालङ्कारः। दर्शनेन मत्स्यः ध्यानेन कूर्मः संस्पर्शेन विहङ्गमो यथा स्वान्यपत्यानि पुष्णाति तथाहं स्वभक्तानित्यर्थः ॥ ४५ ॥

उपसंहरति—तस्मादिति। यया निरूपितया भक्त्या। ज्ञानफलमिति। तत् पदार्थानुसंधिरूपस्य ज्ञानस्य साध्यमित्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

भक्तान्। तस्याः सत्त्वमयानन्दादिरूपत्वं कथमिति परमपुमर्थरूपत्वं भक्तेः सिद्धम्। ज्ञानफलं भगवान् भक्तिफलं तु भक्तिरेव तद्विषया तस्या एवोदग्रानन्दत्वात् ॥ ४६ ॥

आनन्दादिरूपायास्तस्याः कायादितादात्म्येनाविर्भूतायाः क्रियाकारत्वमानन्दचिन्मूर्त्तेः कुन्तलादिप्रतीकत्ववदवसेयम्। कुपितपित्तेन सितामाधुर्य्यमिवाविच्छिन्नसंसारेण तदादिरूपत्वं तस्याः पूर्वं नानुभूयते तत्संसेवया तु क्रमेण तथात्वमनुभूयत इति ॥ ४७ ॥

अतएव सिद्धाना तस्या प्रवृत्त्यनुपरम इत्याह

तद्विषया भगवदुद्देश्या। तस्या इति। तदुभयसाररूपाया भक्तेरेवोत्कृष्टसुखरूपत्वादित्यर्थः। अत उक्तं नारदाय भगवता 'सर्वमङ्गलमूर्धन्या पूर्णानन्दमयी सदा। द्विजेन्द्र तव मय्यस्तु भक्तिरव्यभिचारिणी' इति ॥ ४६ ॥

ननु श्रवणादेः क्रियारूपाया भक्तेः कथमानन्दादिरूपत्वं प्रत्येतव्यं तत्राह-आनन्दादीति। कायादीति। भक्तदेहेन्द्रियसंबन्धेनेत्यर्थः। कुन्तलादीति। चिकुरनखराद्यङ्गवदित्यर्थः। 'अङ्गं प्रतीकोऽवयवः' इत्यमरः। तर्हि श्रवणादिभक्तेरानन्दादिरूपत्वं कुतो न प्रतीयते तत्राह-कुपितेति। तदादिरुपत्वमानन्दसंवित्सारत्वम्। पूर्वं संसारदशायाम्। तत्संसेवया श्रवणादिभक्त्यावृत्त्या ॥ ४७ ॥

सिद्धानां विमुक्तानां। आप्रायणादिति। आमोक्षात्तत्रापि

Digitization by Arya Samaj Charitable Foundation, Chennai

भगवान् सूत्रकारः 'आप्रायणात् तत्रापि हि दृष्टम्' (ब्र० सू० ४–१–१२) इति । न चैवं भक्तिपुरुषार्थवादिनां भगवत्पुरुषार्थताविगमः तस्यास्तदविनाभावेन तयैव तस्यापि प्राप्तेः । तथाच भक्तिमतां भक्तिविषयो भगवान् पुरुषार्थ इति निष्कृष्टमिति ॥ ४८ ॥

तस्मात् कर्मणश्चित्तशुद्धावुपयोगः ज्ञानभक्तिरूपाया विद्यायास्तु साक्षात्तत्प्राप्ताविति न काचिद्धिक्षतिः ॥ ४९ ॥

ये तु केचित् साद्विशेषप्रसङ्गादारम्भत एव भक्तिप्राप्तास्ते पुनर्भक्त्यैव चित्तशुद्धिं तत्साक्षात्कृतिं च

मोक्षे च भगवत् कैङ्कर्यं शास्त्रेषु दृष्टमित्यर्थः । तस्या इति । भक्तेर्भगवदविनाभावेनैव तद्विषयस्य भगवतश्च लाभादित्यर्थः । एतदेवाह–तथा चेति ॥ ४८ ॥

मुख्यं प्रकरणमुपसंहरति–तस्मादिति । न काचिदिति । मोक्षहेतुतयोक्तयोः कर्मभक्त्योश्चात्र संग्रहान्न काचिदूनतेत्यर्थः ॥ ४९ ॥

सनिष्ठानां परिनिष्ठितानां च कर्मपूर्वां साधनपद्धतिं प्रदर्श्य निरपेक्षाणामकर्मपूर्वां तां दर्शयति–ये त्विति । केचिन्नारदादयः । ते पुनरिति । तेऽकर्मनिष्ठाः द्वितीया इत्यर्थः । 'पुनरप्रथमे भेदे' इति विश्वः । पिबतीति द्वितीये शुकवाक्यम् । तपसेति । तपसा हरिवासरादिव्रतेन ब्रह्मचर्येण मैथुनवर्जनेन श्रद्धया श्रीभागव-

Digitization by Arya Samaj Charitable Foundation, Chennai

भजन्ते, "पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतम्। पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम्" इत्यादिस्मरणात्। एतानुद्दिश्य श्रुतिराह—"तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्येत्" इति ॥ ५० ॥

एषा खलु भक्तिरहैतुक्येव तां साधयति न त्वन्यादृशी। "अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत॥ दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः। स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः" इत्यादिस्मृतेः॥ अहैतुकी निष्कामा विशुद्धेति पर्यायाः। अव्यवहिता मधुधारावन्निरन्तरा या भक्तिस्तस्यां सत्यामिति शेषः। मत्सेवनं ममानन्दात्मकस्य भक्तिरसिकस्य प्रेमसेवां विनेत्यर्थः। सालोक्यादिकं तुष्टष्टलब्धमिवेति तस्येह नाभिलाषः ॥ ५१ ॥

तादिशास्त्रार्थदृढविश्वासेन विद्यया नवविधया भक्त्या भावलक्षणया च आत्मानं हरिमन्विष्येत् साक्षाच्चिकीर्षेत् ॥ ५० ॥

तां तद्वश्यतोपेतां तत्कृतिम्। अहैतुकीति तृतीये। तस्येहेति। इहाहैतुके भक्तियोगे। अत्र सालोक्यादितः सेवाया महानुत्कर्षः तद्वतां तत्रानादरात् परानन्दस्य स्वामिनस्तत्र सम्यगनुभवाच्च ॥ ५१ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु भक्तेर्निष्कामत्वं न संभवति तत्प्रसादितेन भगवता दीयमानस्यानन्दस्य काम्यत्वात् । यथा भावहावादिप्रसादितेन कान्तेनार्थ्यमानं रतसुखं तरुण्या काम्यते । तच्च कान्तादन्यदेवेति । एवमेव श्रुतिरप्याह "एष एवानन्दयाति रसं ह्येवायं लब्ध्वानन्दी भवति" इति चेत् । मैवम् । भक्तेः फलं चेद् भजनीयादन्यत् स्यात् यथा कान्तादन्यत्तदर्पितं रतसुखं तर्हि सा सफला भवेत् । प्रकृते तु भजनीयो भगवानेव फलं आनन्दात्मत्वात् "आनन्दो ब्रह्मेति व्यजानात्" इति श्रुतेः । किञ्च कान्तस्यानन्दसाधनत्वमेव । भगवतस्त्वानन्दरूपत्वात् फलरूप-

---

भक्तेरहैतुकतामाक्षिपन्नाह--नन्विति । तत्प्रसादितेनेति । तया भक्त्या परितोषितेनेत्यर्थः । आनन्दस्य तेन सह दिव्यरसगन्धाद्यनुभवादागतस्य सुखस्य रूपादन्यथेत्यर्थः । दृष्टान्तेन ग्राहयति—तथेति । भावः प्रेमाङ्कुरः हावस्तु प्रेममंजरी । लक्षणमेषां साहित्यशास्त्राद् बोध्यम् । रतसुखं संभोगानन्दः, तच्च कान्तादन्यदेवेति । सेव्याद् भिन्नं चेत् सेवायाः फलं तर्हि सा सकामेत्युच्यत इति भावः । एष इति । आनन्दयाति सालोक्यादि दत्त्वा सुखयति । दैर्घ्यं छान्दसम् । रसमिति । रसात्तस्मादुपलब्धेन सालोक्यादिनातिसुखी भवतीत्यर्थः । निरस्यति—मैवमिति । भक्तेरित्यादिकमगूढार्थम् । एवं चेति । भगवत आनन्दरूपत्वे सतीत्यर्थः । 'एवं प्रकारोपमयोः' इति श्रीधरः । 'सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः । अप्येव-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्वं निर्विवादम् । एवं च पुरुषार्थमूर्त्तित्वात्मदातृत्वोक्तयो न व्याकुप्येयुः । एष एवानन्दयातीत्यत्रात्मदानेनेति रसमित्यत्र तु रसेनैव तेन लब्धेन सानन्दो भवतीति च व्याख्येयम् ॥ ५२ ॥

स्यादेतत् । भक्तकृतानुकूल्याद् भगवतः स्वरूपोल्लासरूपं सुखं जलकल्लोलवद् भवतीति भाषितमहिकुण्डलाधिकरणे, स्मृतिश्च "प्रीतिः स्वयं प्रीतिमगाद् गयस्य" इति "सख्युः प्रियस्य विप्रर्षेरङ्गसङ्गातिनिर्वृतः । प्रीतो व्यमुञ्चदब्धिन्दून्नेत्राभ्यां पुष्करेक्षण" इति च । तेनानु-

---

मायं भगवान् पारिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान्' इति ध्रुववाक्ये पुरुषार्थमूर्तित्वं, 'ददात्यात्मानमप्यज' इति निमिनृपवाक्ये आत्मप्रदत्वं च द्रष्टव्यम् । एवमन्यानि च वाक्यानि मृग्यानि ॥ ५२ ॥

पुनराशङ्कते—स्यादिति । प्रीतिरिति पञ्चमे शुकोक्तिः । प्रीतिरानन्दरूपो भगवान् गयस्य राज्ञः स्वभक्तस्य प्रीतिमानन्दमगात् प्राप्तः । सख्युरिति श्रीदशमे शुकवाक्यम् । विप्रर्षेः सुदाम्नः अङ्गसङ्गेनालिङ्गनेन निर्वृतः परमानन्दी सन् प्रीतस्तदीक्ष्यप्रसन्नचेताः । तेनेति । तेनात्यानन्दितेन भगवतानुभूतेन स्वस्य भक्तस्य सुखोल्लासात् सकामा भक्तिः । एतत्सुखकामनया तद्भक्तेः कृतत्वादिति भावः । परिहरति—मन्दामित्यादिना । प्रकटार्थमेतत् । मत्सुखमिति भक्तस्य मम स्वरूपोल्लासलक्षणं सुखमित्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

भूतेन स्वसुखोल्लासात् सकामत्वं भक्तेः प्राप्तं घट्टकुट्यामिव प्रभातामिति चेत्। मन्दमेतत्। तेनानुभूतेन मत्सुखं स्यादिति विशेषणानुदयात् शुद्धभक्तानाम्। इतरथा तेषामहैतुकीत्यादिवाक्यानां व्याकोपापत्तिः। तत्सुखमेव मत्सुखमिति तु निष्कामितां भक्तेर्नापहन्ति किन्तु पुष्णात्येव तामिति ॥ ५३ ॥

एषा तु भक्तिस्तन्नित्यपरिकरगणादारभ्येदानीन्तनेष्वपि तद्भक्तेषु मन्दाकिनीवत् प्रचरति, अतस्तद्भक्तकृपयैव लभ्येति श्रीभागवतादिसंवादः। तथा च भजनीयस्यानन्दरूपत्वाद् भक्तेर्निष्कामत्वं तद्विषयस्य

र्थः। इतरथोक्तानङ्गीकारे आनुकूल्यासानन्दितस्य भगवतोऽनुभवेन स्वरूपोल्लासलक्षणस्य भक्तसुखस्याङ्गीकारे सति निष्कामभक्तिप्रतिपादकवाक्यगणव्याकोपादित्यर्थः। एतेनैव मदानुकूल्यसमानन्दितस्य भगवतोऽनुभवेन मदत्यानन्दः स्यादिति भक्तस्य धिषणायामुदितायां सकामत्वं भक्तेः प्राप्तं निवारयितुं तदुल्लासानुभावाभ्युदितेन स्वोल्लासेन पुनस्तत्सुखस्पृहाया वक्तुं शक्यत्वादिति सिद्धान्तिनः कल्पना। मामुल्लासितं वीक्ष्योल्लसितस्य भवतो वीक्षणेन मे महानानन्दः स्यादिति कामनया भक्तस्तमनुकूलयतीत्युक्तेः भक्तेः पुनः सकामत्वं स्यादिति पूर्वपक्षिणः कल्पना च निरस्ता वेदितव्या ॥ ५३ ॥

भक्तिमार्गोऽयं नाधुनिकः किन्त्वनादिरित्याह—एष त्विति।

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्य पुरुषार्थरूपत्वं च सिद्धम् ॥ ५४ ॥

ननु आनन्दरूपो भगवानिति नोपयुज्यते सीतादिव्यसनलालसेन तेन वैषयिकानन्दस्य समीहनात् । तस्माच्छब्दस्पर्शादिविषयसेवया वैषयिकं नाम सुखमुपजायते । तदेवेह चामुत्र च स्वर्गशब्दव्यपदेश्यमानन्द इति वेदज्ञा मन्यन्ते । यस्य लिप्सया लोकः सर्वां मर्यादामतिक्रम्य प्रवर्तते भगवतः सुखरूपत्वे तस्य तल्लालसो न स्यात् । सर्वस्य च लोकस्य तल्लिप्सया भाव्यं, न चैतदस्ति विषयालाभात्तदनर्हत्वाच्च । केचित् पङ्ग्वन्धबाधिरालसा जरातुराश्चानुकृतवैराग्याः सु-

---

नित्ये धाम्नि स्थिता नित्यपार्षदास्तेभ्यः परंपरया गङ्गाप्रवाहवदिहापि भक्तेरागमादित्यर्थः । ते ह्यवतारावसरे स्वामिना सार्द्धमिहाप्यसीदन्ति रूपान्तरेण ॥ ५४ ॥

भगवत आनन्दरूपत्वात्तदर्थिका भक्तिर्निष्कामेत्यापादितम् । तत्र कर्मठाः शङ्कन्ते—नन्विति । सीतादिव्यसनं व्यासङ्गः । आदिना भामादेर्ग्रहणम् । सीताया व्यसनं श्रीरामायणे, भामायास्तु श्रीहरिवंशे द्रष्टव्यम् । स्वर्गशब्देति । सुखविशेषः स्वर्गो न तु लोकविशेषः इति वेदज्ञा भट्टादयो भगवद्बहिर्मुखा मन्यन्ते । न चेदं जैमिनेर्मतं केवलाद्वैतमिव व्यासस्येति बोध्यम् । यस्येति । वैषयिकस्य सुखस्य । सर्वामिति । लौकिकीं वैदिकीं च । तल्लालसः सीतादिव्यसनतृष्णा तल्लिप्सया भगवद्वत्स्पृहया । न चैतदि-

Digitization by Arya Samaj Charitable Foundation, Chennai

खिनो वयमिति रिक्तभाषयाऽज्ञान् प्रतारयन्ति। तस्माद्वैदिकैः शुभकर्मभिर्विषयोपलम्भस्तत्सेवया सुखोत्पत्तिर्दुःखहानिस्तु तच्छेषभूत एव दीपप्रकाशस्य तिमिरनिवृत्तिरिवेति चेत् ॥ ५९ ॥

उच्यते— पामरं ब्रवीषि विषयरसिको विशुद्धानन्दानभिज्ञः। अस्ति हि वैषयिकातिरिक्तसुखसंपत्। सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति श्रुतेः। इह हि सुषुप्तिसुखं निर्विषयं प्रतीयते। सार्वलौकिकं चैतत्। एवञ्च जीवस्याणुभूतस्याजन्यसुखरूपत्वे सिद्धे विभोर्भगवतस्तु तादृशविपुलसुखरूपत्वं सिध्यति। "यो वै भूमा तत् सुखम्" (छा० उप०) इति, "आनन्दो ब्रह्मेति व्यजानात्" (उप०) इति च श्रुतिस्तथा-

---

ति। नैवं दृश्यते किन्तु विषयस्पृहैव दृश्यत इत्यर्थः। तर्हि ज्ञानवैराग्यशास्त्राणि व्यर्थानीति चेदोमित्याह—विषयालाभादिति। रिक्तभाषया व्यर्थवाण्या। शास्त्राणि तदनुष्ठानादीनीति भावः ॥ ५९ ॥

प्रत्याचष्टे—उच्यते इत्यादिना। निर्विषयमिति। न खलु सौषुप्तिकं सुखं शब्दस्पर्शादिभोगजन्यमित्यर्थः। तादृशेति। अजन्येत्यर्थः। किं चेति। 'किंचारम्भेऽपि साकल्ये' इति श्रीधरः। अन्यत्र प्रत्याख्यानमारभ्यते कात्स्न्येन वा तत् कार्यमित्यर्थः। वैष-

Digitization by Arya Samaj Charitable Foundation, Chennai

ह। किञ्च वैषयिकं नाम सुखमिन्द्रियैर्विषयग्रहेऽभिनिष्पद्यते तदग्रहे विनश्यतीति सर्वानुभूतं, भगवद्रूपं सुखं तु विषयत्यागेऽभिव्यज्यते तत्परिग्रहे तिरोभवतीति। "नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" (उप०) इत्यादिश्रुतेः, "विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः। वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात्" इत्यादिस्मृतेश्च ॥ ५६ ॥

वैषयिकं च सुखं तत्प्रतिच्छविरूपमेवेति श्रुतिराह– "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीव-

---

यिकं शब्दादिभोगजन्यम्। नाविरत इति काठके। यो दुश्चरितान्निषिद्धाचारादविरतोऽनिवृत्तः योऽशान्तोऽजितबहिरिन्द्रियः योऽशान्तमानसोऽजितान्तरिन्द्रियः यश्चासमाहितोऽकृतसमाधिः स एनं परमात्मानं प्रज्ञानेन नाप्नुयात्। तस्य प्रज्ञानं नोदयेदित्यर्थः। विषयेति श्रीभागवते। वारुणीदिग्गतं प्रतीच्यां नष्टम्। ऐन्द्रीं प्राचीं व्रजन् ॥५६॥

यज्ञादिकर्मभिर्विषयोपलम्भस्तैरेव निषेवितैरानन्द इति वादिनः कर्मठान्निराकुर्वन्नाह वैषयिकं चेति। एतस्यैवेति। भगवत्सांनिध्यात् सत्त्वं सुखात्मना परिणमते तच्चोत्कृष्टैः शब्दादिविषयैर्भुक्तैरभिव्यज्यत इति तस्य भगवद्धेतुकत्वात् स तादृश इत्यर्थः। अतएवेति। मोक्षानन्दस्य विषयानन्दस्य च दानादि-

Digitization by Arya Samaj Charitable Foundation, Chennai

न्ति" (वृ.उ.४-३.३२) इति। अत एव सर्वानन्दहेतुत्वं च तस्य सिद्धम्। उपेक्ष्यश्च विषयानन्दः "सुखमैन्द्रियकं राजन् स्वर्गो नरक एव च। देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद् बुधः" इत्यादिस्मृतेः। विषयानन्दाय लोकस्य प्रयासः सर्वां मर्यादामुल्लङ्घ्य प्रवृत्तिश्च युज्यते ऽनुभूतत्वात्। भगवतस्तु विशुद्धानन्दरूपस्याप्यननुभूतत्वात्तत्त्वात्तस्मै तामुल्लङ्घ्य प्रवृत्तिर्न समस्ति। कथञ्चिदनुभूते तु तस्मिन् सर्वं परित्यज्य सा दृष्टा यथा-

---

त्यर्थः। सर्वानन्दहेतुत्वं च तस्येति। 'एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्' इत्यादिश्रुतेः। 'स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदाम्। सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्' इत्यादि स्मृतेश्च। ततश्च सर्वार्च्यत्वं तस्यैव व्यज्यते। तर्हि विषयानन्दोऽपि तद्धेतुकत्वान्मोक्षवत् कांक्ष्योऽस्तु, तत्राह-उपेक्ष्यश्चेति। सुखमिति श्रीभागवते। ऐन्द्रियकं विषयग्राहिभिरिन्द्रियैः सिद्धम्। अनियतस्वभावत्वाद्विषयैर्वस्तुतः सुखं नेत्याह श्रीपराशरः। 'वस्त्वेकमेव दुःखायेर्ष्योद्भवाय च। कोपाय च ततस्तस्माद् वस्तु वस्त्वात्मकं कुतः॥ तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय यतः प्रसादाय च जायते॥ तस्माद् दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम्। मनसः परिणामोयं सुखदुःखादिलक्षणः' इति। नन्वानन्दश्चेद् भगवान् तर्हि सर्वस्तत्रैव च रमेन्न तु विषयानन्दे इति चेत्तत्राह-विषयान-

Digitization by Arya Samaj Charitable Foundation, Chennai

च कासाञ्चिद् व्रजसुभ्रुवाम् ॥ ५७ ॥

ननु भगवतोऽपि विषयविशिष्टत्वात्तत्तद्विषयसेवाजन्यानन्दाय तेषां तासां च तथा प्रवृत्तिरिति चेत्, मन्दमेतत् । तद्विषयाणामपि स्वरूपानन्दानतिरेकात् । तथा च श्रुतिः—"नेह नानास्ति किञ्चन" इत्याद्या, स्मृतिश्च "आनन्दमात्रकरपादमुखोदरादिः" इत्याद्या । अत एव तेषामतिक्षोभकत्वम् । शुद्धभक्तानां तत्त्वज्ञानात्तत्र निष्कामा प्रवृत्तिरित्यभिहितं "अहैतुकाव्यवहिता" इत्यादिना । सुखसाधने प्रवृत्तिः सकामा, सुखे तु सा निष्कामेति सर्वाभ्युपगतम् । तस्माद्विपुलानन्दरूपो भगवानि-

---

न्दायेति । तस्मै तामिति । तस्मै भगवते तं प्राप्नुयामित्यर्थः । तां सर्वां मर्यादाम् । कासांचिदन्तर्गृहगतानाम् ॥५७॥

पुनरपि हरेरानन्दरूपतामाक्षिपन्तः कर्मठाः प्राहुः—नन्विति । विषयविशिष्टत्वादुत्तमशब्दस्पर्शादिमत्त्वात् । तेषां शुकादीनां तासां कासाञ्चिद् व्रजसुभ्रुवां च । निरस्यति मन्दमेतदित्यादिना । तद्विषयाणां भगवदभिन्नविग्रहधर्माणां शब्दस्पर्शादीनां तेषां तच्छब्दस्पर्शादीनामत एव स्वरूपानुबन्धित्वादेवातिक्षोभकत्वम् । तत्रेति । भगवति तद्भजन इत्यर्थः । भगवद्भक्तेर्निष्कामतां ग्राहयति-सुखेति । सुखसाधने तरुण्यादौ तन्निष्ठे शब्दादिविषयग्रामे तन्निषेवालक्षणा प्रवृत्तिः सकामा तन्निषेवाजन्याय सुखाय कृतत्वात् तज्जन्ये सुखे तु सा निष्कामा । न खलु सुखा-

Digitization by Arya Samaj Charitable Foundation, Chennai

ति सिद्धः । ईदृशोऽपि स भक्तियन्त्रितः पुरुषार्थत्वाय प्रकाशाय वन्हिरिव मथित इत्यवसेयम् । सीतादीनां तु स्वरूपशक्तिवृत्तिभूतह्लादिनीसारसमवेतसंवित्सारात्मकत्वात्तद्व्यसनलालसेनापि न कोऽपि दोषः ॥ ५८ ॥

ननु पूर्णानन्देन भगवता भक्तैस्तज्ज्ञैरर्प्यमाणाः सेवा गृह्यन्ते इति नोपयुज्यते पूर्णानन्देत्यादिविरोधात् । "नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते । यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः" इति चेत् । मन्दमेतत् ।

दन्यत् फलमिच्छन् सुखं निषेवते, अतस्तन्निषेवा निष्कामेति सर्वज्ञातमेतदित्यर्थः । तस्मादिति । निष्कामभक्तिविषयत्ववचनादित्यर्थः । ननु परमानन्दो विभुर्भगवान् सर्वत्रास्ति सर्वे कुतो नानन्दिनस्तत्राह—ईदृशोऽपीति । भक्तियन्त्रितो भक्तिगृहीतः । स तत्त्वदृशश्चेत् सीतादिव्यसनी कथं तत्राह—सीतादीनामिति । न कोऽपीति । नानन्दरूपत्वक्षतिरित्यर्थः । तद्व्यसनिता तस्यसंवित्सारात्मतां नातिक्रामतीति भावः ॥५८॥

नन्वस्तूक्तयुक्त्या निष्कामा भक्तिः, सा खलु भगवति न प्रयोज्या तस्य पूर्णत्वेन तद्ग्राहकत्वासंभवादिति शङ्कते-नन्विति । तज्ज्ञैरिति । भगवतः पूर्णत्वादिधर्मज्ञैर्भक्तैस्तस्तितन् सेवाः कथं कार्यन्त इति भावः । पूर्णानन्देत्यादीत्यादिना तज्ज्ञत्वाविरो-

Digitization by Arya Samaj Charitable Foundation, Chennai

"सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" "भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्" "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः" "याः क्रियाः संप्रयुक्ताः स्युरेकान्तगतबुद्धिभिः। ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम्" इत्यादिश्रुतिस्मृतिभ्यः। आसु किल तद्भोक्तृत्वशक्तिभक्तार्पितसादरग्रहणयोरवगमात् स्वभावोचितसेवासु भक्तानां प्रवृत्तिरुपयुक्ता भगवता च भोक्त्रा प्रेष्ठानां तेषां ताः सादरग्राह्याः। नैवेति वाक्यं त्वेतदनुकूलत-

---

थश्च। नैवेति श्रीभागवते प्रह्लादवाक्यम्। अयं प्रभुरविदुषो जनादात्मनो मानं पूजां न वृणीते प्राकृतवन्नेच्छति यतो निजलाभपूर्णः किन्तु करुणत्वाद्वृणीते मां संपूज्यायं जगति पूज्योऽस्त्विति करुणया तत्पूजां स्वीकरोतीत्यर्थः। तत्र हेतुः यो यो भगवते यद्यन्मानं विदधीत तच्चात्मने तस्यैव भवतीत्यर्थः। तत्र दृष्टान्तः—यथा मुखे कृता श्रीस्तिलकादिशोभा प्रतिमुखस्य मुखप्रतिबिम्बस्य तद्वत् जीवः खलु हरेः रवेरिव शक्रचाप इति बोध्यम्। स इति तैत्तिरीयारण्यके। सलच्च पार्षदभावो मुक्तः ब्रह्मणा हरिणा सह कामान् दिव्यगन्धादीन् विपश्चिता विविधभोगचतुरेण। भोक्तारमिति श्रीगीतासु। या इति नारायणोपाख्याने। एकान्तेति। तदेकनिष्ठैरित्यर्थः। आस्विति। श्रुतिस्मृतिषु। स्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

या नेयम् ॥ ५९ ॥

नन्वेवं भोक्तुस्तस्य भोग्यालाभात् क्वचिद् दुःखमपुमर्थः प्रसज्येतेति चेत्। मन्दमेतत्। "मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः" इत्यादिषु भोग्यानां नित्यसिद्धिश्रव-

---

भावेति। दास्यसख्यादिप्रेमोचितासु। ताः सेवाः। सादरं साकाङ्क्षम् ॥५९॥

हरेर्भोक्तृत्वाद्भक्तैः प्रेम्णा निवेदितानि तेन तत्प्रेमाकृष्टेन स्वीकार्याणीति निरूप्य तत्र दूषणान्तरमागतं निराकर्तुमुत्थापयति—नन्विति। एवं भोक्तृत्वस्वीकारे सति क्वचिद्भोग्यालाभाद्रसगन्धाद्यप्राप्तेरित्यर्थः। दृश्यते हि नृपेन्द्राणामपि मृगयादिप्रवृत्तानां भोग्यालाभान्महद्दुःखमिति भावः। निराकुर्वन्नाह—मन्दमेतदिति। मनोमय इति छान्दोग्ये। मनोमयो विशुद्धेन मनसा गम्यः 'मनसैवानुद्रष्टव्यम्' इति श्रवणात्। प्राणशरीरः प्राणान्तर्यामी स्वभक्तप्राणतुल्यविग्रहो वेत्यपरे। भारूपश्चित्प्रकाशवपुः सत्यसंकल्पः सफलमानसक्रियः आकाशात्मा विभुर्निर्लेपश्च। सर्वकर्मा विचित्रानन्तचरित्रः सर्वकामो निखिलभोग्यसंपन्नः। एतदेव दर्शयति सर्वगन्ध इत्यादिना। रूपादेरुपलक्षणमेतत्। सर्वमिदं गन्धादिकमभ्यात्तो नित्यं धारयन्नवस्थितः। भावक्तान्तादर्शआद्यचि पदसिद्धिः, भुक्ता ब्राह्मणा इतिवत्। अवाक्यः कार्त्स्न्येन वाचामगोचरः 'कार्त्स्न्येन नाजोऽप्यभिधातुमीशे'

Digitization by Arya Samaj Charitable Foundation, Chennai

णात् । एवं च पूर्तिश्रुतिरपि निर्बाधा । इतरथा भोग्यभोक्तृत्वशक्तिवैधुर्यकृता तस्मिन्नपूर्तिर्भवेत् ॥६०॥

ननु "विजिघत्सोऽपिपासः" इति श्रुत्या भगवतः क्षुत्पिपासाप्रतिषेधान्नित्यतृप्तेन तेन तासां सादरग्रहो न संभवेदिति चेत् । उच्यते—तत्र हि वायुविकाररूपप्राणाभावात्तत्कार्ययोस्तयोः प्रतिषेधो न तु भोक्तृत्वशक्तेश्च तस्याः "सोऽश्नुते" इत्यादिश्रुतिस्मृतिसिद्धेः। तथा च यथा श्रीशुकभीष्मादेः सत्यपि पौरुषे न स्मरविकारः तद्वासनाभावात् तथा भोक्तुरपि तस्य तादृशप्राणाभावात्तत्कार्यें ते नेति । तस्मान्नित्यतृप्तस्यापि तस्य भक्तेच्छैव क्षुत्पिपासे स्वेच्छामयस्येत्यादिश्रुतेः । विलीनस्मरविकारस्य पुंसो वनिताकटाक्ष इव तद्विका-

---

इति वक्ष्यमाणत्वात् । नादरः स्वेतरेषु नमस्कारादिरहितः सर्वस्वामित्वात् 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इत्यादिश्रुतेः॥६०॥

भगवतो भोक्तृत्वं पुनरप्याक्षिपति—नन्विति । विजिघत्सः क्षुद्रहितः अपिपासस्तृषारहितः तासां रसगन्धाद्यर्पणानां सेवानाम् । निराचष्टे—उच्यत इत्यादिना । तत्रेति श्रुतौ । तथाचेति । पौरुषे पुंस्त्वे । तद्वासनेति । पुंस्त्वप्रयुक्तकामिनीवाञ्छाऽभावादित्यर्थः । ते नेति । ते क्षुत्पिपासे न स्त इत्यर्थः । ननु ते विना भोग्येषु कथमभिरुचिस्तत्राह—तस्मादित्यादि । भक्तेच्छैवेति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

रप्रकाशः भक्तेच्छानुसारिणा सत्यसंकल्पेन तस्य ते प्रादुर्भवेताम्। लोके तृप्तोऽपि प्रीत्यार्पितं भुञ्जानो दृश्यते। तस्माद्भक्तो यदेच्छति यद्यच्चार्पयति तदेव तदुपभुङ्क्ते तावतैवासौ तुष्यति नाधिकेन। "भक्तक्षणक्षणो विष्णुः स्मृतिः सेवा स्ववेश्मनि। स्वभोज्यस्यार्पणं दानं फलमिन्द्रादिदुर्लभम्" इति स्मृतिश्च ॥६१॥

तदीयानि तु भक्ष्याणि स्वरूपशक्तिसिद्धरसात्मकान्येव "श्रियः कान्तः कान्तः परमपुरुषः कल्पतरवो द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतं। कथा गानं नाट्यं गमनमपि वंशी प्रियसखी चिदानन्दं ज्योतिः परमपि

भोक्तृत्वशक्तिं विद्वान् भक्तो यदा भोग्यान्यर्पयितुमिच्छति तदैव ते स्यातामित्यर्थः। अत्र प्रमाणं—स्वेच्छेति। श्रीदशमे ब्रह्मवाक्यम्। स्वकीयानां मुक्तानाम् इच्छा। तन्मयस्य तदधीनस्येत्यर्थः। प्राचुर्ये मयट्। ननु ताभ्यां विरहितस्य तस्य भक्तेच्छयैव ते कथं भवेतां तत्राह—भक्तेच्छा त्विति। प्रीतिव्यवहारे लोकेऽप्यनुभूतमेतदित्याह—लोके इति। भक्त इति हरिमदीपे ॥ ३१ ॥

ननु भगवतो वास्तवीं भोक्तृत्वशक्तिं जानद्भिर्भक्तैः प्रीत्यार्पितान्यन्नादीनि प्रीत्यैव भुञ्जाने तस्मिन् हेयांशसंभावना लोकवत् प्राप्नोति, युक्ता च सा तानि भुञ्जाने तदंशसंभवात्। ज्ञानमूर्तौ नारायणादौ रसान् भुञ्जानेऽपि तदंशो न स्यात्, मनुष्यमूर्तौ कृष्णादौ तु स्यादेव सः। एवं धाष्टर्यान्युशतीत्यादिना तत्र

Digitization by Arya Samaj Charitable Foundation, Chennai

तदास्वाद्यमपि च" इति ब्रह्मसंहितायां,"द्रव्यतत्त्वं शृणु ब्रह्मन् प्रवक्ष्यामि समासतः । सर्वभोगप्रदा यत्र पादपाः कल्पपादपाः । गन्धरूपं स्वादरूपं द्रव्यं पुष्पादिकं च यत् । हेयांशानामभावाच्च रसरुपं भवेच्च तत् । त्वग्बीजं चैव हेयांशं कठिनाशं च यद्भवेत् । सर्वं तद्भौतिकं विद्धि न ह्यद्भुतमयं हि तत् । रसवदभौतिकं द्रव्यमत्र स्याद्रस-

---

तदुक्तेश्चेत्याशङ्कायां तद्भोग्यानामलौकिकत्वं प्रदर्शयन्नाह—तदीयानि त्वित्यादिना । श्रिय इति । कान्ताः स्त्रियः ताः श्रिय एव लक्ष्मीसहस्रशतसंभ्रमसेव्यमानमिति पूर्वमुक्तेः । अत एव कान्तास्ता व्रजदेव्योऽवगताः तासां सर्वासां कान्तः पतिः परमपुरुषो गोपलीलः कृष्णः एवावगतः । कल्पतरुत्वात्तत्र द्रुमाः सर्वाभीष्टप्रदा विदिताः । भूमिरित्यादि तद्वत् । चिदानन्दं परं वस्त्वेव यत्र ज्योतिश्चन्द्रसूर्यादि । तदास्वाद्यं तासां तस्य च भोग्यं रसगन्धादिकमपि चिदानन्दमेव तत्स्वरूपशक्तिविभवत्वात् । द्रव्यतत्त्वमिति विकसितार्थम् । 'नित्यावतारो भगवान्नित्यमूर्तिर्जगत्पतिः । नित्यरूपो नित्यगन्धो नित्यैश्वर्यसुखानुभूः' इति बृहद्वैष्णवे चैवम् । नित्यत्वादेव तानि भोग्यानि भोक्तृकार्येषु प्रसादकराणि निमज्जन्त्येव न तु जीर्यन्ति पुष्पाणि वासांसि चोत्तीर्णानि पुनः स्वाधारं भजन्ति, न तु पर्युषितानि नश्यन्ति वा । 'पूर्णे संवत्सरे देवि पुष्पमेतत्त्वयान्तिकात् । निर्वर्त्स्यते तरुवरं समयेन प्रयास्यति' इति । पारिजातपुष्पतयात्वाल्लिङ्गात् श्रीहरिवंशे पारिजातकुसुमं सर्वान्मनोरथान् ददात्येतद्वर्षानन्तरं पारिजाततरुमेव प्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

रूपकम्" इति हयशीर्षपञ्चरात्रे च तथैव प्रतीतेः ॥६२॥

रसानां भक्ष्याकारत्वमलौकिकत्वसिद्धं सच्चिदानन्दानां विग्रहत्ववत् । तादृशानि च तानि रूपादिवद्भोग्यानीति न हेयांशयोगसंभावना । न च नृलिङ्गं ब्रह्म भजतां काचिच्छङ्का तेषामपि तादृशत्वेन तदनुदयात् । एवमेव स्वीकृतं तज्ज्ञैः । श्रूयते परिमले मलशब्दो मे-

---

यास्यतीति नारदेन भैष्मीं प्रत्युक्तं द्रष्टव्यम् ॥ ६२ ॥

ननु भोग्यानां रसरूपत्वे चर्व्यचोष्यादिभावस्तेषां न स्यात्तत्राह रसानामिति। भक्ष्याकारत्वमोदनव्यञ्जनादिरूपत्वं,तादृशानि रसात्मकानि तानि भक्ष्याणि । रूपादिवदिति । न हि रूपस्पर्शादीनां भुक्तानां हेयांशः संभाव्यत इत्यर्थः । न चेति। नृलिङ्गं मनुष्याकृतिं कृष्णादिं भजतां नन्दादीनां काचिच्छङ्का । असकृद्भुञ्जानस्य कृष्णादेर्लोकवत् कुतो न हेयांशप्रतीतिरिति वितर्को न भवतीत्यर्थः । 'शङ्का त्रासे वितर्के च' इति विश्वः। तेषामपीति। तेषां नन्दादीनां चिदानन्दविग्रहाणां रसात्मकानि भोग्यानि भुञ्जानानां तादृशत्वेन हेयांशायोगित्वेन तदनुदयात् कृष्णादौ तस्याः शङ्काया असंभवादित्यर्थः । अत्र विद्वदनुभवं प्रमाणयन्ति—एवमेवेति। तज्ज्ञैः कविकर्णपूरैर्महानुभावैरित्यर्थः। श्रूयते इति। नन्दनृपराजधान्यामिति बोध्यम् । स्फुटार्थं पद्यम् । कृष्णादेश्चिन्मूर्तित्वं सर्वदेवाभ्यर्च्यत्वं सर्वाभिमतं देवेष्वपि हेयांशाभावात्तादृशे तत्र क तदंशः। तथापि तस्मिंस्तत्संभावना तत्स्वरूपापरिज्ञानाद्विद्वेषाद्वेति स्थितम् । तथा च हेयांशाभावाच्च निर्मलं समस्तहेयर-

Digitization by Arya Samaj Charitable Foundation, Chennai

खलादिषु खलाद्यभियोगः चन्दनादिरस एत्र हि पङ्क्तो नीत्रिकेशरशनादिषु बन्धः ॥ ६३ ॥

"एवं धाष्ट्र्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथाऽऽस्ते" इत्यत्र वास्तौ मेहनादीनि जलनिषेकपांशुप्रक्षेपादीनि धाष्ट्र्यानि कुरुते इत्येवार्थः । यद्वा, अमेति सहार्थेऽव्ययं अमा सह वसतोऽस्यां चन्द्राकौ॑ित्यमात्रस्यापदव्युत्पत्तौ दृष्टत्वात् "अमा सह समीपे च" इति नानार्थवर्गाच्च ।

हितं विष्णवाख्यं परमं पदमिति वैष्णवोक्तं स्वरूपं कृष्णादेः सिद्धम् ॥ ६३ ॥

ननु तस्मिन् हेयांशयोगं प्रत्यायययद्वाक्यं दृष्टं तस्य का गतिरिति चेत्तत्राह—एवमिति । हे उशति कमनीये यशोदे राज्ञि तव सुतोऽस्मद्वास्तौ एवं धाष्ट्र्यानि कुरुते । कानीति चेत्तत्राह—मेहनादीनि अम्बुनिषेकधूलिनिक्षेपादीनीत्यर्थः।अम्बुनिषेकमेत्र-प्रवृत्तिनिमित्तं कृत्वा मिहधातोर्मेघशब्दनिष्पत्तेरिति भावः । न चाप्रयुक्तत्वं दोषः, साहित्यरीतिकूपाम्बुनोऽत्र वेदान्तव्युत्पत्ति-पीयूषसिन्धावनादरणीयत्वात् । कीदृशः स्तेयोपायैः पीठकोलूखलादियजनैर्विरचितकृतिः प्रकाशितचौर्यपाण्डित्यः। अधुना त्वदग्रे सुप्रतीकः साधुर्यथास्ते। व्याख्यान्तरमाह—यद्वेति । अमेति "अमावस्यदन्यतरस्याम्" इति सूत्रेऽमाशब्दस्य सहार्थत्वप्रतीतेरित्यर्थः । एवं पदानि भङ्क्त्वा वाक्यान्वयं योजयति-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्तेयोपायैरमा सह धाष्ट्यानि कुरुते। कीदृशि नादीनि कण्ठादिनादवन्तीत्यर्थः ॥ ६४ ॥

एवमृषभे भगवति या हेयांशयोगोक्तिः तत्त्वज्ञप्रतीतानुवाद एव। तत्प्रत्येतॄणां 'देवमायाविमोहिताः' इति विशेषणात्। "इदं शरीरं मम दुर्विभाव्यं तत्त्वं हि मे हृदयं यत्र धर्मः। पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुर्य्याः" इति तन्मूर्त्तौ परतत्त्वं रूपत्वं तेनैव कण्ठतोऽभिहितम्। नहि तादृशे तस्मिन्नसौ संभवेत् तत्सेविनां जीवानां च सिद्धानामतद्योगः स्मर्यते "जगज्जनमलध्वंसिश्रवणस्मृतिकीर्तनाः॥ मलमूत्रादिरहिताः पुण्य-

---

स्तेयोपायैरिति। नादीनीति। मित्राण्याक्रोष्टुं कोकिलमयूरध्वनिवन्तीत्यर्थः। इदं व्याख्यानं वैष्णवतोषण्यां च दृष्टम् ॥६४॥

नन्वेवमित्यादिवाक्यस्य साहित्यचातुर्येण पदभङ्गेनान्यथा व्याख्यानं न चारु, ऋषभचरितस्य तत्प्रतीतार्थोज्जीवकत्वादिति चेत्तत्रापि तथा प्रतीतिर्भ्रान्तिरिति योजयति-एवमित्यादिना। तत्र तावत्तद्विग्रहस्य परवस्तुतामाह—इदमिति। दुर्विभाव्यं मनसाप्यवितर्क्यं यत्तत्त्वं परमात्मवस्तु तन्ममेदं शरीरमेव। मे हृदयमिति ऋषभं श्रेष्ठं वेदोक्तधर्मपालनात्तद्विरोधिनिराकरणाच्च ऋषभनामाऽहमित्यर्थः। "ऋषभः श्रेष्ठवृषयोः" इति श्रीधरः। असौ हेयांशयोगः। अत्र कैमुत्यं दर्शयित्वाह—तत्से-

Digitization by Arya Samaj Charitable Foundation, Chennai

श्लोका इति स्मृताः" इति ॥ ६५ ॥

तस्मादेवमत्र व्याख्येयं—प्राणिकर्मानुरूपफलप्रदो भगवान् "नायं देहो देहभाजाम्" इत्यादिस्वोक्त्युपदिष्टधर्मनिष्ठान् शिष्टान् प्रति परतत्त्वमूर्तित्वेनावगतः प्रयच्छति तेभ्यस्तदभीष्टानि, तदुपादिष्टधर्मभ्रष्टान् पामरान् प्रति तु हेयांशयोगितया प्रतीतस्तांस्तत्क्रियानुगुणनरकं प्रापयतीति "मद्धर्मविमुखा मामीदृशं प्रतियन्त्वाचरन्तु च तथा" इति तत्कामे सति तन्मायैव तथा भासयति ॥ ६६ ॥

हेयस्याप्यहेयतयाऽवभासनं तादृशाचारजिघ्राहयिषयैवेति मन्तव्यम्। इतरथा स्वधर्मदेशिकत्वेन तस्मिन्नास्था न स्यात्। यो ह्यधर्मो भगवता पृष्ठे कृतः स

विनामिति। पुण्यश्लोकाः शुकादयः ॥ ६५ ॥

तस्मादिति। ऋषभस्य परवस्तुत्वादित्यर्थः। पामरानर्हत्प्रभृतीन्। तत्क्रियेति। मलिनाचरणानुरूपम्। तत्कामे सति भगवदिच्छायां जातायामित्यर्थः ॥ ६६ ॥

पुरीषमुत्सृज्यातिसुगन्धिानि तस्मिन् पशुवदृषभो व्यचेष्टतेति यदर्हदादिषु तस्य चेष्टावभानं तत् किमर्थमिति चेत्तत्राह—हेयस्यापीति। पार्थिवादिरूपं भक्ष्यं पुरीषादिरूपेण परिणमते। न हि तयोः किञ्चिदन्तरमिति तत्र तत्र समदृष्टिः सोऽस्मदुपजीव्यऋ-

Digitization by Arya Samaj Charitable Foundation, Chennai

एवैष वैदिकशौचादिविरहदेवद्विजयज्ञाद्यवज्ञामयस्तैर्गृहीत इति मुनिः स्फुटयति-"यस्य किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां राजाऽर्हन्नामोपाशिक्ष्य कलावधर्मः" इत्यादिना । तस्मादार्हतान् पाषण्डिनः प्रति माययेदं हेयांशभासनं न च परमाप्ते भगवति वैषम्यं कर्मानुसारिणि तस्मिंस्तदसंभवात् ॥ ६७ ॥

एवं सति "तेन सह दावानलस्तद्वनं ददाह" इत्यत्र तु कर्तृसाहित्यमेव न तु कर्मसाहित्यं स्वीकर्तव्यं दावानलो वनं ददाह ऋषभस्तु तद्वासिनामविद्यामिति । य-

---

षभोऽभूदिति हेयेऽप्यहेयत्वावभासनं तत्पुरीषं बहुयोजनानि सुरभीणि व्यधादिति तस्मिन् सौरभ्यावभासनं चेत्यर्थः । तादृशाचारेति । नरकनिपातहेतुर्यस्तत्र तत्र समदृष्टित्वविधानलक्षणऋषभाचरितभ्रमादाचारस्तं ग्राहयितुमित्यर्थः । इतरथेति । ऋषभस्य तत्र तत्रोपादेयहेयभावत्यागेन समदृष्टित्वाभावे तस्य पुरीषे तादृक्सौरभ्याभावे चानवभाते सतीत्यर्थः । आस्था दृढविश्वासः । तैरर्हदादिभिः । मुनिः श्रीशुकः । यस्येति पञ्चमे । यस्यर्षभस्य उपाकर्ण्य श्रुत्वैव न तु वीक्ष्य । तस्मादार्हतानिति । श्रुतिबाह्यलिङ्गधारणं पाषण्डं तद्विद्यते येषां ते पाषण्डिनः इति मिताक्षरा ॥ ६७ ॥

भ्रमान्तरं निरस्यन्नाह-एवमिति । ऋषभस्य परतत्त्वे निर्णीते सतीत्यर्थः । कर्तृसाहित्यं दाहे कर्त्रानलेन सहभावः । न

Digitization by Arya Samaj Charitable Foundation, Chennai

त्त्वृषभस्य विष्णोः "एवमनुशास्यात्मजान्" इत्यादिभिः परमहंसधर्मानुष्ठानमुक्तं तत् खलु तदनुकरणरूपमेव तथैव प्रतीतेः। सांपरायविधिरपि प्रातीतिक एव तावतैव तदावेशपरिक्षयात्। तस्मात् सुष्ठूक्तं हेयांशयोगोक्तिरज्ञप्रतीतानुवादरूपैवेति। तस्मात् स्वज्ञानपूर्वकं भगवज्ज्ञानमेवात्यन्तिकदुःखनिवृत्तिसुखप्राप्त्युपायभूतं भवति नापरं किञ्चिदस्ति ॥ ६८ ॥

इति सिद्धान्तरत्नाख्यभाष्यपीठके परमपुमर्थोपायनिर्णयः प्रथमः पादः।

तु कर्मसाहित्यमिति। कर्मणा वनेन सहभावो न स्वीकार्य्यः। परतत्त्वस्याद्यात्वादिति भावः। नन्वृषभः किं तत्र ददाह तत्राह–ऋषभस्त्विति। यत्त्विति। तदनुकरणरूपं लोकशिक्षार्थमित्यर्थः। तथैव तत्प्रकरणेऽवगमात्। सांपरायविधिर्देहत्यागप्रकारः। तावतैवेति। प्रातीतिकेन तादृशानां देहत्यागेन शुश्रूषूणां नृणां देहावेशत्यागादित्यर्थः। प्रकरणमुपसंहरति--तस्मादिति। पञ्चमे ऋषभप्रकरणं वीक्ष्येदं विमृश्यम् ॥

इति श्रीगोविन्दभाष्यपीठकटिप्पण्यां प्रथमः पाञ्चजन्यपादो व्याख्यातः।

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वितीयः पादः

—<>∘<>—

अथैश्वर्य्यरूपा माधुर्य्यरूपा चेति भगवत्ताया द्वैविध्यात्तद्विषययोर्ज्ञानभक्त्योर्द्वैविध्यं प्रदर्श्यते । तत्रैश्वर्य्यं नरलीलामनपेक्ष्य पारमैश्वर्य्याविर्भावः । यथा पितरौ प्रत्यैश्वर्य्यं प्रदर्श्य "एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे । नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते" इति, यथा चार्जुनं प्रति—"पश्य मे योगमैश्वरम्" इति । माधुर्य्यन्तु पारमैश्वर्य्यस्य प्रकाशने चाप्रकाशने च नरलीलाऽनतिक्रमः । यथा पूतनाप्राणहर्त्तृत्वे स्तनचूषणरूपनरबालकचेष्टत्वं, यथा चातिकठोरशकटोत्पातनेप्यतिकोमलाङ्घ्रिदलहतिसिद्धत्वम्, अतिदीर्घदामाशक्यबन्धेऽपि मातृभीतिवैक्लव्यं, ब्रह्मादिमोहनेऽप्यतिसा-

---

अथ भगवत्प्राप्तौ साक्षात्साधनभावेनोक्तयोर्ज्ञानभक्त्योरैश्वर्य्यमाधुर्य्यविषयतया द्वैविध्यं वक्तुमारभते—अथेत्यादिना । नानाशङ्काश्मसञ्चूर्णनादस्य पादस्य कौमोदकीति संज्ञा सद्भिरुच्यते । एतद्वामिति । श्रीदशमे भगवद्वाक्यम् । एतच्चतुर्भुजमैश्वरं मद्भवं पूर्वदृष्टमद्विषयं । मर्त्यलिङ्गेन मनुष्यस-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्वैश्येऽपि वत्सचारणलीलत्वं, पारमैश्वर्ये सत्यपि तस्या-प्रकाशनेन दधिपयःस्तेयव्रजस्त्रीजनलोलुपत्वादि ॥ १ ॥

अथैश्वर्यज्ञानं पारमैश्वर्यानुसन्धौ सति हृत्कम्पहेतुना सादरसम्भ्रमेण स्वभावशैथिल्यकृद्धर्मविशेषः यथा "युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वरौ" इति, यथा च "सखेति मत्वा प्रसभं यदुक्तम् हे कृष्ण हे यादव हे सखेति। अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु। एकोऽथवाप्यच्युत तत्समक्षं तत् क्षामये त्वामहमप्रमेयम्" इति। इह वात्सल्यसख्यात्मकस्वभावशैथिल्यम्। माधुर्यज्ञानन्तु पारमैश्वर्यानुसन्धानेऽपि हृत्कम्पहेतुसम्भ्रमलवस्याप्यनुदयात् स्वभावातिस्थैर्यकृद्धर्मविशेषः। यथा "त्रय्या चोपनिषद्भिश्च

न्निवेशेन रूपेण इति शब्दानन्तरमशक्तमिति शेषः। एवमग्रेऽपि ॥ १ ॥

ज्ञेयमुक्त्वा ज्ञानमाह—अथेति। युवामिति। श्रीदशमे वसुदेववाक्यम्। युवां रामकृष्णौ भ्रातरौ। सखेति। श्रीगीतास्वर्जुनवाक्यम्। प्रसभं हठात्। क्षामये क्षमयामि। इहेति। युवां न न इत्यत्र पितुर्वात्सल्यशैथिल्यं, सखेतीत्यत्रार्जुनस्य सख्युः सख्यशैथिल्यम्। त्रय्येति। श्रीदशमे शुकवाक्यम्। सा श्रीय-

Digitization by Arya Samaj Charitable Foundation, Chennai

साङ्ख्ययोगैश्च सात्वतैः। उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम्'' "वन्दिनस्तमुपदेवगणा येगीतवाद्यत्र-लिभिः परिवव्रुः। वन्द्यमानचरणः पथि वृद्धैः"इत्यादि। इह पारमैश्वर्य्यानुसन्धानेऽपि वात्सल्योज्ज्वलाख्यस्वभा-वाशैथिल्यम् ॥ २ ॥

माधुर्य्यनिष्ठानामैश्वर्य्यज्ञानं त्रिवेण्यां सारस्वतप्रवा-हवद् गौणतयाऽस्ति हृत्कम्पहेतोः सादरसम्भ्रमस्याभा-वात्। न च तद् भावसङ्कोचकृत् प्रत्युत तत्पोष्येव मत्सुतो मत्सखो मत्प्रियो वा सर्वेश्वर इत्युल्लासस-

---

शोदा। वन्दिन इत्यादिकं तत्रैव श्रीयशोदां प्रति व्रजदेवीनां वाक्यम्। वृद्धैर्ब्रह्मादिभिः। इहेति। कृष्णैश्वर्य्यं विज्ञायापि तत्र श्रीयशोदावात्सल्यं शिथिलं नाभूदपि तु दृढमेव जातम्। कान्तस्यैश्वर्य्यं विज्ञायापि तासां तत्र कान्तभावो न शिथिलोऽपि तु दृढ एवासीदित्यर्थः ॥ २ ॥

भगवद्भक्तेष्ववरा व्रजस्थाः भगवत्तत्त्वाज्ञानात्, त-थापि वन्हिस्पर्शेन दाह इव वस्तुमहिम्ना तेषां मोक्षस्त्वभूदिति केचिदज्ञा मन्यन्ते, तान्निरस्यन्नाह—माधुर्य्येत्यादि। माधुर्य्य-निष्ठानां व्रजस्थानां यद्येषामैश्वर्य्यज्ञानं स्वीकृतं तर्हि तन्माधु-र्य्यभावमपनेष्यतीति चेत्तत्राह—न च तदिति। तदैश्वर्य्यज्ञा-नम्। ननु कैषामैश्वर्य्यज्ञानं दृष्टम्। तत्राह—विस्मय इत्यादि। यथा कृष्णस्य दृष्टविश्वाया व्रजेश्वर्य्या विस्मये स्वभावसिद्धे-

Digitization by Arya Samaj Charitable Foundation, Chennai

म्भवात् । लोकेऽपि यथा स्वपुत्रस्य स्वसखस्य स्वकान्तस्य वा पृथिवीश्वरत्वे सति तस्मिन् वात्सल्यादेः पुष्टिभर्वेत्तथैतद्द्रष्टव्यम् । विस्मये विरहे विपदि च तस्योदयः पर्वाणि सारस्वतस्येव प्रवाहस्य ॥ ३ ॥

ऐश्वर्य्यवन्माधुर्य्यस्यापि ब्रह्मधर्मत्वात्तद्विषयकमपि ज्ञानं ब्रह्मज्ञानमेव सहस्रशीर्षत्वादिवद् द्विभुजत्वादेरपि ब्रह्मधर्मत्वं श्रुतिस्मृतिभ्यः सिद्धम् । "सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं मौनमुद्राढ्यं

दृशमहिमा परेशोऽयमिति ज्ञानमुदभूत् । यथा च वरूणकृतायां पूजायां श्रुतायामयं परमेश्वर इति व्रजौकसां ज्ञानमुदगात् । विरहे चेति । 'मनसो वृत्तयो नः स्युः कृष्णपादाम्बुजाश्रवाः । वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु' इति तेषामेव तदैश्वर्य्यबोधकवचनम् । मृगवपुरित्यादि च श्रीराधादीनां तादृशं वचनम् । विपदि चेति । इन्द्रादिहेतुकायां विपत्तौ सर्वेषां तदैश्वर्य्यबोधिका वाक् प्रसिद्धेति । श्रीदशमे द्रष्टव्यमेतत् ॥३॥

तत्वैश्वर्य्यं भगवतो वास्तवमीश्वरस्वरूपानुबन्धित्वात् माधुर्य्यन्तु न वास्तवं मनुष्यानुग्रहाय मायया मनुष्यदेहतच्चेष्टयोर्धारणात्, अत उक्तं 'मायामनुष्यस्य वदस्व विद्वन्' 'लीलामानुषविग्रहः' इत्यादि । तस्मान्माधुर्यज्ञानवतामवरत्वमिति चेत्तत्राह—ऐश्वर्य्यवदिति । तद्विषयकं माधुर्य्यसम्बन्धि । सत्पुण्डरीकेति । श्रीगोपालपूर्वतापन्याम् । अत्र कृष्णस्य माधुर्य्यमी-

Digitization by Arya Samaj Charitable Foundation, Chennai

वनमालिनमीश्वरम्", "यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते। यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृति", "गूढं परब्रह्म मनुष्यलिङ्गम्" इत्यादिभ्यः। एवञ्चोभयज्ञानसत्त्वाद् ब्रह्मोद्धवादिवन्द्यपादरजस्त्वं माधुर्यज्ञानवतां स्मर्य्यते ॥ ४ ॥

यत्तु "यदैश्वर्यज्ञानशून्यत्वादेषां रागे प्रधानता" इत्यु-

श्वरत्वेऽपि सति मनुष्यसन्निवेशताद्विचेष्टयोरुक्तेः प्रतीतम्। यदोरिति। श्रीवैष्णवे। गूढमिति श्रीभागवते। ब्रह्मोद्धवादीति। 'तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकं यज्जीवितं तु निखिलं भगवान् मुकुन्दस्त्वद्यापि यत् पदरजः श्रुतिमृग्यमेव'इति ब्रह्मणो वाक्यम्। 'आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम्' इत्यादिकमुद्धवस्य च। 'मायामनुष्यस्य'इत्यत्र मायया पराख्यया स्वरूपशक्त्या मनुष्यस्य नित्यं मनुष्यसन्निवेशिन इत्यर्थः। 'स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः। अतो मायामयं विष्णुं प्रवदन्ति सनातनम्' इति श्रुतेः, 'त्रिगुणात्मिकाथ ज्ञानं च तथा चिच्छक्तिरेव च। मायाशब्देन भण्यन्ते शब्दतत्त्वार्थवेदिभिः' इति शब्दमहोदधेश्च, 'माया वयुतं ज्ञानम्' इति निघण्टुकोशाच्च। न हि मनुष्याकारः स्वर्णपिण्डो मनुष्यः, अन्यथा सच्चिदानन्दविग्रहत्वश्रुतिर्व्याकुप्येत्। एतेनैव लीलेति व्याख्यातम् ॥ ४ ॥

नन्वेवं व्रजौकसामुभयज्ञानवत्त्वेन चेद् भक्तवर्य्यत्वं सिद्धं

Digitization by Arya Samaj Charitable Foundation, Chennai

पजीव्यैरभिहितं तत्र किल हृतकम्पहेतुसादरसम्भ्रमाजनकत्वादिति बोध्यम्। न त्वैश्वर्यज्ञानमात्राभावात् तज्ज्ञानस्य दर्शितत्वात्॥ ५॥

तर्हि भवदुपजीव्यैः श्रीरूपचरणैस्तेषामैश्वर्यज्ञानं कुतो निषिद्धम्? तत्राह—यत्त्विति। हृतकम्पेति। तदैश्वर्यज्ञानस्येति बोध्यम्। अयमर्थः—व्रजौकसां रागात्मिका भक्तिः, तल्लक्षणं च तैरुक्तम्—'इष्टा स्वारसिकी रागः परमाविष्टता भवेत्। तन्मयी या भवेद् भक्तिः साऽत्र रागात्मिकोदिता' इति। अस्यार्थः—इष्टे स्वानुकूल्यविषये वस्तुनि स्वारसिकी स्वाभाविकी या परमाविष्टता तस्या हेतुः पितृत्वादिसम्बन्धप्रधाना प्रेममयी तृष्णा स रागो भवेत्। तदाधिक्यहेतुतया तदभेदोक्तिरायुर्घृतमितिवद् बोध्या। तन्मयी तदेकप्रवर्त्तिता भक्तिरत्र रागात्मिका कथ्यते। तत्प्रकृत वचने मर्यादिति। अस्यां सत्यां तत्सेवायां निःसम्भ्रमा प्रवृत्तिः या व्रजौकसां श्रीदशमादौ दृश्यते यत्राश्लेषादयो निःसङ्कोचाः प्रवृत्ताः प्रभुरयमिति ज्ञानाच्चेतसि सादरः कम्पः सम्भ्रमः कथ्यते सर्वेश्वरोऽयं कृष्ण इति ज्ञानं विद्यमानमपि तादृश्या रागानुगयाऽन्तर्निगीर्णत्वात् प्रभावितुमशक्नुवन्तं संभ्रमन्न जनयतीति। तदजनकत्वादेव तत्रास्तीति तैर्निषिद्धं न तु सर्वथा नास्तीत्यभिमतं कृष्णविषयकस्यैश्वर्यज्ञानस्य श्रीदशमादिषु वर्णितत्वादिति। मथुराद्यौकसान्तु तादृश्यास्तस्या अभावेनैश्वर्यज्ञानस्य प्रभुत्वात्तं कम्पं जनयतीति गौणी तेषां रागात्मिकेति व्याख्यातारः॥ ५॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तच्च "अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः", "सर्पो मा ग्रसते तात प्रपन्नं परिमोचय। दावाग्निना दह्यमानान् प्रपन्नांस्त्रातुमर्हथः" "मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम्। बलिमपि बलिमत्त्वाऽवे-

---

व्रजौकसामैश्वर्यज्ञानं प्रमाणयति—अथो इत्यादिना। श्रीदशमस्याष्टमे हरेर्मृद्भक्षणचरित्रं वर्णितम्। तत्रैकदेत्यादिभिस्तत्सखैस्तन्मृद्भक्षणं तन्मातरि सूचितम्। तया च गृहीतकरं स उपात्तातस्य मतृतो भयं सखिवचसां मिथ्यात्वोक्तिपूर्वकं स्वमुखव्यादानं मात्राहं ताड्यमानो न स्यामिति तद्विस्मयाय स्वसङ्कल्पानुगया स्वैश्वर्यशक्त्या स्वास्ये विश्वप्रदर्शनम्। तत्र बहिःस्थितमेव विश्वं पतिपुत्रसहितमात्मानं व्रजश्च तदास्यमध्ये पश्यन्त्या मातुः कथमेतत् सम्भवेदिति संशयरूपा शङ्का तस्याः 'किं स्वप्न एतदुत देवमाया किं वा मदीयो वत बुद्धिमोहः' इत्यर्धकेन प्रतिपादनम्। 'अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः' इत्यर्धकेन तु मत्पुत्रस्य परेशत्वात्तस्यैवायं स्वाभाविको धर्म इदानीं मत्प्रत्यक्षोऽभूदिति स्थापनम्। माधुर्यानुबन्धिनो हरेर्धर्मा व्रजौकसां सदैव प्रत्यक्षा ऐश्वर्यानुबन्धिनस्तु ते तस्मिन् सत्त्वेन ज्ञाता एव कदाचिदेव प्रत्यक्षा भवन्तीति तत्त्वविदां राद्धान्तः। 'अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरञ्जसा' इत्यर्द्धकेन मदर्भकस्य नारायणाख्यस्वांशपुरुषद्वाराऽयमाश्चर्यप्रदर्शनलक्षणोऽवितर्क्यो धर्मः

Digitization by Arya Samaj Charitable Foundation, Chennai

ष्टयद्ध्वाङ्क्षत्वचस्तदलमसितसख्यैर्दुरत्ययजस्तत्कथार्थः" "वरदेश्वर मा स्म च्छिन्द्याः" इत्यादितद्वाक्यात्। किन्तु तत्तज्ज्ञानानि क्रमेणोदयन्ते, युगपत् सर्वायोगात्तथैव रसपोषाच्च । नाऽप्यनुदितमसत् "पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्" इति न्यायात् ॥

प्रत्यक्ष इति निरूपणम् । ततो 'यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताऽस्मि तत्पदम्'इत्यर्द्धकेन चित्तप्रभृतिभिर्वितर्कगोचरं न भवति । यदाश्चर्यदर्शनं यदाश्रयं यद्यदाधिष्ठानकं यत इतिपदस्योत्पत्तिहेतुः येनेति पदस्य प्रतीतिहेतुस्तत्पदं पुरुषांशरूपं वस्तु तस्मिन् धर्मसंशयं निराचिकीर्षुरहं प्रणताऽस्मि। कृष्णो मत्पुत्रो मे लालनीयस्तत्स्वांशः पुरुषस्तु पूज्य इत्यस्मद्भक्तिपद्धतिः । यः स्वांशिनः कृष्णस्य मत्पुत्रस्य मत्तो भयमपनिनीषुस्तदास्ये तादृशं विश्वं प्रदर्श्य मां विस्मापयते स प्रसीदन्मे तद्धर्मे शङ्कामपनयतादित्यर्थः । 'अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती । गोप्यश्च गोपाः सह गोधनाश्च मे' इति त्रिपाद्या तच्छङ्काप्रणाशपूर्वकं निजभावदार्ढ्यदर्शनम् । 'यन्माययेत्थं कुमतिः स मे गतिः' इति चतुर्थपादेन तु यस्य मत्पुत्रस्वांशस्य पुरुषस्य मायया ममेत्थं किं स्वप्न इत्याद्युक्ता संशयरूपा कुमतिः स मे गतिस्तादृशसंशयतरणे समाश्रयोऽस्त्विति पुनस्तदनुदयाभ्यर्थनम् । 'इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः । वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः' इत्येके । न तु मत्स्वरूपं विज्ञाय मन्माता मे लालने

Digitization by Arya Samaj Charitable Foundation, Chennai

भगवतोऽपि मिहिरप्रकाशन्यायेन निरन्तरप्रतत-ज्ञानस्य मनुष्यलीलोपयोगिसंमुग्धत्वं वीक्ष्यते "तदभिज्ञोऽपि भगवान् सर्वात्मा सर्वदर्शनः । प्रश्रयावनतोऽपृच्छद् वृद्धान्नन्दपुरोगमान् ॥ ततो वत्सान्" इत्यादौ ।

शिथिला मा भूदिति माधुर्यानुयोगिकृपावर्णनम् । 'सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजम् । प्रवृद्धस्नेहकलिलहृदयाऽऽसीद्यथा पुरा' इत्येके । न तु विस्मयदर्शनानुसन्धेः स्मृतेस्तिरोधानात्मा नाशस्ततः पुत्रलालनमिति । एवमन्यच्च व्याख्येयम् ।

एवं श्रीयशोदायाः कृष्णैश्वर्यज्ञानं प्रदर्श्य श्रीराधायास्तद्दर्शयति—मृगयुरिति । श्रीदशमे भ्रमरमुद्दिश्य तस्य वाक्यम् ।

हे मधुप स कृष्णः पुरापि रामः सन् मृगयुर्व्याध इव कपीन्द्रं वालिनं विव्यधे मारितवान् । अलुब्धधर्मा व्याधधर्मेण रहितः । न हि व्याधः कपिं हन्यात्तन्मांसस्याऽभक्षणीयत्वात् । स्वयं स्त्रीजितः सीताऽनुरक्तोऽपि कामयानां स्पृहावतीं स्त्रियं शूर्पणखां विरूपां छिन्ननासाकर्णामकृत । पुरा वामनः सन् बलिना दत्तं बलिं त्रैलोक्योपहारमत्त्वा गृहीत्वाऽपि बलिमवेष्टयद् ववन्ध । ध्वाङ्क्षवदिति । काको यथा बलिमत्त्वाऽपि तद्दातारं वेष्टयति तद्वदित्यर्थः । तस्मादासितस्य श्यामस्य सख्यैरलम् । तर्हि तूष्णीमास्स्व इति चेत्तत्राह—तत्कथारूपोऽर्थस्तु दुस्त्यज इति । इह श्रीयशोदायाः श्रीराधायाश्चैश्वर्यज्ञानं विस्फुटम् । वरदेति । सर्वासां प्रेयसीनाम् । अत्र 'धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः । यान् ब्रह्मेशो रमा देवी दधु-

Digitization by Arya Samaj Charitable Foundation, Chennai

तच्च स्वचिच्छक्तिसाररूपलीलानन्दात्मकं स्वरूपानतिरेकि मन्तव्यम्। इतरस्य तस्मिन्नभावात्—"अष्टादशमहादोषै रहिता भगवत्तनुः। सर्वैश्वर्य्यमयी सत्यविज्ञानानन्दरूपिणी" इति स्मृतेः। महादोषाश्च ते—"मोहस्तन्द्रा भ्रमो रूक्षरसता काम उल्बणः। लोलता मद-

---

र्मूर्ध्नाऽघनुत्तये' इति ग्राह्यम्। ब्रह्मादिवन्द्यत्वेन तज्ज्ञानन्तु सर्वेषां व्रजौकसां तुल्यम्। किन्त्विति। तत्तज्ज्ञानान्यैश्वर्यमाधुर्यविषयाणि। युगपदिति। एकदाऽनेकज्ञानाऽसंभवादित्यर्थः। नन्वष्टावधानिनां युगपदनेकज्ञानं प्रतीतम्। तत्राह—तथैवेति। क्रमेण तत्तज्ज्ञानोदये सतीत्यर्थः। अष्टावधानेऽप्यन्तरालेऽतिसूक्ष्मः कालोऽस्त्येव, तदप्रतीतिस्त्वतिसौक्ष्म्यादित्याहुः। ननु माधुर्य्यज्ञानकाले तेषामैश्वर्य्यज्ञानं ध्वस्तमिति चेत्तत्राह—नापीति। पुंस्त्वादिवदिति ब्रह्मसूत्रम्। सुषुप्तौ सत एव ज्ञानस्य जागरेऽभिव्यक्तिः। यथा बाल्ये सत एव पुंस्त्वादेः कैशोरेऽभिव्यक्तिस्तद्वत्। अन्यथा क्लीबस्याऽपि तदापत्तिः॥

माधुर्य्यस्य ब्रह्मस्वरूपानुबन्धित्वात्तद्विषयकं ज्ञानं ब्रह्मज्ञानमित्युक्तम्। अथ माधुर्य्याङ्गभूतं मौग्ध्यादि तत्रोपपाद्यते-भगवतोऽपीत्यादिना। संमुग्धत्वमसर्वज्ञत्वम्। तादिति। श्रीदशमे शुकवाक्यम्। तदभिज्ञः शक्रपूजोद्यमविदिनि प्रततज्ञानत्वम्। प्रश्रयेति। संमुग्धत्वम्। नन्वेतत् संमुग्धत्वानुकरणे न तु संमुग्धत्वे प्रमाणमिति चेत्तत्राह—ततो वत्सानित्यादि। तच्चेति संमुग्धत्वम्। न चास्य स्वरूपानतिरेकित्वे स्वीकृते ब्रह्मस्वरूपमज्ञानशबलं

Digitization by Arya Samaj Charitable Foundation, Chennai

मात्सर्य्यं हिंसाखेदपरिश्रमाः ॥ असत्यं क्रोध आकाङ्-क्षा आशङ्का विश्वविभ्रमः। विषमत्वं परापेक्षा दोषा अष्टादशोदिताः" इति ॥ ६ ॥

ननु "ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान्। उभावपि वने कृष्णो विचिकाय समन्ततः" इत्यत्र मोहः, "क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्षितः। वृक्षमूलाश्रयः शेते गोपोत्सङ्गोपबर्हणः" इत्यत्र तन्द्राखेदश्रमाः, "तावङ्घ्रि-युग्मम्" इत्यादौ "मुग्धप्रभातवदुपेयतुरन्तिमात्रोः" इति भ्रमः, "वत्सान् मुञ्चन् क्वचिदसमये क्रोशसञ्जातहासः"

स्वीकृतमिति भ्रमितव्यं नखराचिकुराद्यङ्गवद्वैलक्षण्येनावभासमान-स्यापि तस्य ज्ञानत्वाविरहात्। इदमेव समर्थयन्नाह—इतरस्येति। तमोवृत्तेरज्ञानस्य ब्रह्मस्वरूपेऽसत्त्वादित्यर्थः। तत्र प्रमाणमष्टा-दशेति। वैष्णवतन्त्रे 'न यत्र माया किमुतापरे' इति 'मायापरे-त्यभिमुखे च विलज्जमाना' इत्यादिकञ्चात्रानुचिन्त्यम्। मो-हस्तन्द्रेति। विष्णुयामले। खेदः क्लेशः परिश्रम इन्द्रियशै-थिल्यम् ॥ ६ ॥

निरस्तान् दोषानापाद्य पुनः परिहरति—न त्वित्यादिना। 'ततो वत्सान्' इत्यादीनि 'क्वाप्यदृष्ट्वान्तः' इत्यन्तानि श्रीदशमवा-क्यानि। विचिकाय मृगयामास। ताविति। 'तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरं व्रजकर्दमेषु। तत्तादहृष्टमनसावनु-सृत्य लोकमुग्धप्रभातवदुपेयतुरन्तिमात्रोः' इति कृत्स्नं वाक्यम्।

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्यादौ लोलता, "मदविघूर्णितलोचनः ईषन्मानन्दुःखसुहृदां वनमाली" इत्यादौ मदः, "लोके श्रमानिनां मौढ्याद्धरिष्ये श्रीमदन्तम" इत्यादौ मात्सर्य्यं, हिंसा च पूतनादिवधः, "नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः" इत्यत्र जरासन्धछलादौ चासत्यं, क्रोधोऽपि तत्र तत्र प्रसिद्ध एव ॥ ७ ॥

"तां स्तन्यकाम आसाद्य मथ्नतीं जननीं हरिः । गृहीत्वा दधिमन्थानं न्यषेधत् प्रीतिमावहन्" इत्यत्राकाङ्क्षा, "क्वाप्यदृष्ट्वान्तर्विपिने वत्सान् पालांश्च त्रिश्ववित् । सर्वं विधिकृतं कृष्णः सहसावजगाम ह" इत्यत्राशङ्का, "सोऽकामयत बहु स्यां प्रजायेय" इत्यादौ

अत्रातस्मिंस्तद्धीलक्षणो भ्रमः । 'कश्चिदावां ग्रहीतुमायाति' इत्येवंलक्षणः लोकं जनमनुसृत्य वीक्ष्य लोलता चापल्यम् । मात्सर्य्यं परोत्कर्षासहनम् । नाहमित्यत्र हरेरसत्यभाषणं नास्ति मृदः पृथिव्यास्तद्गर्भे प्रागेव स्थितेरिति ये व्याचक्षते ते त्वपूर्वरसिका एव मागधछले खण्डितायां च प्रेयस्यां व्यभिचारात् ॥ ७ ॥

तामिति । आकाङ्क्षा क्षुधितस्य स्तन्यपानस्पृहा । क्वापीति । 'आशङ्का वितर्कः सः' इति तैत्तिरीयके । स परमात्मा । समोऽहमिति श्रीगीतासु । अहमिति । परापेक्षाऽन्याश्रयणम् । तानिति । संमुग्धत्वादीन् विना मुग्धताशङ्काभ्यामैश्वर्यसेविनां वितर्कविस्मयरसोदयः माधुर्य्यसेविनान्तु तत्प्रबोधनादिरसः लोलता-

Digitization by Arya Samaj Charitable Foundation, Chennai

जगदावेशरूपो विश्वविभ्रमः, "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" इत्यादौ वैषम्यं, "अहं भक्तपराधीनः" इत्यादौ परापेक्षा चावगम्यते। रूक्षरसताप्रेमसंबन्धादृते रागः उल्वणो दुःखहेतुः कामः तावेतौ मास्ताम्। ततश्च मोहादीनां प्रमाणसिद्धत्वान्निर्दोषतनुत्वं कथमिति चेन्न। भक्तानन्दवैचित्र्यपोषकलीलाविलासभक्तसंरक्षणतद्वात्सल्यादिसिद्धये प्राकृतगन्धास्पृष्टाः स्वरूपधर्मा एवैते उदयन्ते, तान् विना लीलाद्यसिद्धेः। तदसिद्धौ च पूर्णत्वानुपपत्तिः। इतरेषु च सर्वेषु गुणेषु स्वभावात्तद्भक्त्यनुपपत्तिश्च। ततश्च श्रद्धाभक्तिध्यानयोगादौ तात्यादौ श्रुतिव्याकोपापत्तिरिति। तेषां गुणत्वादेव निर्दोषपूर्णगुणेत्यादिस्मृतिः सङ्गच्छते ॥ ८ ॥

मदाभ्यां सवयसां नियुद्धादिक्रीडा सुभ्रुवां तु स्मराहववृद्धिः। तन्द्राखेदश्रमा भृत्यानां सेवानन्दविवर्द्धनास्तदिच्छाविशेषाः। मात्सर्यक्रोधहिंसाभिरसतां विनाशात्ताः सद्रक्षा एव। भ्रमलोलताभ्यां पितृवर्गकौतुकाभिवृद्धिः। असत्येन क्वचित् सवयसां सुभ्रुवां च कोपोदयेन तत्तद्रसाभिवृद्धिः। विश्वविभ्रमेण प्रकृतिलीनजीवमात्रानुग्रहः। विषमत्वपरापेक्षाकाङ्क्षाभिः सर्वभक्तानुग्रह इति भाव्यम्। इतरेषु सार्वज्ञ्यादिषु। गुणेषु तेषां संमुग्धत्वादीनाम् ॥ ८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

त एते मौग्ध्यादयः स्वरूपशक्तिसारभूतलीलानन्दात्मका एव स्वरूपानतिरेकिनखरकुन्तलादिवत्तस्मिन्मन्तव्याः । "क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसम्भवाः । क्व चाखण्डितविज्ञानज्ञानैश्वर्य्यः सुरेडित" इत्यत्र येऽज्ञसम्भवास्ते केत्युक्तेर्विज्ञसम्भवास्ते सन्तीति मतत्वात् । "तत्स्मारितानन्तहृताखिलेन्द्रियः" इत्यादौ विध्वस्ततमसां श्रीशुकादीनां च भगवत्प्रेममोहो दृष्टः॥९॥

"गोप्याददे त्वयि कृतागसि दाम यावद्यान्ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षं । वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति," "मन्त्रेषु मां वा उपहूय यत्त्वमकुण्ठिताखण्डसदात्मबोधः । पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्मे मनो मोहयतीव

दार्ढ्यायोक्तमर्थं विशदयति–त एत इति । क्वेति । श्रीदशमे शुकवाक्यम् । विज्ञेष्वपि मोहः क्व दृष्ट इति पृच्छायां तेषु तं दर्शयति–तदिति । श्रीदशमे सूतोक्तिः । तेन परीक्षिता स्मारितो योऽनन्तः श्रीकृष्णस्तेन हृतान्यखिलानीन्द्रियाणि यस्य स श्रीशुकस्तत्प्रेमसंमुग्ध इत्यर्थः ॥ ९ ॥

'गोप्याददे' इति प्रथमे कुन्तीवाक्यम् । गोपी व्रजेश्वरी तन्माता वक्त्रं निनीय अधः कृत्वा मामियन्ताडयेदिति भयभावनया स्थितस्य वेत्यन्यत् प्रकटार्थम् । मन्त्रेष्वित्युद्धवोक्तिस्तृतीये । मामुपहूयाकार्य्य । इहेवशब्दौ वाक्यालङ्कारार्थौ । किमिव निरागसि

Digitization by Arya Samaj Charitable Foundation, Chennai

देवः" इत्यादिषु तत्त्वविदामपि श्रीकुन्त्युद्धवादीनां मोहदर्शनान्नानुकृतिरूपास्ते श्रीशुकादिभिराविश्योक्तत्वाच्च। लोकविडम्बनादिशब्दास्त्वत्र दिव्यलीलया लोकाचारातिक्रमात् सङ्गच्छन्ते ॥१०॥

तदेवं मौग्ध्यसार्वज्ञ्ययोर्गुणयोः सहाविर्भावात् स्वसेवकार्तिस्तुतिपरिचर्य्याद्यवधानमपि सिद्धम्। एवं चोक्तमनुभवितृभिः "सर्वज्ञत्वे च मौग्ध्ये च सार्वभौममिदं महः। निर्विशन्नयनं हन्त निर्वाणपदमश्नुते" इति विरुद्धानां गुणानां सहावस्थितिः स्मर्य्यते। "ऐश्वर्य्ययोगाद्

मयि कुप्यसीत्यादिवत्। न च मुग्ध इव तु मुग्धः मोहयतीव न तु मोहयतीति व्याख्येयम्। तथा सति विरोधाभावात्। "कर्माण्यनीहस्य भवो भवस्य ते" इत्यादिषु विरुद्धेषु तद्वाक्योपादानवैयर्थ्याच्चु कुन्तीवाक्ये इवशब्दाभावाच्च। ते मोहादयः षोडश। लोकाचारेति। लोकचरितन्यक्कारादित्यर्थः॥१०॥

ननु हरेर्मौग्ध्येन तत्तद्रसासिद्धिः स्यात किन्तु दीनाभ्यर्थनाऽनङ्गीकारेण प्रतीतेन विक्षतिरिति चेत्तत्राह—तदेवमिति। मौग्ध्यकाल एव सार्वज्ञ्यमस्तीति न क्षतिलेश इति भावः। अत उक्तं तदभिज्ञोऽपीति। विज्ञानुभवमत्र प्रमाणयति—एवञ्चोक्तमिति। अनुभावितृभिस्तस्य मौग्ध्यसार्वज्ञ्ये विजानद्भिर्लीलाशुकैः। सर्वज्ञत्वे चेति। सर्वासु भूमिषु विदितं सार्वभौमं तदुभयधर्मशालित्वेन सर्वत्र ख्यातामित्यर्थः। महः स्वप्रकाशरूपं कृष्णा-

Digitization by Arya Samaj Charitable Foundation, Chennai

भगवान् विरूद्धार्थो ऽभिधीयते । तथापि दोषाः परमे नैवाहार्य्याः कथञ्चन । गुणा विरूद्धा अप्येते समाहार्य्याः समन्ततः” इति । तदिदमभिहितं भगवता सूत्रकारेण “सर्वधर्मोपपत्तेश्च” इति । परमेश्वरः खलु शब्दैकनिर्णेययाथात्म्यो भवति न तु तर्कैस्तत्र प्रतिविधानं युज्यते इति चोक्तं “श्रुतेस्तु शब्दमूलत्वात्”इति ॥११॥

अन्ये त्वेवमाहुः—मौग्ध्यादयः प्रपञ्चधर्मा भगवताऽनुक्रियन्ते स्वजनानन्दाय । “प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले । प्रपन्नजनतानन्दसन्दोहं प्रभो”

ख्यं वस्तु । निर्वाणपदं मोक्षस्थानं गोकुलाख्यमश्नुते । स्वभोग्यत्वेनाऽनुभवता तत् स्वामि तादित्यर्थः । स्वरूपे शावल्यापत्तिस्तु पूर्वोक्तैर्निरस्या । आर्षं प्रमाणमाह—ऐश्वर्य्येति कौर्मे । अचिन्त्यस्वशक्तित इत्यर्थः । एवं श्रीव्यासनिर्णयमाह—सर्वेति । सर्वेषां विभुत्वमध्यमत्वादीनां मिथो विरूद्धानां गुणानां ब्रह्मण्युपपत्तेः । सिद्धेराविषमेऽपि तस्मिन् भक्तपक्षपातलक्षणं वैषम्यं मन्तव्यामिति प्राकरणिकोऽर्थः । न त्वेवं स्याद्वादापत्तिः । मैवं, तद्वादे सर्वेऽर्थाः कथञ्चित्त्वेनाऽनिश्चितरूपा, इह तु निश्चितरूपा इत्यातिविशेषसत्त्वात ॥ ११ ॥

सङ्गत्यन्तरमाह—अन्ये त्विति । प्रपञ्चमिति । ब्रह्मवाक्यं श्रीदशमे । विडम्बयस्यनुकरोषि । प्रपन्नेति । अस्या असङ्कोचेन मत्से-

Digitization by Arya Samaj Charitable Foundation, Chennai

इत्यादिस्मृतेः । तथाऽपि तत्त्वविदा स्वस्य च तै रसोदयः स्यात् । लवणाकरनिपातन्यायात्ततकृतत्वेन तेष्वाचिन्त्यत्वप्राप्तेः । श्रीबलप्रद्युम्नादिरूपेण शिष्यत्वभृत्यत्वपुत्रत्वाद्यनुकारो हि दृष्टः । देवर्षिभक्त्याद्यनुकारश्चेति ॥१२॥

तदेवमैश्वर्यमाधुर्यविषयत्वेन भगवतो ज्ञानं द्विविधं दर्शितम् । तेन तद्द्वारिकाया भक्तेश्च द्वैविध्येन भाव्यम् । तत्राद्या विधिभक्तिः । तया सिद्धाः संनिष्ठा दृष्टाश्चाऽर्चिरादिवर्त्मना परं पदं लभन्ते । 'तेऽर्चिषम्' इत्यादिश्रुतेः । ये त्वार्त्तास्तदतिकृपार्द्रास्ते खलु भगवतैव तार्क्ष्यवाहनेन तद्विशन्तीति मन्तव्यं वाराहचरमात् । यथाह— भूदेवीं प्रति भगवान् वराहदेवः— "सोऽहमाश्रिततन्त्रात्मा स्मरामि च तदाश्रयम् । ज्ञानवैराग्यभक्त्यादिक्रियारूपप्रकाशनात् ॥ नयामि परमं

वने सुखवृद्धिः स्यादिति भावेनेति भावः । तेष्विति । स्वरूपनिष्ठधर्मवत्तेऽप्यचिन्त्याः स्युरिति भावः । श्रीति । श्रीश्च बलश्च प्रद्युम्नश्च तदादिरूपत्वेनेत्यर्थः । शिष्यत्वेत्यादौ क्रमो बोध्यः ॥ १२ ॥

प्रकरणार्थं योजयति—तदेवमिति । एतानिति । हरिं विना

Digitization by Arya Samaj Charitable Foundation, Chennai

स्थानमर्चिरादिगतिं विना ॥ गरुडस्कन्धमारोप्य यथेष्टमनिवारितः" ॥ इति ।

एतानुद्दिश्याह पार्थसारथिः—"ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात् । भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्" ॥ १३ ॥

अन्तिमा रुचिभक्तिः । तया सिद्धास्तु स्वयं भगवतैव तद्विशन्तीति तद्वरमादिलब्धकैमुत्यादभ्युपेयम् । "नाऽयं सुखापः" इत्यादेश्च । एते तु तस्याऽतिप्रेष्ठाः । तद्भावेषु तद्रुचिनिर्भरात् । यदाह गोवर्धनोद्धरणविस्मितैर्गोपैर्देवादिभावेनाऽऽशङ्कितो भगवान् श्रीविष्णुपुराणे—"मत्सम्बन्धेन वो गोपा यदि लज्जा न जायते । श्लाघ्यो वाऽहं ततः किं वो विचारेण प्रयोजनम् ॥ यदि वोऽस्ति

क्षणमात्रं स्थातुमशक्तानार्त्तानित्यर्थः । ये त्विति श्रीगीतासु । मयि मदर्थमित्यर्थः । उपासते कीर्तनादिभिरनुकूलयन्ति न चिरात्त्वरयैव समुद्धर्ताऽहं भवामि ॥ १३ ॥

अन्तिमेति । एते रुचिभक्ताः । आशाङ्कितोऽवितार्कितः । शङ्का चेयं हरेरिव गोपानामप्यात्मधर्मत्वात्प्राज्ञत्वं प्रसञ्जयति । वक्ष्य-

Digitization by Arya Samaj Charitable Foundation, Chennai

मयि प्रीतिः श्लाघ्योऽहं भवतां यदि। तदात्मबन्धुसदृशी बुद्धिर्वः क्रियतां मयि ॥ नाऽहं देवो न गन्धर्वो न यक्षो न च राक्षसः। अहं वो बान्धवो जातो नाऽतश्चिन्त्यमतोऽन्यथा'' ॥ इति। न चाऽत्र हृत्कम्पहेतोः सम्भ्रमस्योदयान्माधुर्य्यभावक्षतिः "देवो वा दानवो वा त्वं यक्षो गन्धर्व एव वा। किं वाऽस्माकं विचारेण बान्धवोऽसि नमोऽस्तु ते ॥" इति बन्धुभावस्यैव तैः स्थापनात्। तस्मात्तद्भावं तन्मुखाच्छ्रोतुं तेषां तथा शङ्कोत्थापनमिति ज्ञायते ॥ १४ ॥

ति चैवम्। तस्मात्तद्भावमित्यादि। मदिति श्रीकृष्णवाक्यम्। हे गोपाः। प्रीतिः पुत्रत्वादिप्रकारिका। आत्मबन्धुसदृशीति। स्वपुत्रादिषु यथा बुद्धिस्तथा मयि क्रियताम्। बान्धवो ज्ञातिः। 'सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः' इत्यमरः। श्रीहरिवंशेऽप्येवमास्ति। 'देवो वा दानवो वा त्वं यक्षो गन्धर्व एव च। अस्माकं बान्धवो जातो योऽसि सोऽसि नमोऽस्तु ते ॥' इति गोपानां वाक्यम्। 'मन्यन्ते मां यथा सर्वे भवन्तो भीमविक्रमाः। तथाऽहं नाऽवमन्तव्यः सजातीयोऽस्मि बान्धवः।' इति कृष्णस्य च। तस्मादिति। तन्मुखात् कृष्णास्यात्। अत्र स्वयं तद्बन्धुभावाऽभ्यर्थनात्तद्घटितेषु नन्दात्मजादिनामसु तदभिरुचिस्तानि कीर्तयत्सु तदातिप्रसादश्च गम्यते ॥ १४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

ननु कृष्णस्य भगवतो यशोदौरसपुत्रत्वे तस्मिन् वल्लवानां सगोत्रत्वलक्षणो बन्धुभावः स्यात्। न चाऽसौ तदौरसस्तथानुक्तेः, भावबन्धुस्तु भवेत् "ये यथा माम्" इत्यादितद्वाक्यात्। "नन्दात्मजो गोपिकासुतः" इत्यादिवाक्यं तूपगूह्यात्मजामित्यादिवदौपचारिकात्मजत्वपरं भावीति चेत्। मैवमेतत्। "निशीथे तमउद्भूते जायमाने जनार्द्दने। देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः॥ आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः" इत्यत्र "यशोदा नन्दपत्नी च जातं परमबुध्यत। न तल्लिङ्गं परिश्रान्ता निद्रयाऽपगतस्मृतिः" इत्यत्र च श्रीशुकेनैव तदौरसत्वस्योक्तेः यशोदाऽपि देवकीत्युच्यते। "द्वे नाम्नी नन्दभार्याया यशोदा देवकीति च" इत्यादि-

---

व्रजौकसां बन्धुभावभाविता कृष्णे भक्तिर्या रागात्मिकेत्यभिधीयते। यत्र तस्य रुचिनिर्भर उक्तः। तत्र शङ्कते—न न्विति। असौ कृष्णः। तर्हि नन्दात्मजादिपदानि कथमर्थवन्ति स्युस्तत्राह—उपगूह्येति। यशोदात्मजायां देव्यां यथा देवक्यात्मजत्वं औपचारिकमुक्तं तथा भविष्यति। तस्माज्जन्मप्रकरणे यशोदौरसत्वं नोपलभ्यते इति चेन्नैवम्। तत्प्रकरणेऽपि तत्त्वं पठितमिति हेतुभावेनाह—निशीथेत्यादि। तम उद्भूतेऽन्धकारव्याप्ते निशीथे जनार्दने लीलापुरुषोत्तमे देवक्यां यशोदायां जा-

Digitization by Arya Samaj Charitable Foundation, Chennai

पुराणवचनात्। देवरूपिण्यामित्युक्तेस्तद्गर्भसम्बन्धोऽपि न दोषावहः। वसुदेवपत्नीव नन्दपत्नी च परं परेशमेवं स्वगर्भाज्जातमबुध्यत। तस्य वसुदेवागमादेर्लिङ्गं चिन्हं नाऽबुध्यत। यतः परीत्यादि। "नन्दगोपगृहे जातो यशोदागर्भसम्भवः" इत्यादि पुराणे स्फुटमुक्तेश्च। इत्थञ्च नन्दात्मजगोपिकासुतादिशब्दैर्मुख्यार्थैर्भाव्यम्। ननु स्फुटार्थप्रत्ययो विरुद्धः स्यात्। मैवम्। यशोदासुतेन सह देवकीसुतस्यैक्यात्तदेकस्य तस्य मथुरादिषु गमनादन्तरान्तरा व्रजे कुरुक्षेत्रे चागतेः स्फुटार्थस्याऽप्यभङ्गात्। तथा चोभ-

---

यमाने सति देवक्यां देवकसुतायां विष्णुराविरासीदिति योज्यम्। तद्गर्भेति। न हि सुराभिणि रत्नमन्दिरे स्थितो नृपतिरपुरुषार्थी स्यादिति भावः। इत्थञ्चेत्यादि। उपगूह्यात्मजामिति मुनिनानूक्तम्। स्वपुत्रं गोपितुं सुतैव मेऽभून्न तु सुत इति देवक्या उक्तम्। उभयथेति। सगोत्रत्वेन भावेन च स कृष्णस्तद्बन्धुः। प्रपञ्चान्तर्गते धाम्नि यशोदादिभिः सार्धमेष मातृपुत्रादिभावो लोकवत् पूर्वोत्तरभावेनैव स्थितः। प्रपञ्चातीते तस्मिंस्तु 'ॐ कृष्णाय देवकीनन्दनाय' इत्यादिके 'गोपगोपीगवावीतम्' इत्यादिके च मन्त्रे यस्तद्भावः पठ्यते स त्वलौकिकश्चन्द्रकादिगतनानावर्णवदनादिवर्णवदनादितो युगपत् सिद्धः पद-

Digitization by Arya Samaj Charitable Foundation, Chennai

यथापि तद्बन्धुः सः ॥ १५ ॥

तदेवं द्विविधज्ञानभक्तिगोचरः कृष्णाभिधानः पुरुषोत्तमः कृत्स्नशक्तिव्यञ्जी स्वयं भगवानुच्यते । अकृत्स्नतद्व्यञ्जी ह्येकतद्व्यञ्जी च विलासोंऽशः कला चेति "एते चांशकलाः पुसः कृष्णस्तु भगवान् स्वयम्" "अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल" इत्यादिस्मृतेः। ननु यस्य पुंसो मत्स्यादयोंऽशकलाः स पुमानेव कृत्स्नशक्तिप्रकाशी कृष्ण इत्यर्थप्रत्ययान्नोक्तव्यवस्थेति चेत् । मैवम् । भिन्नोपक्रमार्थकात्तुशब्दात् ब्रह्मसंहितायां कृष्णरूपं प्रकृत्य तयाणां पुरुषाणां रामादीनां च

मकोरकलघुबृहत्पत्रचयवच्च बोध्यः ॥ १५ ॥

अथ यशोदौरस्यस्य कृष्णस्य सर्वतदाविर्भावमूलत्वरूपं स्वयं भगवत्त्वं वक्तुं प्रकरणमारभते—तदेवमिति । एवमुक्तविधया । अकृत्स्नतदिति । तच्छब्देन शक्तिः परामृश्यते । एते चेति प्रथमे सूतवाक्यम् । पुंसो गर्भोदकशायिनः प्रद्युम्नस्य सहस्रशीर्ष्णः । कृष्णस्त्विति । तुशब्दः पृथगुपक्रमार्थः । 'तु स्याद् भेदेऽवधारणे' इत्यमरः । गर्भोदशयादाविर्भवत्सु मत्स्यादिषु मध्ये कृष्णः पठितस्तथाऽपि न स तदवतारः किन्तु तदादिसर्वमूलभूत इत्यर्थः । अष्टमस्त्विति नवमे । तयोर्देवकीवसुदेवयोः स्वयमेव हरिरासीत् । नन्विति । यस्य गर्भोदकशयस्य पुंसः । ईश्वर इति । कृष्ण इति विशेष्यम् । स कीदृशः । परम ईश्वरः

Digitization by Arya Samaj Charitable Foundation, Chennai

तदवतारत्वोक्तेश्च । तथा हि "ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः । अनादिरादिर्गोविन्दः सर्वकारणकारणम् । सहस्रपत्रं कमलं गोकुलाख्यं महत्पदम् । तत्कर्णिकारं तद्धाम तदनन्तांशसम्भवम्" इत्यादिकमुक्त्वा "यः कारणार्णवजले भजति स्म योगनिद्रामनन्तजगदण्डसरोमकूपः । आधारशक्तिमवलम्ब्य परां स्वमूर्तिं गोविन्दमादिपुरुषं तमहं भजामि" "यस्यैकनिश्वसितकाल-

---

स्वयं भगवान् अतोऽनादिः स्वेतरेषां विरिञ्चादीनां त्वादिः । नन्वन्येषां प्रधानादीनाञ्च कारणत्वं पठ्यते तत्राह—सर्वेति । सहस्रेति । अनन्तस्य श्रीबलदेवस्यांशेन सम्भवः सर्वदाविर्भावो यस्य तत् । तन्त्रेण अनन्तः शेषोंऽशो यस्य सोऽनन्तांशो बलभद्रस्तस्य सम्भवो निवासो यत्र तत् ।

कृष्णस्यैव कारणोदशायित्वमाह—य इति । यः कृष्णः कारणार्णवजले आधारशक्तिमयीं परामुत्कृष्टां स्वमूर्तिं शेषाख्यामवलम्ब्य योगनिद्राम्भजति । य एवांशेन प्रकृत्यन्तर्यामी सहस्रशीर्षा सङ्कर्षण इत्यर्थः । कीदृशो यः । अनन्तजगदण्डैः सहिता रोमकूपा यस्य सः । सहशब्दस्य पूर्वनिपाताभाव आर्षः । तं भजामीत्यन्वयः । कीदृशमित्याह—गोविन्दं गवामिन्द्रमित्यर्थः । अथ गर्भोदशायितामाह—यस्येति । यस्यैकनिश्वसितं कालमालम्ब्य जगदण्डनाथा ब्रह्मविष्णुशिवा जीवन्ति तत्तदधिकारितया जगति प्रकटं तिष्ठन्ति स महाविष्णुर्यस्य कृष्णस्य क-

Digitization by Arya Samaj Charitable Foundation, Chennai

मथाऽवलम्ब्य जीवन्ति रोमविलजा जगदण्डनाथाः।
विष्णुर्महान् स इह यस्य कलाविशेषो गोविन्दम्'' इत्यादि।
''दीपार्चिरेव हि दशान्तरमभ्युपेत्य दीपायते विवृतहेतुसमानधर्मा। यस्तादृगेव हि च विष्णुतयाऽवभाति गोविन्दम्'' इत्यादि च। ''रामादिमूर्तिषु कलानियमेन तिष्ठन्नानावतारमकरोद् भुवनेषु किन्तु। कृष्णः स्वयं समभवत्परमः पुमान् यो गोविन्दम्'' इत्यादि च॥ १६॥

लाविशेषो भवति। योंऽशेन सर्वब्रह्माण्डान्तर्यामी ब्रह्मणः पिता प्रद्युम्नो भवतीत्यर्थः। अथ क्षीरोदशायितामाह—दीपार्चिरिति। महादीपो यथा दशान्तरमन्यां वर्त्तिमुपेत्य दीपायतेऽतिनिर्मलसूक्ष्मदीपत्वेनाऽऽविर्भवति। कीदृशः विवृतः प्रकाटितो हेतुसमानो महादीपवत् प्रकाशलक्षणो धर्मो येन सः यो गोविन्दस्तादृगेव विष्णुतया ऽवभाति। योंऽशेन क्षीराब्धिपतिरनिरुद्धो जगत्पालक इत्यर्थः। अथ कृष्णस्यैव रघुनाथादिरूपतामाह—रामादीति। यः कृष्णाख्यः परमः पुमान् कलानियमेन तत्र नियतानामेव शक्तीनां प्रकटनेन रामादिमूर्त्तिषु तिष्ठंस्तत्तन्मूर्तीः प्रकटयन् भुवनेषु नानावतारमकरोत्। य एव च स्वयं सर्वशक्तिमान् सन् समभवदवातरत्तमित्यादि प्राग्वत्। एवमुक्तं देवैः 'मत्स्याश्च कच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः। त्वम्पासि नस्त्रिभुवनं च तथाऽधुनेश भारं भुवो हर यदूत्तम वन्दनन्ते' ॥ १६॥

Digitization by Arya Samaj Charitable Foundation, Chennai

नन्वस्तु कृष्णः पुरुषाद्यवताराणामवतारी । तदवतारी तु परमव्योमाधिपतिरस्तु तस्य कुत्राप्यवतारत्वानुक्तेश्चेति चेत् । मैवमेतत् । तस्यामेव "गोलोकनाम्नि निजधाम्नि तले च तस्य देवीमहेशहरिधामसु तेषु तेषु । ते ते प्रभावनिचया विहिताश्च येन गोविन्दम्" इति तस्यापि कृष्णाविर्भावत्वाभिधानात् । "सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत्फलम् । एकावृत्त्या तु कृष्णस्य नामैकं तत् प्रयच्छति" इति ब्रह्माण्डे सर्वोर्ध्वनाममाहात्म्याच्च

उक्तमर्थं स्वीकृत्याऽऽशङ्कते—नन्विति । तस्य परमव्योमाधिपतेः । कुत्रापीति । वेदे पुराणे वेत्यर्थः । तस्यामिति । ब्रह्मसंहितायामेव । प्रपञ्चगतं महिमानमुक्त्वाऽथ निजधामगतं तमाह—गोलोकेति । देवीमहेशेत्यादिगणनं व्युत्क्रमेण बोध्यम् । देव्यादीनां यथोत्तरं ऊर्ध्वोर्ध्वत्वेन प्रभाववत्त्वात् । अधोधः स्थितेषु हरिमहेशदेवीधामस्वित्यर्थः । तथा च कृष्णो नारायणः सन् परमे व्योम्नि सर्वदा दीव्यतीति स तस्याविर्भाव इति स्फुटमेवोक्तम् । सहस्रेति । वैशम्पायनोक्तानां सहस्रनाम्नां त्रिरावृत्त्या यत् फलं तत् कृष्णस्यैकं नाम । ब्रह्माण्डपुराणान्तवर्त्त्यष्टोत्तरशतनामगतं कृष्णावतारसम्बन्ध्येकमेव नामैकावृत्त्या प्रयच्छतीत्यर्थः । तेषु सर्वस्वाविर्भावत्वविशिष्टस्य कृष्णस्य नामान्युक्तानीह तु कृष्णत्वेनैव विशिष्टस्येति विशेषः । तद्‌गतादेतद्‌गतं तदेव नाम बहुफलं भगवद्व्याख्यान्तराद् भगवद्गीतावादित्याहुः । अधिकगुणत्वादेवेत्यर्थः । यदिति । कालीयस्त्रीवाक्यम् । यस्य त्वदङ्घ्रिरेणुस्पर्शस्य वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

कृष्णस्यैव सर्व्वावतारित्वम् । अत एव "यद्वाञ्छया श्रीर्ल्ललनाऽचरत्तपो विहाय कामान् सुचिरं धृतव्रता" इति तन्महिष्याः श्रीदेव्या नित्यानुभूतस्वपतिकाया अपि कृष्णरूपस्पृहोक्ता सङ्गच्छते ॥ १७ ॥

इदन्तु बोध्यम् । गोलोके निवसन् कृष्णस्तदाविर्भावे परमव्योम्नि तदधिपतिः श्रीनिवासः पुरुषाभिधानो रामादिश्चाऽनादित एवाविर्भूतो दीव्यति । पुरुषादिः प्रपञ्चसम्बन्धेन कदा कदाचिद्भवेत्तदधिपतिस्तु तत्सम्बन्धेन न कदाचिदपीति तस्य तस्य चावतारत्वानवतारत्वव्यपदेशः । तत्सम्बन्धादेव कृष्णस्यापि तदुक्तिरिति ।

ञ्छया श्रीः परव्योमाधीश्वरी । एवमेव पुराणे कथास्तीति सङ्क्षिप्तभागवतामृते द्रष्टव्यम् । अत्र परव्योमाधीशावतारित्वाभिधानात् । कृष्णवासुदेवव्यूहावतारत्वं स्वयमेव निरस्तमतस्तन्न परीक्षितमिति वेदितव्यम् ॥ १७ ॥

उक्तेऽर्थे काञ्चिद्विशेषमाह—इदन्तु बोध्यमित्यादिना । पुरुषादिरित्यत्रादिपदाद्रामादिर्ग्राह्यः । तस्य तस्य चेति । तस्य पुरुषादेः तस्य च परमव्योमाधिपतेरित्यर्थः । तत्सम्बन्धात् प्रपञ्चे समागमात् स्वयं रूपस्यापि कृष्णस्य तदुक्तिरवतारत्वभणितिरित्यर्थः। अप्राकृताल्लोकात् प्राकृते लोकेऽवतरन् ह्यवतारः । तदेवमिति । कृत्स्नशक्तिप्रकाशः परव्योमाधिपेऽप्यस्तीत्यत आह—अनन्येति । एतत् सर्वमूल इति । तथातथाभावं सर्वदुःखहरत्वादीति। धर्मं तद-

Digitization by Arya Samaj Charitable Foundation, Chennai

पुरुषाद्यवताराणां परमव्योमनिलयत्वन्तु "वैकुण्ठभुवने नित्ये निवसन्ति महोज्ज्वलाः । अवताराः सदा तत्र मत्स्यकूर्मादयोऽखिलाः" इति पाद्मात् । तदेवं कृत्स्नशक्तिप्रकाशादनन्यापेक्षिरूपत्वाच्च कृष्णस्य स्वयं भगवत्त्वमिति श्रीभागवतब्रह्मसंहितादिशास्त्रदृष्ट्या निर्णीतम् । एतत् सर्वमूले श्रीगोपालोपनिषदि चैवमेव परिदृष्टम् । तत्र हि 'कः परमो देवः' इत्यादिना सर्वदुःखहरं सर्वहेतुः परदैवतं किमिति मुनिभिः पृष्टो ब्रह्मा कृष्णस्यैव तथातथाभावमभिधाय परमव्योमाधीशकारणोदशयादेश्च तदभिधानात कथं कृष्णस्यैव स इत्याशङ्कायाम् 'एकोऽपि सन् बहुधा योऽवभाति' इति तस्यैव तदधीशादिभावमभ्यधात । श्रीगीतासु च "मत्तः परतरं नान्यत्" इति ॥१८॥

यत्तु "पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवाऽवशिष्यते" इति श्रुत्या "सर्वे नित्याः

भिधानात् । शास्त्रे सर्वदुःखहरत्वादिधर्मकीर्तनात् । स तथातथाभावः । तदधीशादिभावं परव्योमाधिपत्वादिधर्मम् । आदिना पुरुषत्वादिर्ग्राह्यः ॥ १८ ॥

संशयान्तरं निरस्य तूक्तमर्थं दृष्टान्तेन ग्राहयति—यत्त्वित्यादिना । पूर्णमिति बृहदारण्यके । अदो मूलरूपं इदं प्रकाशरूपं उभयं पूर्णम् । पूर्णान्मूलरूपात् पूर्णं प्रकाशरूपमुदच्यते प्रादु-

Digitization by Arya Samaj Charitable Foundation, Chennai

शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचिद् ॥ परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वतः । सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः॥" इति महावाराहोक्त्या च सर्वेषां स्वरूपाणां पूर्णत्वप्रत्ययात् कतमदनन्यापेक्षि स्वयं रूपमिति न शक्यं निश्चेतुमिति कश्चिदाह । तदपेशलम्, स्वरूपभेदे सत्यस्याः शङ्कायाः प्रवृत्तेः । न चात्र तद्भेदः । एक एव कृष्णः परेशो वैदूर्यवदात्मनि नानारूपाभिव्यञ्जी । "एको वशी सर्वगःकृष्ण ईड्यः" "एकोऽपि सन् बहुधा योऽवभाति" इत्यादिश्रुतेः । यथैकस्यैव षट्शास्त्रज्ञस्य विदुषः क्वचित् कृत्स्नशास्त्रोद्ग्राहिणः सर्वज्ञत्वं प्रतीयते क्वचिदकृत्स्नतद्ग्राहिणो ह्येकतदुद्ग्राहिणश्च सर्वज्ञकल्पत्वं ज्ञत्वं चेत्येवमेकस्य कृष्णस्य बह्वल्पशक्तिव्यक्तिसव्यपेक्षाण्यंशित्वांशत्वादीनि । एवमेवोक्तं वृद्धैः । "एकत्वं च पृथक्त्वं च तथांशत्वमुतांशिता । तस्मिन्नेकत्र नायुक्तमचिन्त्यानन्तशक्तितः ॥ शक्तेर्व्यक्तिस्तथाऽव्यक्तिस्तारतम्यस्य कारणम्" इति । स्वेच्छया नानाशक्तिप्रकाशित्वमांशित्वम् । तस्यैव सर्वदाऽ-

---

र्भवति । पूर्णस्य तस्य पूर्णं रूपमादाय स्वस्मिन्नन्तर्भाव्य पूर्णं मूलरूपमवशिष्यते तिष्ठति । सर्वे इति नित्याः सनातनाः शाश्व-

Digitization by Arya Samaj Charitable Foundation, Chennai

रूपशक्तिप्रकाशित्वमंशत्वम् ॥ १९ ॥

एतेन परमव्योमाधिपादिरूपोऽपि सन् कृष्णः सर्वान् गुणान् प्रकाशयेत् तत्रापि गुणपूर्णत्वादिति निरस्तम्। यत्त्वथर्वशिरसि पुरुषावतारात् "अथ पुरुषो ह वै नारायणोऽकामयत्" इत्यादिना विश्वसृष्टिमुक्त्वा ब्रह्मणो देवकीपुत्र इति तस्यैव कृष्णत्वमुक्तमिति कश्चिद् बभ्राम, तच्च प्रत्युक्तम्। तत् केशवत्वन्तु सुदूरापास्तम् उक्तनिर्णया-

---

ता जगति पुनः पुनराविर्भाविनः स्वनिर्णीते स्वपूर्वेषां संमतिमाह—एवमेवेति। वृद्धैः श्रीरूपचरणैः। तस्मिन्निति। एकस्मिन्नेव तस्मिन् कृष्णे। स्फुटमन्यत्॥ १९ ॥

उक्तेनैवार्थेन सन्देहान्तराणाञ्च छेदोऽभूदित्याह—एतेनेति। यत्त्वथर्वेति। पुरुषावताराद् गर्भोदकशयात्। तथा च स पुरुषः कृष्ण एवोत्तरत्र व्यक्तेः। ततो ब्रह्मादिजनिस्तु तदभेदादेव मन्तव्या, अन्यथा स्मृतार्थविरोधापत्तिः। क्षीराब्धिपतेः कृष्णत्वोक्तिस्तु रभसादेवेत्याह—तत् केशवत्वं त्विति। देवैः क्षीराब्धिपतिः शुक्लनीलौ केशावुद्ववर्ह तावेव चलकेशवौ भूत्वा भूभारमपजह्तुरिति भारतवाक्यार्थं यत् केचिदूचुस्तत्प्रमादादेवोक्तनिर्णयात्। किन्त्वेवं तदर्थः। केशशब्दस्तत्रांशवो 'ये प्रकाशन्ते ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तमाः' इति नारायणीये कृष्णवाक्यात्। नानावर्णानां तदंशूनां तत्र नारदेन दृष्टत्वाच्च। अतस्तत्र सर्वत्र केशशब्द एवं प्रयुक्तः। तथा च स्वयं भगवति कृष्णे बलदेवे च तद्व्यूहे स तदा स्वांशुभ्यामनुजगा-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्"नारायणाङ्गं नरभूजलायनात्" इति स्मृतेश्च। किन्तु कृष्णस्यैव पुरुषावतारत्वं तत्रोक्तमिति सुष्ठु। अन्यथोक्ता-

---

येति। स्वयं भगवत्यवतरति सर्वे तद्विलासव्यूहस्वांशास्तमशंरैनुगच्छन्तीत्युक्तं तृतीये। 'स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्थ्यमानेष्वनुकम्पितात्मा। परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान् यथाग्निः' इति। न च देवैरभ्यर्थितः पुरुषः 'अहमेव कृष्णो भविष्यामि'इत्युक्तवानपि तु 'ईश्वरेश्वरः परः पुरुषो जनिष्यते' इत्यवोचदिति श्रीदशमप्रस्तावाच्च। 'नारायणोऽङ्गम्'इति ब्रह्मवाक्यं श्रीदशमे। हे कृष्ण नरभूजलायनात् कारणार्णवशयात् प्रकटो यो नारायणोऽस्मत्पिता गर्भोदकशयः स तवाङ्गमंश इति तदर्थः। कश्चित्त्वत्रैवं समाधत्ते। प्रतीतो वार्थोऽस्तु। तत्र फेनमुष्टावशनिरिव तत्तत्कुन्तले स्वयं हरिः प्रविष्टः। अन्यथा कृष्णस्तु भगवान् स्वयमिति व्याकुप्येदिति। अन्यथेति। निर्णीतार्थास्वीकारे शास्त्रोक्तानामर्थानां वैपरीत्यं स्यात्। कृष्णाविर्भावे परव्योमनाथे कृत्स्नकृष्णगुणप्राकट्येऽङ्गीकृते तत्पत्न्याः श्रीदेव्याः कृष्णाङ्घ्रिरेणुस्पृहा भागवतोक्ता त्रिषु पुरुषेषु तत्प्राकट्येऽङ्गीकृते तेषां कृष्णांशता ब्रह्मसंहितोक्ता। श्री दाशरथौ तत्प्राकट्येऽङ्गीकृते दृष्टदाशरथीनां दण्डकारण्यनिवासिनां महर्षीणां कृष्णस्पृहा पाद्मोक्ता दाशरथ्यादिषु कलानियमेन स्थितिश्च ब्रह्मसंहितोक्ता व्याकुप्येत्। इत्थमेव वासुदेवे सङ्कर्षणस्य स्वाधिपत्वधीर्बहुमानश्च श्रीकृष्णे बलदेवस्य भर्तृत्वधीः प्रद्युम्नादीनां पितृत्वादिधीरत्यादरश्च भागवतोक्ताः श्रीरामे लक्ष्मणादीनां स्वामित्वधी रामायणोक्ता श्वेतद्वीपपतौ नरनारायणयोः स्वप्रकृतित्वधीर्भ-

Digitization by Arya Samaj Charitable Foundation, Chennai

र्थवैपरीत्यापत्तेः ॥ २० ॥

यच्च तस्मिन्नेव "यो वै श्रीरामचन्द्रः स भगवान् ये मत्स्यकूर्मादयोऽवतारास्तस्मै वै नमो नमः" इति सीतापतेर्मत्स्याद्यवतारित्वमुक्तम् । तत् किल युक्तमेव । तस्य परमव्योमाधिपतिरूपत्वात् । यच्च "त्रयाणामपि लोकानामादिकर्ता स्वयं प्रभुः" इति श्रीरामायणे "अधिकसाम्यविमुक्तधाम्नः" इति श्रीभागवते च तस्य स्वयंपदबोध्यत्वमुक्तं तदपि मत्स्याद्यंशित्वाभिप्रायेणैव नेयम् । कृष्णादविशेषे स्वीकृते तु "रामादिमूर्तिषु कलानियमेन

क्तिश्च नारायणीयोक्ता सङ्गच्छेरन्नन्यथा तस्मादंशिनांशो व्यङ्ग्यो न त्वंशेनांशीति स्थितम् ॥ २० ॥

ननु श्रीरामतापन्यां सीतापतेश्च मत्स्याद्यवतारित्वश्रवणात् श्रीरामायणादौ स्वयंपदवाच्यत्वस्मरणाच्च कृष्णस्यैव तत्तदित्याग्रहः कस्मादिति चेत्तत्राह–यच्चेति । तस्मिन्नथर्वशिरस्येव । तस्य परमव्योमेति । पाद्मे खलु परमव्योमाधिप एव सीतापतिरभूत् । शेषचक्रशङ्खास्तु लक्ष्मणभरतशत्रुघ्ना अभूवन्निति वर्णितम् । विष्णुधर्मोत्तरे तु वासुदेवादयश्चत्वारो व्यूहाः क्रमाद्रामाद्या बभूवुरिति स्मृतमिति सिद्धम् । संक्षिप्तभागवतामृते दृश्यते । तथा च श्रीरघुवर्यस्य मत्स्याद्यवतारित्वं साम्प्रतमेव । ननु कृष्णस्य रामस्य चावतारित्वप्रकीर्तनात्तस्मात्तस्य तिलमात्रोऽपि विशेषो मास्तु, तत्राह–कृष्णादविशेषे इति । वैलक्ष्यलेशे

Digitization by Arya Samaj Charitable Foundation, Chennai

तिष्ठन्” इत्युक्तिर्दृष्टरामाणामपि दण्डकारण्यनिवासिनां महर्षीणां कृष्णस्पृहोक्तिश्च व्याकुप्येत्। “पूर्णमदः” इत्यादीनि वाक्यानि स्वरूपसत्सर्वगुणानि सर्वाणत्याहुः न त्वभिव्यक्तसर्वगुणानीति। तस्मात् सर्वदाऽभिव्यक्तसर्वशक्तित्वात् कृष्णस्यैव स्वयंरूपत्वं सिद्धम् ॥२१॥

श्रीकृष्णे हि राधाद्याः पूर्णाः शक्तयः सर्वातिशयिप्रेमपूर्णपार्षदत्वब्रह्मादितत्त्वज्ञविस्मापकस्थिरचरविमोहकवेणुनादमाधुर्यस्वपर्यन्तसर्वविस्मापकरूपमाधुर्यनिरतिशयकारुण्यादयो गुणाः श्रीशुकादिभि-

---

ऽप्यनङ्गीकृते इत्यर्थः। अल्पार्थेन सुदृष्टरामाणामपीति। ‘पुरा महर्षयः सर्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले। हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्’ इति पाद्मे ॥ २१ ॥

परमव्योमाधिपादिष्वनभिव्यक्ताद् कृष्ण एव सर्वदाभिव्यक्तान् विशेषान् दर्शयति—श्रीकृष्णे हीति। ऊक्तं प्रमाणयति पुरुषबोधन्यामित्यादिना। पिप्पलादशाखायां स्थितेयम्। निर्गुणः प्रकृतिगुणैरस्पृष्टः। सगुणः स्वरूपानुबन्धिषाड्गुण्यः। निराकारः स्वरूपानुबन्धिमनुष्याकृतिकः। निरीहः प्राकृतचेष्टारहितः। सचेष्टः समुद्रतरङ्गन्यायेन स्वोल्लासात्मकनित्यचेष्टितः। द्वे पार्श्वे इति। श्रीराधाया वामपार्श्वे स्थितिर्बोध्या। ‘वामाङ्गसहिता देवी राधा वृन्दावनेश्वरी’ इति कृष्णोपनिषद्वाक्यात्। तेन तस्यास्तत्-

Digitization by Arya Samaj Charitable Foundation, Chennai

रनुभूताः सर्वदाऽऽविर्भवन्ति न त्वन्यत्र। पुरुषबोधन्यामथर्वोपनिषदि श्रूयते—"गोकुलाख्ये माथुरमण्डले वृन्दावनमध्ये सहस्रदलपद्ममध्ये कल्पतरोर्मूलेऽष्टदलकेशरे गोविन्दोऽपि श्यामः पीताम्बरो द्विभुजो मयूरपुच्छशिरो वेणुवेत्रहस्तो निर्गुणः सगुणो निराकारः साकारो निरीहः सचेष्टो विराजते, द्वे पार्श्वे चन्द्रावली राधिका च" इति, "यस्या अंशे लक्ष्मीदुर्गादिका शक्तिः" इति, अग्रे च "तस्याद्या प्रकृती राधिका नित्यनिर्गुणसर्वालङ्कारशोभिता प्रसन्नाऽशेषलावण्यसुन्दरी" इत्यादि। ऋक् परिशिष्टे च—"राधया माधवो देवो माधवेनैव राधिका। विभ्राजन्ते जनेषु" इति॥ २२॥

गौतमीये तन्त्रे चैव स्मर्य्यते। "सत्त्वं तत्त्वं परत्वञ्च तत्त्वत्रयमहं किल। त्रितत्त्वरूपिणी सापि राधि-

---

प्रेयसीवृन्दमुख्यत्वम्। एतदेवाह—यस्या इति। यस्याः श्रीराधिकाया अंशो लक्ष्मीर्वैकुण्ठेश्वरी रमा दुर्गा मन्त्रराजाधिष्ठात्रीति सन्दर्भादवगन्तव्यम्। नित्यनिर्गुणा मायागन्धेनाप्यस्पृष्टा। स्वरूपानुबन्धिभिर्गुणैस्तु विशिष्टेत्याह—अशेषेति। राधयेति। विभ्राजत इति बहुत्वं छान्दसम्। जनेषु व्रजौकस्सु॥ २२॥

श्रुत्यर्थं स्मृत्योपबृंहयति—सत्त्वमिति। बृहद्गौतमीये बलदेवं प्रति कृष्णवाक्यम्। सत्त्वं कार्य्यत्वं तत्त्वं कारणत्वं ततोऽपि

Digitization by Arya Samaj Charitable Foundation, Chennai

का मम वल्लभा॥ प्रकृतेः पर एवाहं सापि मच्छक्तिरूपिणी'' इति, "देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परा" इति। इह कृष्णमयी परेत्यनेनेदमुक्तम्—"परास्य शक्तिर्विविधैव श्रूयते। स्वाभाविकी ज्ञानबलक्रिया च"

परत्वश्चेति यत्तत्त्वत्रयं तदहं सा राधिकापि तत्त्वत्रयरूपा। एतत् सार्धकान्तेऽन्यत्र सार्थकमस्ति। 'सात्त्विकं रूपमास्थाय पूर्णोऽहं ब्रह्मवित् परः। ब्रह्मणा प्रार्थितः सम्यक् सम्भवामि युगे युगे॥ तया सार्द्धं त्वया सार्द्धं नाशाय देवताद्रुहाम्' इति। यदु वस्त्वहं तदेव राधेति निष्कर्षः। कार्यकारणभेदस्तु व्याप्यस्य व्यापकानतिरेकस्मरणान्नेयः। देवीति। तत्रैव तन्मन्त्रकथने राधिका परेत्यन्वयः। देवी देवस्य कृष्णस्य पट्टमहिषी। भेदं प्राप्तं निवारयितुमाह—कृष्णमयी कृष्णानन्या। सत्त्वं तत्त्वमित्यादेः। एवमपि परदेवता कृष्णोपासिका सर्वलक्ष्मीमयी सर्वासां लक्ष्मीनामंशिनी। यस्या अंशे लक्ष्मीदुर्गादिका शक्तिः इत्युक्तेः। सर्वासां तासां कान्तिरचर्यत्ववाञ्छा यस्यां सा कान्तिराभा वा तासु सर्वासु यस्याः सेत्येके। संमोहिनी कृष्णाऽनुरञ्जिका। परास्येति श्वेताश्वतराणामुपनिषदि। अस्य परेशस्य। त्रिविधा त्र्यंशा। स्वाभाविकी स्वरूपानुबन्धिनी। ज्ञानेति। ज्ञानं संवित् बलं सन्धिनी क्रिया ह्लादरूपो धात्वर्थस्तद्भूता। यातीतेति। श्री-वैष्णवे प्रह्लादवाक्यम्। या वाचां मनसां चातीतगोचरा अतिक्रान्तो गोचरो विषयता यया सा। अविशेषणा तासिस्तैश्च

Digitization by Arya Samaj Charitable Foundation, Chennai

इति श्रुत्या "याऽतीतगोचरा वाचां मनसां चाविशेषणा । ज्ञानिज्ञानपरिछेद्या वन्दे तामीश्वरीं पराम्" इति स्मृत्या च या भगवदभिन्नाऽभिहिता या च ह्लादिनीत्यादिना विशेषिता सा परैव राधिकेश्वरीति । तथा च ह्लादिनीसंवित्सारांशप्रेमात्मिका सेति कामाद्यधिकरणभाष्ये स्फुटमेतत् ॥ २३ ॥

एवं सति यत्तु स्कान्दे काचिन्नर्तकी श्रीमूर्तेर्माधुरीं दृष्ट्वा तदग्रे प्रबोधनीजागरनृत्याद्राधाऽभूदित्यु-

---

गुणकर्मभ्यां विशेष्टुमशक्येत्यर्थः । यतो वाच इत्यनेन या निरूप्यते सैवेयं संविदिति भगवदभिन्नता दर्शिता । किं तर्हि निर्विशेषा संवित् सेत्यत्राह—ज्ञानीति । ज्ञानिनां तदुपासकानां ज्ञानेन परिच्छेद्या स्वानुबन्ध्यनन्तगुणत्वेन याथात्म्येन गम्येत्यर्थः । तां परां वन्दे । ईश्वरीमीश्वरस्य भूतां पट्टमहिषीमीत्यर्थः । परास्य शक्तिरित्यादेः । तथा चेत्यादि प्रकटार्थम् ॥ २३ ॥

दुर्धियां शङ्कामपाकर्तुमाह—एवं सतीति । श्रीराधाया भगवत्स्वरूपानुबन्धिपराशक्तिसारमहालक्ष्मीत्वे सिद्धे सतीत्यर्थः । ब्रह्मैवेति । ब्रह्मध्यायी जीवो ब्रह्मैव सन् ब्रह्मसदृशः सन् ब्रह्माप्येतीतिवदित्यर्थः । 'एवौपम्येऽवधारणे' इति विश्वः । मोक्षे जीवस्य ब्रह्मसादृश्यमुक्तं 'निरञ्जनः परमं साम्यमुपैति' इति श्रुत्या, 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इति स्मृत्या च । राधाध्यायिनी

Digitization by Arya Samaj Charitable Foundation, Chennai

क्तं तत्र किल "ब्रह्मैव सन् ब्रह्माप्येति" इत्यादिवत्तत्साहश्यमसावगमदित्येव मन्तव्यम् ॥ २४ ॥

तदेवं महालक्ष्मीत्वादेव श्रीराधायाः पूर्णत्वं निर्बाधम् । श्रीकृष्णप्रेयस्यः खलु सर्वा लक्ष्म्य एव तन्मुख्यत्वात् सा तु महालक्ष्मीरिति सुश्लिष्टम् । चिन्तामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम् । लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं गोविन्दम्" इत्यादेः, "श्रियः कान्ताः कान्तः परमपुरुषः" इत्यादेश्च, "गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभम्" इत्यादेश्च । "यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा । सर्वगोपीषु सैवैका विष्णोरत्यन्तव-

---

सा नर्तकी राधासादृश्यमगमदित्येवार्थः । अन्यथोक्ताः श्रुतिस्मृतयो निर्विषयाः स्युरिति भावः । यत्तु कुशध्वजस्य ब्रह्मर्षेर्वाङ्मयी कन्या वेदवती परमसुन्दरी विष्णुपतिकामनया तपस्यन्ती रावणेन दुरात्मना धर्षिता दग्धदेहा तद्वधाय जानक्यभूदित्युत्तरकाण्डे श्रीरामं प्रत्यगस्त्येनोक्तं तत्राप्येवं ज्ञेयम् । जानक्यां प्रविश्य सा तद्वधे निमित्तं बभूवेति । लक्ष्मीत्वादनादिसिद्धा रामात्मा जानकी तस्या नैवं तादृशता सम्भवेत् ॥२४॥

तदेवमित्युक्तप्रकारेणेत्यर्थः । चिन्तामणीति । ब्रह्मसंहितायाम् । अभीति । वननयनचारणगोष्ठानयनप्रकारेण पाल-

Digitization by Arya Samaj Charitable Foundation, Chennai

ल्लभा'' इति पाद्मात् । "त्रैलोक्ये पृथिवी धन्या तत्र वृन्दावनं पुरी । तत्रापि गोपिकाः पार्थ तत्र राधाभिधा मम'' इत्यादि पुराणाच्च । "यस्या अंशे लक्ष्मीदुर्गादिका शक्तिः'' इति श्रुतिस्तु दर्शितैव ॥ २५ ॥

श्रीकृष्णपरिकराणामसमाभ्याधिकप्रेमत्वं तदर्थञ्च-लद्विषहृदप्रवेशधावनादितः प्रतीयते यस्माद् भगवतोऽपि गाढवश्यतेति निवेदितं ब्रह्मणा—"एषां घोषनिवासिनामुत भवान् किं देव रातेति नश्चेतो विश्वफलात् फलं त्वदपरं कुत्राप्ययं मुह्यति । स द्वेषादिव पूतनापि

यन्तम् । कदाचिद्रहसि गोपाङ्गनाभिर्विहारमाह—लक्ष्मीति । गोप्य इति श्रीदशमे । गोप्यः श्रिय इत्यन्वयः । श्रीराधायाः श्रैष्ठ्यमाह—यथेति । त्रैलोक्ये इत्यर्जुनं प्रति कृष्णवाक्यम् । धन्या श्रेष्ठा । नन्वेतत्स्मृतिप्रमाणस्य मूलं श्रुतिप्रमाणं देयमिति चेत्तत्राह—यस्या इति ॥ २५ ॥

अथ सर्वातिशयिप्रेमपूर्णपार्षदत्वमुदाहरति—श्रीकृष्णेति । एषामिति श्रीदशमे ब्रह्मवाक्यम् । हे देव श्रीनन्दसूनो भगवन् एषां त्वद्विनियुक्तधामादीनां घोषनिवासिनां भवान् किं राता किं फलं दास्यतीति विश्वफलान्निखिलफलरूपात्त्वत्तोऽपरं फलं कुत्राप्यपश्यन्नश्चेतो विमुह्यति । किं दत्त्वायमनृणः स्यादिति मोहमेतीत्यर्थः । नन्वेभ्य एतदीयेभ्यो वाऽहमात्मानन्दत्वानृणः

Digitization by Arya Samaj Charitable Foundation, Chennai

सकुला त्वामेव देवापिता यद्धामार्थसुहृत्प्रियात्मतनय-प्राणशयास्त्वत्कृते" इति ॥ २६ ॥

द्रुहिणादितत्त्वविद्विस्मापकस्थिरचरविमोहकवेणुनादमाधुर्यन्तु "सवनशस्तदुपधार्य सुरेशाः शक्रसर्वपरमेष्ठिपुरोगाः। कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः॥", "का स्त्र्यङ्ग ते कलपदामृतवेणुगीतसंमोहितार्य्यचरितान्न चलेत्त्रिलोक्याम्। त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्र-

---

स्यामिति चेत्तत्राह—सद्वेषादिवेत्यादि। सकुला बकादिभ्यां भ्रातृभ्यां सहिता। यदिति स्फुटम् ॥ २६ ॥

सवनश इति तत्रैव व्रजदेवीनां वाक्यम्। कवयः सर्वज्ञा अपि सुरेशास्तत्ताः स्वरजातीः सवनशो मन्द्रमध्यतारभेदेनोपधार्य्य समाकर्ण्य अनिश्चिततत्त्वा अज्ञाततत्स्वरूपाः सन्तः केवलं कश्मलं मोहं ययुः। कीदृशास्ते यतो गीतध्वनिरायाति। तत आनताः कन्धराश्चित्तानि च येषां ते। का स्त्रीति। तत्रैव कृष्णं प्रति तासां वाक्यम्। ननु परे पुंसि मयि किमिति निरताः स्थ तत्राह—अङ्ग हे कृष्ण ते कलपदामृतवेणुगीतेन सम्मोहिता सती का स्त्री आर्य्यचरितान्निजधर्मान्न चलेत्। यन्मोहिताः पुंसोपि विमुह्यन्तीति भावः। त्रैलोक्येति। स्फुटार्थम्। यद्यतः अविभ्रन्नबिभ्रुः। त्वदुद्योतकशब्दादेव धर्मत्यागो युक्तः किं

Digitization by Arya Samaj Charitable Foundation, Chennai

न्" इत्यादिभ्यः स्थिरचरविमोहकरूपमाधुर्यं चोक्तम् ॥ २७ ॥

"यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् । विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणाङ्गम् ॥" इत्यादिभ्यस्तु स्वपर्य्यन्तसर्वविस्मापकरूपमाधुर्य्यम् ॥ २८ ॥

"अहो बकीयं स्तनकालकूटं जिघांसयाऽपाययदप्यसाध्वी । लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम" इत्यादिभ्यस्तु निरतिशयकारु-

---

पुनस्त्वदनुभवादिति भावः ॥ २७ ॥

यन्मर्त्येत्यादि द्वयमुद्धववाक्यं तृतीये । यद् बिम्बं स्वमूर्तिम् । स्वयोगमायायाः पराख्यशक्तेः प्रभावं दर्शयता त्वया गृहीतं जगति प्रकटितमित्यर्थः । मर्त्येषु या लीला तस्यामौपयिकं तत्सदृशलीलोचितद्विभुजादित्वादतिमनोज्ञमित्यर्थः ॥ २८ ॥

अहो इति । कारुण्यस्यासमोर्ध्वत्वादाश्चर्य्यं तदित्यर्थः । बकी पूतना हन्तुमिच्छयापि स्तनयोः संभृतं कालकूटं विषं यमपाययत् । असाध्वी दुष्टापि धाव्या उपमातुर्यशोदासख्या अम्बिकायाः किलिंवायाश्चोचितां गतिं लेभे । धात्रीवेषमात्रेण यस्तादृश्यै सद्गतिं दत्तवानित्यर्थः । ततोन्यं कं वा दयालुं शरणं यामेत्यर्थः । इतोऽन्येषु भगवदवतारेष्वपि नेदृशं कारुण्यं

Digitization by Arya Samaj Charitable Foundation, Chennai

ण्यञ्च ॥ २९ ॥

प्रेमादीनां ह्लादिनीसंवित्साराणामानन्दचिदात्मकब्रह्मस्वरूपचिन्तनसमनुभावयित्वान्मुख्यत्वं बोध्यम् । तस्मात् सर्वधर्माविष्कारात् कृष्णस्य स्वयंरूपत्वम् । तस्यैवानाविष्कृतसर्वधर्मस्य परव्योमाधिपादित्वम् । तत्तद्धर्माविष्कारतारतम्यादेव कृष्णेऽपि पूर्णतमत्वाद्यवस्थाः कीर्त्तिताः ॥ ३० ॥

प्रकटमस्तीति भावः ॥ २९ ॥

ननु किमेवं चित्तविकारः प्रेमा स्तूयते ज्ञानन्तु स्तुत्यं 'मृगैर्मृगाणां ग्रहणं पक्षिणां पक्षिभिर्यथा । गजानाञ्च गजैरेवं ज्ञेयं ज्ञानेन गृह्यते' इति मोक्षधर्मे तस्यैव ब्रह्मोपलम्भकत्वस्मरणादिति चेत्तत्राह—प्रेमादीनामिति । आदिशब्दात् प्रणयस्नेहरागमानानुरागमहाभावास्तस्यैवोत्तरोत्तरोत्कर्षादवस्थाभेदा गृह्यन्ते । ज्ञानं खलु तत्त्वंपदार्थानुसन्धिरूपनिर्निमेषवीक्षणवदविचित्रम् । प्रेमादिकन्तु विचित्रमपाङ्गवीक्षणवदिति पूर्वोक्तं स्मर्तव्यम् । भक्तिर्हि न चित्तविकारः 'सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति' इति श्रवणात् । किन्तु संविदाह्लादसारांशरूपा सेति पुरैव निर्णीतम् । प्रकरणार्थं योजयति—तस्मादिति । प्रकटार्थम् । न चैवं कृष्णरूपश्रद्धाजाड्यादपि तु वस्तुस्थित्यैव तथोच्यते यत् कृष्णरूप एव तारतम्यं वर्ण्यत इत्याह—तद्धर्मेति । 'हरिः पूर्णतमः पूर्णतरः पूर्ण इति त्रिधा' इति श्रीरूपचरणैः ॥ ३० ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

स एष भगवान् स्वरूपशक्तिसिद्धेऽतिविचित्रे स्वधाम्नि स्वसदृशैः पार्षदैर्विशिष्टो नित्यं लीलायते। "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इति, "दिव्ये पुरे ह्येष संव्योम्न्यात्मा प्रतिष्ठितः" इति, "तां वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि" इति च श्रवणात्। न खलु स्वमहिमपुरप्रतिष्ठा स्वसदृशान् पार्षदान् विना सम्भवति। न च तासां शुभावहविधिरूपाणां गवाञ्च लीलया विना स्याद्रुपयोगः। तामित्यादौ तां तानि वां युवयो राधिकाकृष्णयोर्वास्तूनि धामानि गमध्यै लब्धुं उश्मसि कामयामहे। भूरिशृ-

---

एवं सच्चिदानन्दविग्रहो धर्मी भगवानविचिन्त्यशक्तिरित्यापादितम्। अथ परिकरिणस्तस्य लीला वर्णनीया न हि निस्तरङ्गार्णववन्नीलाश्मस्तम्भवद् वैकरस्यभाक् सः। तथात्वे धामपरिकरश्रुतिर्व्याकुप्येत्। तस्मान्नित्यधामपरिकरलील इति प्रतिपादयितुमुपक्रमते—स एष इत्यादिना। स इति छान्दोग्ये। दिव्य इति मुण्डके। तामिति ऋक्षु। अयास इत्यत्र विप्रास इतिवत् सुक् छान्दसः। 'अयः शुभावहो विधिः' इत्यमरः। भूरिशृङ्गा इत्यत्र भूरिशब्दः प्राशस्त्ये लाक्षणिकः। एषु वाक्येषु परिकरलीलयोः स्पष्टमप्रत्ययात्ते प्रत्याययन् व्याचष्टे—न

Digitization by Arya Samaj Charitable Foundation, Chennai

ङ्गाः प्रशस्तविषाणाः। वृष्णः स्वजनाभिलाषवर्षिण इति व्याख्येयम्। राधयेत्यादौ लट्प्रयोगेण तैः सह तयोर्नित्यसाहित्यावेदनाल्लीला नित्येति सूचितम्। यस्या अंशे लक्ष्मीदुर्गादिका शक्तिरित्येतद्वाक्यानन्तरं पश्चिमादिक्रमेण सर्वसव्यं पश्चिमे संमुखे ललितेत्यादिभिर्निर्दिष्टनाम्नां परिकराणां कृष्णमभितः स्थितिर्दर्शिता सेवा चेति प्रतिज्ञातं विस्फुटम्॥ ३१॥

इदमत्र तत्त्वम्। अनन्तविज्ञानानन्दवपुषो भगवतः स्वचिच्छक्तिविलासमयं प्रकृतिस्पर्शशून्यमपरिच्छिन्नं स्वमहिमसंव्योमशब्दितं पुरमतिविस्तीर्णबहुभूमप्रासादोपमं चकास्ति। यत्र नानाविर्भावपरिकरपरिच्छदस्वच्छन्दसमावेशोचितान्यतिविशालनीवृन्निचयमयानि निरुपमशक्रनीलकुरुविन्दचन्द्रकान्तादिकान्तानि विचित्रप्राचीरचत्वरप्रासादादिमदावासानि मणिचित्रतटाक-

---

खल्वित्यादिना। राधयेत्यादि वाक्ये तु ते द्वे प्रस्फुटे इति योजयति—राधयेत्यादावित्यादिना। एवं गोपगोपीगवावीतामित्यादिकमत्र स्मर्तव्यम्। प्रतिज्ञातमिति। स्वसदृशैः पार्षदैर्विशिष्टः स्वधाम्नि नित्यं लीलायत इति यत् प्रतिज्ञातं तत् श्रुत्या प्रतिपादितमित्यर्थः॥ ३१॥

उक्तमर्थं वर्तुलयन्नाह—अनन्तेत्यादि। यत्र नानाविर्भाव-

Digitization by Arya Samaj Charitable Foundation, Chennai

पीयूषपूर्णसरित्सरोवापीकूपानि कर्पूरपूरायमाणरजांसि प्रतिक्षणसमुल्लसत्तरुवल्लीगुल्मानि रम्यविहङ्गादिसत्त्वसन्दोहानि कमनीयविमानावलिवियन्ति धामानि स्फुरन्ति। येषु परमालौकिकरूपगुणसम्पन्ना मुक्ता नित्यमुक्ताश्च सर्वाभ्यर्हितया श्रीदेव्या सह विविधविनोदवन्तं नानाविधैरुपचारैरनुकूलयन्तीति ॥ ३२ ॥

एवमेवोक्तं 'जितं ते' स्तोत्रे—"लोकवैकुण्ठनामानं दिव्यषाड्गुण्यसंयुतम्। अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ नित्यसिद्धैः समाकीर्णं त्वन्मयैः पाञ्चकालिकैः। सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥

ति। 'वैकुण्ठभुवने नित्ये निवसन्ति महोज्ज्वलाः' इत्यादिपाठात्। अनुकूलयन्ति। अभिरुचितां सेवां कुर्वन्तीत्यर्थः ॥३२॥

अत्र स्मृतिमुदाहरन्ति—लोकमित्यादि। गुणत्रयविवर्जितमप्राकृतमिति वैकुण्ठलोकस्य विशेषणान्मायागन्धास्पृष्टत्वम्। तस्य विस्पष्टम्। अतस्तु तत्रत्यानां वस्तूनां भगवत्स्वरूपशक्तिविलासत्वमेवायातमिति बोध्यम्। त्वन्मयैस्त्वदाविष्टैः। पाञ्चकालिकैरिति। अभिगमनोपादानेज्याऽध्ययनसमाधयः पञ्च कालास्तेषु भवैस्तदनुष्ठाननिष्ठैरित्यर्थः। प्रकृष्टसत्त्वराशिमिति। सच्चिदानन्दस्वरूपमहापुरुषमित्यर्थः। प्रकृष्टसत्त्वं रजसा तमसा चामिश्रं मायिकं सत्त्वं जडमेवेति न त्रयाणां गुणानां परस्पर-

Digitization by Arya Samaj Charitable Foundation, Chennai

वापीकूपतडागैश्च वृक्षषण्डैः सुमण्डितम् । अप्राकृतं सुरैर्वेद्यमयुतार्कसमप्रभम् ॥ प्रकृष्टसत्त्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा । क्रीडन्तं रमया सार्द्धं लीलाभूमिषु केशवम्" इत्यादि ॥ ३३ ॥

भगवान् सूत्रकारश्चैवमाह—"अन्तरा भूतग्रामवत् स्वात्मनः" इत्यस्मिन्नधिकरणे ॥ ३४ ॥

संसर्गस्य स्मृतत्वात् । ज्ञानात्मकममायिकसचेतनं तदिति च न। तद्भूतस्य भगवद्विग्रहस्य परमात्मत्वोक्तिव्याकोपात् । तस्माद् भगवदभिन्ना चिदानन्दसद्रूपा परा शक्तिस्तदिति तत्त्ववादिनः ॥ ३३ ॥

अथ परमर्षिनिर्णयोऽप्येवमस्तीत्याह—भगवानिति । 'दिव्ये पुरे ह्येष संव्योम्न्यात्मा प्रतिष्ठितः' इति वाक्ये किमाकाश एव हरेर्लोकः, उताकाशवद् व्यापको विचित्रप्राकारप्रासादादिरूप इति सन्देहे आकाशः स्याद्वाचनिकत्वात् । पुरत्वं तस्य रूपकेणोच्यते इति प्राप्ते—अन्तरेति । स्वात्मकसंव्योमभूतस्य पुरस्याऽन्तरा मध्ये स्थितं प्राकारादि वस्तु स्वात्मनो भूतग्रामवत् स्फुरति 'यमेवैष वृणुते तेन लभ्यः' इत्यादि श्रवणात् स्वानुग्रहभाजनस्य जीवस्य भूम्यादिनिर्मितवद् विभाति । वच्छब्देन भूतग्रामत्वं तस्य निरस्तम् । तत्रैव तस्य ब्रह्मात्मकत्वमुक्तम् । 'ब्रह्मैवेदममृतं पुरस्तात् पश्चाच्च ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' इति मुण्डके । स्वे महिम्नीत्यत्रेनाप्येवं बोध्यते ॥ ३४ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तदेतत् स्वमहिमादिशब्दितं तद्धाम वैकुण्ठद्वार्वत्यादित्वेषा यथोर्ध्वं स्फुरतीति तत्तद्गतात्विर्भात्वेषु तत्तदभिमानेषु विशेषश्चेति विमृष्टागमानां विदुषां निश्चयः ॥ ३५ ॥

यान्येव धामानि तत्तल्लीलार्थमजाण्डेऽप्याविःस्युरिति स्कान्दे स्मर्य्यते। "या यथा भुवि वर्तन्ते पुर्य्यो भगव-

---

अथ सन्निवेशविशेषं तस्य धाम्नोऽवगमयति—तदेतदित्यादिना। वैकुण्ठोपरि द्वार्वती तदुपरि मधुपुरी तदुपरि तु गोकुलमित्यूर्ध्वोर्ध्वं विभातीत्यर्थः। विमृष्टागमानामिति। स्वायम्भुवागमादिषु वैकुण्ठोपरि कृष्णलोको वर्णितः। ब्रह्मसंहिताबृहद्वामनहरिवंशेषु तु सर्वोपरि गोलोकगोकुलाभिधानः स्वतन्त्रः कृष्णलोको निरूप्यते। स च परिकरलीलाभेदेनांशभेदात् द्वार्वत्यादित्रिरूपो वाच्यः। या यथा भुवीत्यादि स्कान्दोक्तेश्च। यत्तु पाद्मोत्तरखण्डे महावैकुण्ठस्यावरणतया तस्य पूर्वादिषु दिक्षु दशावतारीस्थानानि क्रमाद् गणयित्वा श्रीकृष्णस्य नवमत्वेन तत्स्थानस्य ब्रह्मादिगावरणत्वमुक्तम्। तत्रापि तस्य सर्वोर्ध्वत्वमेवाभिमतम्। तस्य तथाभूतस्यापि तदावरणत्वेनोक्तिस्तस्य ग्रन्थस्य तत्परत्वादवगम्यते। अन्यथा स्वायम्भुवागमादिबहुग्रन्थव्याकोपापत्तिः। विशेषस्तु श्रीकृष्णसन्दर्भे द्रष्टव्यः ॥ ३५ ॥

मत्स्याद्यवताराणां यानि स्थानानि परमव्योम्नि सन्ति ता-

Digitization by Arya Samaj Charitable Foundation, Chennai

तः प्रियाः। तास्तथा सन्ति वैकुण्ठे तत्तल्लीलार्थमादृताः" इति। आसु दिव्यत्वास्फूर्तिस्त्वसंस्कृतदृशामेव भगवति नरदारकत्वादिवत्। तथापि तद्दृष्ट्वा शुभलोकप्राप्तिस्तादृशभगवद्दृष्टयेवेति "न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः"इति सूत्रात्तद्भाष्याच्च।

नि प्रपञ्चेऽपि तद्वदाविर्भवन्त्यतस्तान्यप्राकृतानीति प्रतिपादयति–यान्येवेति। या यथेति। आदृता ब्रह्मादिवन्दिताः। आस्विति। ब्रह्माण्डान्तर्गतासु पूर्ष्वित्यर्थः। असंस्कृतेति। भक्तिसंस्कारशून्यधियामित्यर्थः। नरदारकेति। मायिकनृबालकत्वादिवदित्यर्थः। तादृशेति। नरदारकतया प्रतीतस्यापि भगवतो दर्शनेनेत्यर्थः। न सामान्यादिति ब्रह्मसूत्रम्। अस्यार्थः। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति श्रुतौ, 'एतदन्तो नृणां क्लेशो यद्भवानक्षिगोचरः' इति स्मृतौ च भगवतो दर्शनान्मुक्तिरित्युक्तम्। तन्न युक्तम्। अवताराऽवसरे तद्दृष्टिमतामपि मुक्तेरप्रत्ययादिति चेत्तत्राह–नेति। अपिरवधारणे। सामान्यादिति। टाविभक्तेरात् सुपां सुलुगित्यादिपाणिनिसूत्रात् सामान्येन सर्वसाधारण्येन मायाजवनिकाच्छन्नभगवद्विषयतया योपलब्धिर्दृष्टिस्ततो न मुक्तिः मृत्युवत् मरणमात्राद्यथा सा न स्यात्। तर्हि सामान्योपलब्धिरपार्था स्यात्तत्राह–न हीति। न साऽपार्थेत्यर्थः। तत्फलं किमिति चेत्तत्राह—लोकेति। स्वर्गादिलोकप्राप्तिस्तत्फलमित्यर्थः। 'सामान्यदर्शनाल्लोका मुक्तिर्योग्यात्मद-

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मात्तत्र तैः सहाऽसौ नित्यं लीलायते । बाल्यपौगण्ड-कैशोरसम्बद्धास्ता लीला नित्याऽनित्या विभान्तीति सिद्धम् ॥ ३६ ॥

अत्राहुः । तद्देशतत्कालतत्परिकराविच्छेदे सत्येव तासां नित्यत्वं स्यान्न चैवं संभवति । देशादिभेदादेकस्य परिकरस्य पूर्वोत्तरवर्त्तित्वेनानेकलीलासम्बन्ध-स्मरणाच्च । पूर्वस्या लीलाया नित्यत्वे तत्सम्बन्धिनः परिकरस्यापि सम्बन्धस्तत्र नित्यः स्यात् । तथा सत्यु-

---

र्शनात्'इति स्मरणात् । योग्येति । परमप्रेमास्पदचिद्विग्रहत्वेन । तद्वीक्षणात्तु मुक्तिरित्यर्थः ॥ ३६ ॥

अत्राहुरिति । अत्र लीलानित्यत्वे विषये शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वं वदन्तस्तार्किकाः पूर्वपक्षं रचयन्तीत्यर्थः ॥ देशादिभेदादिति । न ह्येकस्मिन् देशे काले वा स्थूणाश्मवद्ध-गत्वान् सर्वेऽव्वरस्तत्परिकरो वाऽस्ति । निकेतजाङ्घिगोचारण-रासनृत्यादीनां लीलानां देशभेदेन कालभेदेन परिकरभेदेन च संभवः प्रतीयते । बाल्यपौगण्डलीलायां पूर्वपूर्वस्यां कैशोरलीलायां चोत्तरस्यां स एव बालकः पित्रादिः परिकरः । सद्मज-ङ्घिगोचारणनियुद्धादिषु पूर्वोत्तरेषु स एव वयस्यगणः । संभोग-विप्रलम्भयोः पूर्वोत्तरयोः स एव किङ्करीगणः सखिगणश्चेति विभावनीयम् । एवं श्रीदाशरथ्यादेर्लीलासु च सुधीभिरनुसन्धेयम् । इत्थं चैकस्य परिकरस्य पूर्वोत्तरवार्त्तित्वेन लीलासुपरि

Digitization by Arya Samaj Charitable Foundation, Chennai

त्तरस्यां तस्य सम्बन्धो दुर्घटः । स्वीकृते च तस्मिन् पूर्वस्या अनित्यत्वम् । नित्यत्वे चोत्तरसम्बन्धिनस्तस्यान्यत्वं भवेत् । तस्माद्वियत्पुष्पायमानं भवतां लीलानित्यत्वमिति चेत् ॥ ३७ ॥

अत्रोच्यते । अनभिज्ञो भवानाविचिन्त्यस्य भगवत्तत्त्वस्य, यदौपानिषदं तत् । तथा हि छान्दोग्ये "भूमैव सुखं भूमा त्वेव विजिज्ञासितव्यः" इति भूमानमुद्दिश्य तस्य लक्षणमुच्यते—"यत्र नान्यत् पश्यति नान्यच्छृ-

---

करविच्छेदे सिद्धे तेन कृति दर्शयति पूर्वस्या—इत्यादिना । तत्संबन्धिनः पूर्वलीलाङ्गस्य पित्रादेः ॥ तथा सति तस्य पूर्वलीलायां नित्यसन्बन्धे स्वीकृते सतीत्यर्थः । तस्य पूर्वलीलाङ्गस्य पित्रादेः । स्वीकृते चेति । उत्तरलीलायां पित्रादेः सन्बन्धेऽङ्गीकृते तत्सम्बन्धघटितायाः पूर्वलीलाया नित्यत्वाभावः स्यादित्यर्थः । नित्यत्वे वेति । तत्संबन्धघटिततया पूर्वलीलाया नित्यत्वे वा स्वीकृते सत्युत्तरलीलायामन्यः पित्रादिः स्यान्न चैवं स्मर्यतेऽनुभूयते वेति । तथा च प्रागुत्तरं चान्यान्यलीलोदयात् पूर्वपूर्वासां विनाशादनित्या लीलेति भावः ॥ ३७ ॥

पूर्वपक्षं निराकुर्वन्नाह—अत्रोच्यत इति । भूमैवेति । नारदं प्रति सनत्कुमारस्य वचनम् । वैपुल्यधर्मा सुखस्वरूपः सर्वेश्वरो जिज्ञास्य इत्यर्थः । यत्रेति । यत्र भूम्न्यनुभूयमाने सति स भूमानुभवी ततोऽन्यन्न पश्यति जलधिनिमग्नो यथा जलराशेर-

Digitization by Arya Samaj Charitable Foundation, Chennai

णोति नान्यद्विजानाति स भूमा''इति । अत्र भूमानं प्राप्तस्य तदितरदर्शनादि प्रतिषिध्यते । अनन्तरं तु मृत्य्वादिहेयदर्शनं निषिध्य पुनस्तस्य सर्वदर्शनमुच्यते "न पश्यो मृत्युं पश्यति न रोगं नोत दुःखितां । सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः'' इति । अत्र सर्वशब्देन विविधवैचित्र्यवत्यो बाल्यादिसम्बद्धास्तस्य लीलाः कथ्यन्ते । ताः कार्त्स्न्येन पश्यति स्वस्य तत्परिकरत्वेन तदङ्गत्वादाप्नोति च यथाधिकारमिति । इह बाल्यादिसम्बद्धानां तासां मिथो वैलक्षण्यात् कैशोरसम्बद्धानां संयोगवियोगात्मना स्फुटद्वैधत्वाच्च वैविध्यवैचित्र्ये सुव्यक्ते ॥ ३८ ॥

न्यन्न पश्यति तद्वादित्यर्थः । अनन्तरमिति । तस्य भूमोपासकस्य । न पश्य इति । तत्रैव तं प्रति तद्वाक्यम् । पश्यो भूमध्यायी भक्तः । मृत्युरोगदुःखितान् संसारिधर्मान्न पश्यति किं तु भूमानमापद्य तस्य सर्वं विशेषं पश्यतीत्यर्थः । अत्र भूम्नो निर्विशेषत्वे सर्वशब्दोपादानं निरर्थकं स्यादतः सर्वशब्देन तस्य गुणचरितानि बोध्यन्ते । एतदेव व्याख्याति—सर्वशब्देनेति । स्फुटद्वैधत्वात् प्रकटद्वैविध्यत्वादित्यर्थः । धाप्रत्ययस्य 'द्वित्र्योश्च धमुञ्'इति धमुञादेशः । धमुञन्तात् स्वार्थे ढर्शनमिति डप्रत्ययः । ततो द्वैधत्वादिति सिध्यति ॥ ३८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथ मिथो विलक्षणासु देशकालभेदेन जायमानासु बह्वीषु तास्वेकस्य परिकरस्य युगपत्सान्निध्यसम्भवात् कथं सर्वप्रकारकदर्शनप्राप्ती सम्भवेतां, तदसम्भवे वा कथं तासां तद्योगघटितानां नित्यतेत्याशङ्कायां तदनन्तरमिदं पठ्यते—"स एकधा भवति द्विधा त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादश स्मृतः। शतं च दश चैकं च सहस्राणि च विंशतिः" इति। अत्र सिद्धिबलाद्बहूनि रूपाणि तस्य लीलाप्रेप्सोराविर्भवन्ति तैरसौ तत्र तत्र संनिदध्यादिति तस्य सर्वत्रैक्यात्तदवि-

---

भगवति लीलाः साधिताः। अथ तास्वङ्गभूतानां देशकालपरिकराणामविच्छेदः साध्यते—अथेत्यादिना। तासु लीलासु। तदसम्भवे वेति। तस्य परिकरस्य तत्तद्देशतत्तत्कालसम्बन्धेन जायमानासु लीलासु युगपत् सान्निध्यसम्भवे वेत्यर्थः। तासां तद्योगघटितानामिति। तत्तद्देशतत्तत्कालतत्तत्परिकरसम्बन्धसिद्धानामित्यर्थः। तत्र तावदेकस्य परिकरस्य युगपत्तासु सान्निधिं प्रतिपादयति—स इति। तत्रैवैतद्वाक्यम्। स मुक्तो भूमभक्तः। अत्रेति। सिद्धिः सत्यसङ्कल्पता। लीलाप्रेप्सोः सर्वा लीलाः साक्षाच्चिकीर्षोः। सर्वत्र सर्वासु लीलासु। तदविच्छेदसिद्धिर्निखिललीलासान्निध्योपपत्तिः। यद्यपि स एकधेति वाक्यं साधनमुक्तपरं प्रकरणात्तथाप्युपलक्षणतया कैमुत्येन वा नित्यमुक्तानां जीवानां परावताराणां च पार्षदानां ग्रहणाय

Digitization by Arya Samaj Charitable Foundation, Chennai

च्छेदसिद्धिरतो न काचिदनुपपत्तिः ॥ ३९ ॥

ईदृशलीलाविशिष्टमेव स्वरूपं रसशब्दितम् । तदवाप्तस्यैव परमानन्द इति श्रुतिराह—"रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति" इति। संयोगस्येव वियोगस्यापि रसत्वेन भगवद्रूपत्वात्तज्ज्ञानमपि तदनुभव एवेति तस्य सार्वदिकसाक्षात्कारसिद्धिः। तेन तेन च विशिष्टा खलु लीला नित्या। तत्राद्ये बहिरन्त्ये तु हृद्येव साक्षात्कृतिः । इत्थं च सार्वदिकसाहित्यसत्त्वेऽपि सायं वीक्षाप्रतिज्ञासाम्प्रतपरिष्वङ्गाभ्यर्थनादयो व्यवहाराः सिध्येयुरिति श्रुतितात्पर्य्यसहायवानेष निर्णयः । धाम्नः समयस्य च भगवदात्मकस्य सर्वत्र सान्निध्यं वक्ष्यते । अलौकिकेऽचिन्त्यवस्तुनि तर्कानवतारो न दूषणमपि तु

भावीति बोध्यम् ॥ ३९ ॥

रस इति तैत्तिरीयके । स भगवान् रसः पञ्चविधरसात्मा। अयं तदुपासकः । ननु गोचारणादौ प्रवृत्ते भगवति निकेतस्थानां भक्तानां तत्साक्षात्काराभाव इति चेत्तत्र समादधदाह-संयोगस्येवेति । तज्ज्ञानं वियोगज्ञानं । तस्येति भगवतः । तेन तेन चेति । संयोगेन वियोगेन चेत्यर्थः । सायमिति । गोचारणाय गच्छतो भगवतः सायमागत्य त्वामहं द्रक्ष्यामि देहि मे सांप्रतं परिष्वङ्गमित्यावासस्थितैर्भक्तजनैः स व्यवहारः सिध्येत्

Digitization by Arya Samaj Charitable Foundation, Chennai

भूषणमेव महिमोन्नाहात् ॥ ४० ॥

अत्राहुः । ननु लीलायाः क्रियात्वात् प्रत्यंशमप्यारम्भसमाप्तिभ्यां तस्याः सिद्धिर्वाच्या । ताभ्यां विना तत्स्वरूपनाशापत्तिः । अतः कथमसौ नित्येति चेत् ॥४१॥

अत्रोच्यते । भगवति सदैवाकारानन्त्यात् प्रकाशानन्त्याल्लीलानन्त्यादनन्तब्रह्माण्डगतानन्तवैकुण्ठगतानां तत्तल्लीलास्थानानां तत्तत्पार्षदानां च व्यक्तिप्रकाशानन्त्याच्च नानित्यत्वं तस्याः । तत्तदाकारप्रकाशगतयोस्तत्तदारम्भसमाप्त्योः सत्योरप्येकत्र तत्तत्क्रियांशा यावत् समा-

---

संयोगवियोगात्मना रसस्योदयमानत्वादिति भावः ॥ ४० ॥

ननु सन्तु भगवति विचित्रा लीलास्तत्तद्देशादिसम्बद्धाः । नित्यास्तु ता न स्युरारम्भसमाप्तिमत्त्वादिति तार्किकाः पुनः प्रत्यवतिष्ठन्ते-नन्वित्यादिना । विकसितार्थमेतत् ॥ ४१ ॥

समादधाति-भगवतीत्यादिना । भगवत्याकारानन्त्यं 'एकोऽपि सन् बहुधा योऽवभाति', 'एकानेकस्वरूपाय' इत्यादिश्रुतिस्मृतिभ्यः । लीलानन्त्यं 'जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः । न शक्यन्तेऽनुसंख्यातुमनन्तत्वान्मयापि हि' इत्यादिस्मृतिभ्यः । ब्रह्माण्डानन्त्यम् 'अण्डानां तु सहस्राणां सहस्राण्ययुतानि च । तादृशानां तथा तत्र कोटिकोटिशतानि च' इत्यादिस्मृतिभ्यः । वैकुण्ठानन्त्यं च 'तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि' इति श्रुतेः । पार्षदानन्त्यं च 'स एकधा' इत्यादिश्रुतेः । एवं भ-

Digitization by Arya Samaj Charitable Foundation, Chennai

प्यन्ते न समाप्यन्ते वा तावदेवाऽन्यत्राऽन्यत्राऽप्यारब्धाः स्युरित्येवं तस्मिंस्तदविच्छेदान्नित्यैव सेति। तत्र क्वचित् किञ्चिद्वैलक्षण्येन क्वचित्त्वैकरूप्येणारम्भः विशेषणानां भेदादभेदाच्च ॥ ४२ ॥

नन्वस्त्वविच्छेदः, कथं सैव वर्त्तते इत्युच्यते पृथगारम्भाद्भिन्नैव सेति चेत्। उच्यते। कालभेदेनोदितानामपि तुल्यरूपाणां क्रियाणामैक्यं यथा परेषामपि द्विर्गोशब्दोऽयमुच्चरितो न तु द्वौ गोशब्दाविति प्रतीतिनिश्चितं शब्दैकत्वं यथा च द्विः पाकोऽनेन कृतो न तु द्वौ पाकाविति क्रियैक्यं च, तथैतत् प्रत्येतव्यम्। अत

गवद्रूपादीनामानन्त्यमापाद्य लीलानित्यत्वार्थमविच्छेदं तस्याः समर्थयति—तत्तदाकारेति। एकत्रैकत्रेत्येकैकस्मिन् प्रकाशे। अन्यत्रान्यत्रेत्यन्यस्मिन् प्रकाशे इत्यर्थः। तदविच्छेदात् क्रियाविच्छेदविरहादित्यर्थः। क्वचिदिति। क्वचिन्मातुरङ्के स्थितः क्वचित्तु स्वर्णपीठे निविष्टो हैयङ्गवीनमत्ति हसति चेति विशेषणयोर्भेदो भाव्यः ॥ ४२ ॥

लीलाङ्गानां देशकालपरिकराणामैक्यं प्राक् प्रतिपादितम्। अथ समानरूपाणां तासां पृथगुदितानामप्यैक्यं प्रतिपाद्यते। तत्राशङ्क्यते-नन्वस्त्विवाति। अत्र शाब्दिकसम्मतं दृष्टान्तयुगलमाह-यथेति। परेषां प्राणिनाम्। ते हि 'शब्द इति चेत्'इति सूत्रे उपचर्यमनेनैवं विममृषुः। यदुक्तमिति। बृहदारण्यके पठ्यते। ब्रह्मनि-

Digitization by Arya Samaj Charitable Foundation, Chennai

एवमाह श्रुतिः "यद्भूतं भवच्च भविष्यच्च" इति, "एको देवो नित्यलीलानुरक्तो भक्तव्यापी भक्तहृद्यन्तरात्मा" इति च, स्मृतिश्च "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन" इति। ईदृ-शावगतिस्त्वतिरहस्या भगवदनुग्रहैकसाध्येति—"यावा-नहं यथाभावो यद्रूपगुणकर्मकः। तथैव तत्त्वविज्ञान-मस्तु ते मदनुग्रहात्" इति तदुक्तेः॥ ४३॥

किञ्च "न पश्यो मृत्युं पश्यति" इत्यत्रैकस्यैव पार्षदस्य युगपत् सर्वलीलाकर्मकदर्शनप्राप्त्योः प्रतिपादनाद्भगव-द्रूपस्तत्र कालस्तद्रूपरविचन्द्राद्युदयास्तमनसिद्धदिवसरा-

---

र्थं गुणकर्मलक्षणमर्थजातं नित्यं गतभवद्भाविष्यच्छब्दैस्तस्य त्रैकालिकस्थितिनिवेदनाव। एक इति। पिप्पलादशाखायामाथ-र्वणिकाः पठन्ति। जन्मेति। श्रीगीतासु। दिव्यमप्राकृतं मत्स्व-रूपानुबन्धीति यावत्। तद्वेत्तुर्मोक्षोक्तेः। ईदृशावगतिः कर्म-णामपि भगवत्त्वेनाऽवबोधः। यावानिति। द्वितीये ब्रह्माणं प्रति भगवद्वाक्यम्। यावान् यत्परिमाणः। मध्यमत्वेऽपि विभुत्वलक्ष-णः। यथाभावो यादृशसत्ताको यादृशस्वभावो यादृशपार्षदश्च। भावः सत्तास्वभावेत्यादिमेदिनीकरकोशात्। स्फुटमन्यत्॥ ४३॥

धाम्नः समयस्य च भगवदात्मकस्य सर्वत्र सान्निध्यं व-क्ष्यते इति यत्पूर्वमुक्तं तदिदानीं प्रतिपादयति—किञ्च न पश्य इ-त्यादिना। भगवन्नित्यधामस्थो भगवद्रूपः कालो जडात्कालाद्वि-

Digitization by Arya Samaj Charitable Foundation, Chennai

त्रिमात्रतया तदिष्टतत्तल्लीलानुगुणत्वात् प्रचकास्ति न त्वयनवत्सरादिरूपतां भजति । तावतैव तत्तल्लीलारसनिष्पत्तेर्युगपत् सर्वर्तूदयसत्त्वाच्च । तदनुगुणतयैव तदंशाविर्भावतिरोभावौ स्याताम् । एवमभिप्रेत्यैव स्मर्यते "स यत्र क्षीराब्धिः सरति सुरभीभ्यश्च सुमहान्निमेषार्धाख्यो वाव्रजति न हि यत्रापि समयः । भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये" इति । एवं धाम्नोऽपि तद्रूपस्य सर्वत्र संबन्धः । यदुक्तं वृद्धैः "अतः प्रभोः प्रियाणां च धाम्नश्च समयस्य च । अविचिन्त्यप्रभावत्वान्नात्र किञ्चित्

न्नः युगपत् क्रमिकबहुक्रियानिर्वर्त्तकत्वात् भगवद्वत् । जडात्मा कालः खलु क्रमादेकस्य बहुक्रिया निर्वर्तयति भगवद्रूपः कालस्तु युगपदिति तद्भिन्नः स इत्यर्थः । तदिष्टेति । भगवदीप्सिततत्तत्क्रीडानिर्वर्त्तक इत्यर्थः । तावतेति । दिवसरात्रिमात्रेण कालेनेत्यर्थः । तदनुगुणतयेति । लीलानुकूलतयैव कालावयवानामाविर्भावादित्यर्थः । स यत्रेति । ब्रह्मसंहितायाम् । निमेषार्धेति । विभातसङ्गवमध्याह्नादीनां कालावयवानां धामावयवेषु स्थितत्वादिति भावः । श्वेतेति । मायामालिन्यविरहात् श्वेतमत्युज्ज्वलम् अत्युच्चस्थितत्वात्तद्धाम्नः, न त्वनिरुद्धदेवस्य क्षीराब्धिगतं धाम 'इह' इत्याद्युक्तेः । एवमिति । तद्रूपस्य भगवदात्म-

Digitization by Arya Samaj Charitable Foundation, Chennai

सुदुर्घटम्''इति। प्राकृतेभ्यो ग्रहेभ्योऽन्ये चन्द्रसूर्य्यादयो ग्रहाः लीलास्थैरनुभूयन्ते तथापि प्राकृता इवेति च ॥४४॥

अत एव देवर्षिणा बहुभिरहोभिर्भाव्या लीला एकेनैवाह्ना दृष्टा इति श्रीशुको निरूपयामास "नरकं निहतं श्रुत्वा तथोद्वाहं च योषिताम्"इत्यादिना। न च बहुभिरहोभिस्तेन ता दृष्टा इति वाच्यम्। तथा सति योगमायामहोदयेक्षणहेतुकतद्विस्मयानुपपत्तेः ॥ ४५ ॥

प्राकृताः सूर्य्यादयो जडात्मा कालश्च तत्र न सन्ति—"न तत्र चन्द्रार्कवपुः प्रकाशते न वान्ति वाता न च यान्ति देवताः । यत्र देवः क्रतुभिर्भूतभावनः

कस्य। यदिति। वृद्धैः श्रीरूपचरणैः। लीलास्थैः। प्रकटलीलावर्त्तिभिर्भक्तैः। प्राकृता इव प्रसिद्धचन्द्रादितुल्या इव न तु प्राकृता इत्यर्थः ॥ ४४ ॥

उक्तं पुष्णन्नाह—अत एवेति। भगवदात्मकालसाचिव्यादेवेत्यर्थः। एकेनैवेति। विभातसङ्गवादिवपुषाविर्भूतेन कालेन तत्तत्कालिक्यो लीला दिवसेनैवैकेन दृष्टा इत्यर्थः ॥४५॥

ननु जडात्कालादन्यो भगवदात्मा कालो नित्ये धाम्नि लीलासिद्धिकृदस्तीति नाङ्गीकर्त्तुं शक्यते प्रमाणादर्शनादिति चेत्तत्राह-प्राकृता इत्यादि। न तत्रेति मुण्डके। तत्र नित्ये धा-

Digitization by Arya Samaj Charitable Foundation, Chennai

स्वयं विभूत्या विरजः प्रकाशते," "न तत्र सूर्य्यो भाति-न चन्द्रतारके नेमा विद्युतो भान्ति कुतोऽयमग्निः", "मृत्युर्यस्योपसेचनक इत्थावेद यत्र सः", "न यत्र कालोऽनिमिषां परः प्रभुः। कुतो नु देवा जगतां य ईशिरे", कलामुहूर्त्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः" इत्यादिश्रुतिस्मृतिभ्यः। अत एव न तत्रत्यानां कालिको विशेषः ॥ ४६ ॥

तदेवं बाल्यादीनि हरेर्नित्यानित्यैः संबद्धास्तास्ता

म्नि। देवः सर्वाराध्यः। परमात्मा क्रतुभिः सङ्कल्पैरेव भूतभावनः। स्वात्मककालसिद्धाभिर्विचित्राभिर्लीलाभिः स्वभक्तानां पालक इत्यर्थः। न तत्रेत्यगूढार्थम्। मृत्युर्यस्येति। कठवल्ल्याम्। मृत्युः सर्वग्रासी कालांशः। यस्य विश्वौदनभक्षकस्योपसेचनं दध्यादीत्यर्थः। न यत्रेति। श्रीभागवते। अनिमिषां ब्रह्मादिदेवानां परो नियन्ता कालो यत्र न प्रभुस्तत्र तन्नियम्या देवाः कुतः प्रभव इत्यर्थः। कलेति श्रीवैष्णवे। अत एवेति। तत्रत्यानां तल्लोकनिवासिनां कालिको विशेषो जरामरणादिलक्षणावस्था नास्ति। 'विशेषः कालिकोऽवस्था' इत्यमरः। नित्ये धाम्नि जड एव कालः किं तु तत्र तस्य प्रभावो नास्ति न यत्रेत्यादावेवमेवार्थावगमात् ततोऽन्यस्यिन् प्रमाणालाभाच्चेत्येके वदन्ति ॥ ४६ ॥

प्रकरणार्थं निगमयति-तदेवमिति। पूर्वोक्तप्रकारेणेत्यर्थः।

Digitization by Arya Samaj Charitable Foundation, Chennai

लीला नित्याः सर्वैः पार्षदैर्यथाधिकारं सर्वैश्चानुभाव्या इति । तदिदं चोक्तं सूत्राभ्याम् "व्याप्तेश्च समञ्जसम्" "सर्वाभेदादन्यत्रेमे" इति । तथैव भाषितं च ॥४७॥

इदं तु बोध्यम् । स्वरूपेण चिच्छक्त्या च कृता लीला सनातनी । तेन प्रकृतिकालाभ्यां च कृता तु

अत्र परमर्षिनिर्णयमाह–तदिदं चोक्तमिति । व्याप्तेश्चेसस्यार्थः । श्रीगोपालोपनिषदि श्रीरामोपानिषदि च भगवतो बाल्यादयो धर्माः श्रुतास्ते ध्येया न वेति सन्देहे तैर्विग्रहे भगवति न्यूनाधिकभावापत्तेरैकरस्यवाक्यव्याकोपात्तैर्ध्येया नेति प्राप्ते बाल्यादिधर्मिणस्तस्य व्याप्तेर्विभुत्वात्तैस्तत्र तद्भावाभावाच्च तेषां ध्यानं समञ्जसमेवेत्यर्थः। सर्वेसस्यार्थः। ननु बाल्यादिकर्माण्यारम्भसमाप्तिमत्त्वेनानित्यानि विदितान्यतः किं तेषां ध्यानेनेति चेत्तत्राह–ये हारितज्जनास्तत्कर्मांशा वा पूर्वस्मिन् कर्मणि काले वाऽभूवन् त एव येऽन्यत्रोत्तरस्मिन् कर्माणि काले वा भवेयुरित्यङ्गीकार्यम् । कुतः सर्वेषां पूर्वोत्तरकर्मवर्त्तिनां हारितज्जनानां पूर्वोत्तरकालवर्त्तिनां तत् कर्मांशानां च भेदविरहादित्यर्थः । तथा च तेषां तेषां पूर्वोत्तरास्थितत्वेन नित्यत्वात् समञ्जसं ध्यानमिति। विशेषस्तु भाष्ये द्रष्टव्यः ॥ ४७ ॥

लीलासु कश्चिद्विशेषमाह-इदं त्विति । कृतेति । नित्ये धाम्नीति बोध्यम् । तेनेति स्वरूपेण । कृता त्विति । प्रपञ्चे इति ज्ञेयम् । कादाचित्क्यनित्या । इतरथा सर्गादिलीलानां नित्यत्वाङ्गी-

Digitization by Arya Samaj Charitable Foundation, Chennai

कादाचित्की। सा च सर्गादिदैत्यवधादिरूपैव स्यात्। इतरथा प्राकृतिकलयोक्तिव्याकोपः। ननु तल्लये प्रपञ्चमात्रविनाशात्तद्गोचरायाः प्रकटाया नित्यत्वं कथमिति चेत्। तद्गोचरताया विनाशेपि तद्व्यक्तेरविनाशात् शिखी ध्वस्त इति वत्। सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामत इति हि न्यायविदां स्थितिः॥ ४८॥

तदेवमैश्वर्य्यमाधुर्य्यौदार्य्यादिगुणरत्नाकरस्य नित्यधामादेः पुरुषोत्तमस्य पूर्णाविर्भावे स्वयं भगवच्छब्द-

---

कारे। ननु तल्लये इति। 'अनन्तानि तवोक्तानि यान्यण्डानि मया पुरा। सर्वाणि तानि संहृत्य समकालं जगत्पतिः। प्रकृतौ तिष्ठति तदा सा रात्रिस्तस्य कीर्त्तिता'इति विष्णुधर्मात्। तद्गोचरायाः प्रपञ्चगता सा। तद्गोचरताया इति। प्रपञ्चवर्त्तित्वस्य विशेषणस्येत्यर्थः। तद्व्यक्तेर्लीलारूपस्य विशेष्यस्येत्यर्थः। शिखीति। शिखायां ध्वस्तायां यथा विप्रस्य न ध्वंसस्तद्वत्। विद्वन्निर्णयोऽत्र प्रमाणमित्याह-सविशेषणे इति॥ ४८॥

महाप्रकरणमुपसंहरति तदेवमिति।प्रकृतार्थम्। तयोरिति। सुखप्राप्तिदुःखपरिहारयोरात्यन्तिकयोरित्यर्थः। तदिच्छया पुरुषोत्तमेच्छया। उत्तरे रुचिभक्ताः। छन्दत इत्यस्यार्थः। विधिभक्ति-

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्यापूर्णाविर्भावे तु विलासांशादिशब्दबोध्यस्य तस्यैश्वर्य्यमाधुर्य्यविषयतया द्विविधेन ज्ञानेन जायमाना विधिप्रवृत्ता रुचिप्रवृत्ता चेति द्वेधा भक्तिः साधनरूपा साध्यरूपा च। सैवात्यन्तिकयोस्तयोः सिद्धौ हेतुः। तदिच्छयैव तस्यां तस्यां ते ते जीवाः प्रवर्त्तन्ते, तेषूत्तरे श्रेष्ठा इति दर्शितं भगवता सूत्रकारेण "छन्दत उभयाविरोधात्","गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः", "उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्"इत्यत्र । एवमेव

श्च रुचिभक्तिश्चात्र भगवत्प्रापिका श्रूयते । तत्र का तत्प्राप्तिकरीत्यनिश्चयात्तत्र तत्र प्रवृत्तेरसम्भव इति प्राप्ते—छन्दत इति। पूर्वतो नेत्यनुवर्त्तते । छन्दतस्तादृशसत्प्रसङ्गानुयायिभगवत्सङ्कल्पादुभयोर्भक्त्योस्तत्प्रसङ्गिनां जीवानां तत्सङ्कल्पानुगता प्रवृत्तिः स्यादेवेति न प्रवृत्त्यसम्भवः। कुतः। उभयविधश्रुत्यनुरोधादित्यर्थः। गतेरिति। एवं स्वीकारे गतेस्तत्प्राप्तेरुभयथाऽर्थवत्त्वं विधिभक्तिस्फुरिततदैश्वर्य्येण रुचिभक्तिस्फुरिततन्माधुर्य्येण च फलितमित्यर्थः। अन्यथा विधिरुचिभक्तिप्रतिपादिकयोः श्रुत्योर्विरोधो मिथो व्याघातः स्यादित्यर्थः। उपपन्न इति। विधिभक्त्यनुष्ठायी श्रेष्ठो रुचिभक्त्यनुष्ठायी वेति संशये विधिविभूषितत्वादाद्यः श्रेष्ठ इति प्राप्ते अन्त्यः श्रैष्ठ्यमुपपन्नः। कुतः। तत्तादृशस्वभक्तानिरतत्वं लक्षणं यस्य स चासावर्थश्च रुचिभक्तिविषयो यशोदात्मजो भगवान्। तस्योपलब्धेः स्वाधी-

Digitization by Arya Samaj Charitable Foundation, Chennai

च निरूपितं भाष्ये । तथा च पूर्वोदितं सर्वं सुस्थिरम् ॥४९॥

इति सिद्धान्तरत्नाख्ये भाष्यपीठके भगवदैश्वर्यादिनिर्णयो द्वितीयः पादः ॥२॥

नत्वेन लाभादित्यर्थः । लोकवत् । लोके यथा नृपानुवृत्तिनिपुणस्तं वशयन् प्रशस्यते तद्वत् ॥ ४९ ॥

इति श्रीगोविन्दभाष्यपीठकटिप्पण्यां द्वितीयः कौमोदकीपादो व्याख्यातः ॥ २ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

तृतीयः पादः ।

अथ स एष भगवान् सर्वेश्वरः पुरुषोत्तमसमाभ्यधिकः परावान् जन्मादिषड्भावविकारशून्यो देवताविशेषो भवतीति प्रतिपत्तव्यम् । "तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् । पतिं पतीनां परमं परस्ताद्विन्दाम देवं भुवनेशमीड्यम्", "न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च," "न तस्य

ॐ नमः श्रीकृष्णाय विघ्नच्छिदे ।

नित्यानन्दविज्ञानमूर्त्तिर्नित्यधामपार्षदलीलः सर्वेश्वरो ज्ञानभक्तिभ्यां प्रसन्नः स्वपर्य्यन्तं सर्वं स्वभक्ताय ददातीति पादाभ्यां साधितोऽर्थस्तदा स्थैर्य्यमासीद्यद्येतद्विरोधिनः सर्वदैवतैक्यादिवादिनो निवर्त्तेरन्निति तन्निवर्तकस्तृतीयश्चक्रपादोऽयमारभ्यते—अथेत्यादिना । स पूर्ववर्णित एषोऽनुभवपदवीमारूढः । परावान् पराख्यस्वरूपशक्त्या नित्यमुपेतः। षडिति । जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते विनश्यतीति भावविकाराः

Digitization by Arya Samaj Charitable Foundation, Chennai

कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स कारणं कारणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" इत्यादिश्रवणात् ॥ १ ॥

स एष सर्वकारणभूतो भगवान् सर्वेषां मुमुक्षूणामुपास्यो न त्वन्यः कश्चित् "तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय", "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ", "अमृतस्यैष सेतुः" इत्यादिश्रुतेः । स्मरन्ति चेत्थं मुनयः—"ईश्वरो भगवान् विष्णुः परमात्मा सनातनः । शास्ता चराचरस्यैको यतीनां परमा गतिः । ध्यायतेऽर्चयते योऽन्यं विष्णुलिङ्गं समास्थितः । कल्पकोटिशतेनापि न गतिस्तस्य विद्यते:"

षट् । देवताविशेषः स्वान्यनिखिलदेवाराध्या देवता । न तस्येति । कार्यं करणं जन्यमिन्द्रियम् । नैवेति । येनानुमितिरुत्पद्यते तल्लिङ्गं तस्य नास्तीति श्रुत्येकमयः सः । जनितेति । 'जनिता मन्त्रे' इति सूत्रेण णेर्लोपाज्जनयितेत्यर्थः । स्फुटमन्यत् ॥ १ ॥

उक्तं देवताविशेषत्वं मोक्षदातृत्वेन धर्मेण द्रढयति । स एष इति । न त्वन्यो रुद्रादिः । तमेवेति । पुरुषसूक्ते । तं विष्णुमेव । विदित्वा ज्ञात्वोपास्य च । तमेवैकमिति मुण्डके । ते परमात्मानमेवैकं सर्वाध्यक्षं जानथ वित्त ध्यायत च यूयम् । अन्यास्तदन्यदेवताविषया वाचो विमुञ्चथ । यदेषोऽमृतस्य मोक्षस्य सं-

Digitization by Arya Samaj Charitable Foundation, Chennai

इति, "तमेकं बहुधात्मानं प्रादुर्भूतमधोक्षजं। नान्य-भक्ताः क्रियावन्तो यजन्ते सर्वकामदम्", इति "तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्। ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च॥ अनादिनिधनं विष्णुं सर्व-लोकमहेश्वरम्। लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्। एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः" इ-ति॥ २॥

एवमेव स्वयमप्युपदिशति "मय्येव मन आधत्स्व मयि बुद्धिं निवेशय। निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः," "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इत्यादि

तुराश्रयभूत इत्यर्थः। ईश्वर इत्यादि भारते। विष्णुलिङ्गम्। बाह्यमाभ्यन्तरं च वैष्णवचिन्हं समास्थितः संश्रितः। गृहीतवैष्णवदीक्ष इत्यर्थः। विष्णुं हित्वान्यदेवोपासनायां महापराधापत्तेः। कदाचिदपि तस्य न गतिरित्यर्थः। तमेकमिति। नान्यभक्ता एकान्तिनः क्रियावन्तो वैष्णवाचारविशिष्टाः। तमेव चेति। सर्वदुःखातिगो लिङ्गपर्यन्तक्लेशमुक्तः। एष्वेवैकशब्दाभ्यां मोक्षाय तस्यैवोपास्यता तस्यैव मोक्षदातृता च दृढा॥ २॥

एवमेवेति। यथा श्रुत्या मुनिभिश्चोक्तं तथा सर्वेश्वरोऽप्याहेत्यर्थः। मय्येवेति। श्रीगीतासु। मय्येव निवसिष्यसि मत्सामीप्यं गमिष्यसीत्यर्थः। चतुर्विधा इति। नारायणीये। एकान्तिनो

Digitization by Arya Samaj Charitable Foundation, Chennai

"चतुर्विधा मम जना भक्ता एव हि ते स्मृताः॥ तेषामेकान्तिनः श्रेष्ठास्ते वै चानन्यदेवताः॥ अहमेव गतिस्तेषां निराशीः सर्वकर्मणाम् । ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ॥ सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् । ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः ॥ प्रतिबुद्धा न सेवन्ते मामेवैष्यन्ति यत्परम् । भक्तं प्रति विशेषस्ते एष पार्थानुकीर्त्तितः" इति च । तस्मात् सर्वेश्वरो विष्णुरेव मुमुक्षुभिर्ध्येय इति ॥ ३ ॥

मदेकपुरुषार्थाः । निराशींषि निष्कामतया कर्त्तव्यानि सर्वाणि स्वविहितकर्माणि येषां ते, लोकसंग्रहाय ये गौणकाले कर्माणि कुर्वन्ति मद्भक्तिं तु तात्पर्येणेति भावः । ये त्विति । त्रय आर्त्तादयः । च्यवनधर्माणो विनाश्युपासनोपलब्धफलाः । प्रतिबुद्धो मदेकान्ती स्वरूपज्ञः । अन्या गणेशादयः । पार्थ हे अर्जुन । सर्वेश्वरो विष्णुरेवेति । 'मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः' इति हरिवंशे घण्टाकरणं प्रति शिवोक्तेः । ननु शिवादीनां च मुक्तिदत्वं क्वचित् स्मर्य्यते । सत्यम् । ते हि लिङ्गान्यात् क्लेशान्मोक्षं प्रयच्छत्येव, विष्णुस्तु लिङ्गादपि मोचयतीति सर्वं समञ्जसम् । अन्यथोक्तं शिववचनं पीड्येत । माया खलु विष्णोरेव शक्तिः । स हि स्वप्रपन्नेषु प्रसन्नस्तेभ्यस्तामपसारयति न त्वन्येषां तत्र शक्तिर्दैवीत्यादितद्वाक्यात् ॥ ३ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

परे तु नात्रमन्तव्याः—"हरिरेव सदाराध्यः सर्वदेवेश्वरेश्वरः। इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन" इति स्मृतेः॥ ४॥

अत्र केचिदाहुः—सर्वेश्वरो विष्णुर्देवताविशेष इति नोपयुक्तम्। "इष्टापूर्त्तं बहुधा जायमानं विश्वं बिभर्त्ति भुवनस्य नाभिः", "तदेवाग्निस्तद्वायुस्तत् सूर्यस्तदु चन्द्रमाः", "अग्निः सर्वा देवताः" इत्यादिश्रुतिषु, "येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इत्यादिस्मृतिषु च सर्वकर्मसंराध्यानां सर्वासां

नन्वेवं विष्णुरेव चेत् सर्वोत्तमो मुक्तिदस्तर्हि तदुपासकैस्तदन्या देवता अनादरणीयाः नृपपार्षदैरिव तदमात्यादय इति चेत्तत्राह—परे त्विति। परे ब्रह्मरुद्रादयो नात्रमन्तव्याः किन्तु तदीयत्वेन सत्कार्या एवेति भावः। हरिरेवेति पाद्मे॥ ४॥

एवं विष्णोरेव पारमैश्वर्य्यादि साधितम्। अथ तत्प्रतिपक्षं सर्वदैवतैक्यवादं निराकर्त्तुं तन्मतं तावदनुवदति—अत्र केचिदिति। इष्टेति। बहुधा जायमानमिष्टापूर्त्तं यद्ब्रह्म विभार्त्ति पालयति। इष्टं ज्योतिष्टोमादि। आपूर्त्तं कूपारामादि। विश्वं सर्वं च यद्बिभर्त्ति धत्ते। यतो भुवनस्य नाभिराश्रयभूतम्। किंरूपं तद्ब्रह्मेत्यपेक्षायां—तदेवाग्निरिति स्फुटं ब्रह्मैव 'अग्निरेव च सर्वा देवताः' इत्युक्तेः। सर्वदेवतैक्यमनेनावगतं सिद्धान्ते तु स्वशक्तिद्वारा ब्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

देवतानामेकत्वावगमात् तासां सर्वासां पारम्यश्रुतेश्च। तस्मादेकैव देवता कर्मभेदैराराध्यनामभेदान् धत्ते इत्यतो विष्णोरेव पारतम्यमिति रिक्तं वचः॥ ५॥

मैवम्। "चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत", "नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते नारायणात्प्रजापतिः प्रजायते नारायणादिन्द्रो जायते नारायणादष्टौ वसवो जायन्ते नारायणादेकादश रुद्रा जायन्ते नारायणाद्द्वादशादित्या जायन्ते" इत्यादिश्रुतिषु, "ब्रह्मा शम्भुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः। एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा॥ जगत्कार्य्यावसाने तु वियुज्यते च तेजसा। वितेजसश्च ते सर्वे पञ्चत्व-

---

ह्मणः सर्वदेवतारूपत्वम्। पूर्वत्र निखिलदेवतामुखत्वादग्नेः सर्वदेवतात्वं परत्रोपचरितमिति बोध्यम्। तेऽपीति। श्रीगीतावाक्यं प्राग्वद्योज्यम्। पारतम्यश्रुतेश्चेति। तत्तत्प्रकरणेष्विति द्रष्टव्यम्। तस्माद्विष्णोरेव तदिति निरस्तम्॥ ५॥

चन्द्रमा इति पुरुषसूक्ते। चक्षोरिति चक्षुषः। नारायणादित्याथर्वणिकानां नारायणोपनिषदि। ब्रह्मा शम्भुरिति विष्णुधर्मे। पञ्चत्वं मरणम्। सर्वासामित्यादि। स्थानविशेषोत्पत्तिक्रमत्वादिना देवतानां मिथो भेदः। नारायणत्वेन परेशस्य ता-

Digitization by Arya Samaj Charitable Foundation, Chennai

मुपयान्ति च" इत्यादिस्मृतिषु च सर्वासां देवतानां परेशस्य च मिथोभेददर्शनात्ताभ्यस्तस्य पारम्यावगमाच्च। सर्वदेवतासामानाधिकरण्यं तु तदायत्तवृत्तिकत्वादिभिरुपचर्य्यते। इतरथा "तमीश्वराणां परमं महेश्वरम्" इत्यादिश्रुतीनां, "देवान् देवयजो यान्ति पितॄन् यान्ति पितृव्रताः। भूतान् यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्" इति फलभेदस्मृतेश्च व्याकोपापत्तिः। एवं सति सर्वासां पारम्यश्रवणमापेक्षिकं स्तुतिपरं वा भविष्यतीति ॥ ६ ॥

अपरे त्वाहुः। मास्तु सर्वदेवतैक्यं, ब्रह्मविष्णुरुद्राणां त्रयाणामैक्यं तु वर्त्तते। "यो वै विष्णुः स वै रुद्रो यो रुद्रः स पितामहः। एका मूर्त्तिस्त्रयो देवा रुद्रविष्णुपितामहाः॥ वरदा लोककर्त्तारो लोकनाथाः स्वयम्भुवः। अर्धनारीश्वरास्ते तु व्रतं तीव्रं समास्थिताः॥"

भ्यो भेदः तेनैव पारम्यं च। इतरथेति। तदायत्तवृत्तिकत्वेन तद्व्याप्यत्वेन शक्तिमतस्तस्मात्तदनतिरेकेण च सामानाधिकरण्यानङ्गीकारे मुख्याद्वैतस्वीकार इत्यर्थः। देवानिति श्रीगीतासु। एवमिति। आपेक्षिकं तत्तदन्यावरापेक्षमित्यर्थः॥ ६ ॥

सर्वदेवतैक्यवादिनि निरस्ते त्रिदेव्यैक्यवादी प्रत्यवतिष्ठते—मास्त्वित्यादिना। यो वै इति हरिवंशे। स्वयंभुवोऽजाख्यत्वात्। ब्रह्मा नारायण इत्यादिकं श्रीवैष्णवे दृष्टम्। ब्राह्मणा इति

Digitization by Arya Samaj Charitable Foundation, Chennai

"ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान् यथा । प्रजाः ससर्ज भगवान् ब्रह्मा नारायणात्मकः ॥ ततः स भगवान् विष्णू रुद्ररूपधरोऽव्ययः । कालाग्निरुद्रेऽरूपो सौ भूत्वा सर्वहरो हरिः ॥ सर्गस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् ॥ स संज्ञां याति भगवानेक एव जनार्दनः" इत्यादिस्मृतिप्रामाण्यात् । आह चैवं मार्कण्डेयं प्रति रुद्रः—"ब्राह्मणाः साधवः शान्ता निःसङ्गा भूतवत्सलाः । एकान्तभक्ता अस्मासु निर्वैराः समदर्शिनः ॥ सलोका लोकपालास्तान् वन्दन्त्यर्चन्त्युपासते । अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः ॥ न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते" इति । तस्मात्त्रयाणामैक्यमास्थेयमिति चेत् ॥ ७ ॥

मैवम् । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्राहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शर-

---

द्वादशस्कन्धे । अस्मासु त्रिषु देवेषु । अहं चेति । अहं च ब्रह्मा च स्वयं हरिश्च वयं तान् वन्दामहेऽर्चयाम उपास्महे इत्यर्थः । तत इति । मयि रुद्रे अच्युते विष्णौ अजे चतुर्मुखे भिदामण्वीमपि न चक्षते पश्यन्ति । तस्मादुक्तवचनकदम्बाद्धेतोः । आस्थेयं स्वीकार्यम् ॥ ७ ॥

प्रत्याचष्टे-मैवमित्यादिना । यो ब्रह्माणमित्यादि काठके ।

Digitization by Arya Samaj Charitable Foundation, Chennai

णमहं प्रपद्ये"इति, "नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायते"इत्यादि, "यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्"इति चैवमादिश्रवणात् । स्मृतिश्च— "प्राहुरादित्यवर्णं तं पुरुषं तमसः परम् । बृहन्तं सर्वगं देवमीशानं वरदं प्रभुम्" इत्युपक्रम्य "ततो ब्रह्मा समभवत् स तस्यैव प्रसादजः । क्रोधाविष्टस्य संजज्ञे रुद्रः संहारकारकः ॥ एतौ तौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदा दर्शित पन्थानौ सृष्टिसंहारकारकौ ॥ निमित्तमात्रं तावत्त सर्वप्राणिप्रवर्त्तकौ । सब्रह्मकाः सरुद्राश्च सेन्द्रा देवा महर्षिभिः ॥ अर्चयन्ति सुरश्रेष्ठ देवं नारायणं हरिम् । यद्ब्रह्मा ऋषयश्चैव स्वयं पशुपतिश्च यत् ॥ हव्यं कव्यं च सततं विधियुक्तं प्रयुञ्जते । कृत्स्नं च तस्य देवस्य चरणावुपतिष्ठति ॥ भविष्यतां वर्त्ततां च भूतानां चैव भारत । सर्वेषामग्रणीर्विष्णुः सेव्यः पूज्यश्च नित्यशः" इत्याद्या । शिवोऽपि "स्वयं च हरिरीश्वरः" इति हरेरेव सर्वेश्वरत्वमदर्शयत् ॥ ८ ॥

प्रहिणोति मनसैव पाठयति । यमिति ऋचि भगवद्वाक्यम् । यं जीवमहं कामये इच्छामि तमुग्रं रुद्रं करोमि । स्फुटमन्यत् । प्राहुरित्यादिकं नारायणीये । एषु वाक्येषु विष्णोः पारमैश्वर्य्यं विस्पष्टम् । ब्रह्मरुद्रयोस्तदुपासकत्वं च ॥ ८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

अथापि "यत्पादनखावसृष्टं जगद्विरिञ्चोपहृतार्हणाम्भः सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः" इति स्मृत्या तु निर्णीतं तत्, अभेदोक्तयस्तु तदायत्तवृत्तिकत्वादिभिः संगच्छन्ते "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विष्णुः पुरुषरूपेण परियाति त्रिशक्तिधृक्॥ ब्रह्मा शम्भुस्तथैवार्कः" इत्यादिस्मृत्यानुगुण्यात् । तस्माद्विष्णुरेव सर्वेश्वर इति सिद्धम् ॥ ९ ॥

केचित्त्वेवं समादधते । साक्षाद्विष्णुरेव चतुर्मुखत्वमुग्रत्वं चाङ्गीकृत्य क्वचित् सृजति संहरति चेति पुराणेषु निरूप्यते, तद्दृष्ट्या वा तदभेदोक्तयः प्रवर्त्तेरन् ।

न चायमाधुनिको निर्णयोऽपि तु पुरातन एवेत्याह—अथापीति । प्रथमस्कन्धे। सेशं साशिवं जगत् । अन्यत् प्रकटार्थम् । तर्ह्यभेदवचसां का गतिस्तत्राह—अभेदोक्तयस्त्विति । सृजामीति द्वितीये ब्रह्मवाक्यम् । तन्नियुक्ता विष्णुना प्रवर्त्तिताः ॥ ९ ॥

सङ्गत्यन्तरमाह—केचित्त्विति। पुराणेषु वैष्णवादिषु । तथापीति । तस्य चतुर्मुखस्य तस्योग्रस्य चेत्यर्थः । बुद्धवादिसस्यायं भावः । यदा हरिरेव ब्रह्मा रुद्रश्च भवति तदापि तद्वेशस्य तत् स्वभावस्योपासना न मोक्षकरी तद्वेशोपासका हि विष्णुविद्वेषिणो जगदुद्वेजकाः स्वोपास्योद्वेजकाश्च दृष्टाः, विष्णुवेशोपासकास्तु ब्रह्मादिसत्कारिणो जगदनुरञ्जकाश्च । एतदभिप्रेत्योक्तं 'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

तथापि तस्य तस्य चोपासनं वुद्ध्वन्मुमुक्षुभिर्न विधेयं "तमेव विदित्वा" इत्यादिश्रुतिस्मृतिभ्यः। इत्थं च हरिवंशोक्तहारिहरस्तोत्रमपि व्याख्यातमिति ॥ १० ॥

अपरे त्वाहुः। मास्तु त्रयाणामैक्यं किन्तूभयोर्हरिहरयोस्तु तद्वर्त्तते श्वेताश्वतरोपनिषदि हररुद्रादिशब्दवाच्यस्य सहस्रशीर्षादिशब्दैरभिधानात् "शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः। यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः ॥ यथान्तरं नश्यामि तथा मे स्वस्तिरायुषि" इति स्मृतेश्च। एवं हरिहरस्तोत्राच्च तदैक्यं निश्चितम्।

स्थित्युदये हरिविरञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः' इति। एवमुक्तसौहार्दभरेणैव श्रीरामचन्द्रकविराजैः प्रह्लादध्रुवरावणानुजवालिव्यासाम्बरीषादयो विष्णूपासनयैव तेपि भवादीनां प्रिया जज्ञिरे। येमेरावणवाणयौद्रिकवकक्रौञ्चान्धकाद्या अमी यद्भृत्या न च तत्प्रिया न च हरेस्तस्माज्जगद्वैरिणः। शिवो भवतु वैष्णवः किमजितोऽपि शैवः स्वयं तथा समतयास्तु वा विधिहरादिमूर्त्तित्रयं त्रिलोक्य भववेधसोः किमपि भक्तवर्गक्रमं प्रणम्य शिरसापि तान् वयमुपेन्द्रदासान् स्तता इति। तथा वा भेदपक्षेपि विष्णुवेशस्यैवापासना मुक्तिदेति॥१०॥

एवं त्रिदेव्यैक्यवादिनि निरस्ते हारिहरैक्यवादी प्रत्यवतिष्ठते–मास्त्वित्यादिना। हररुद्रादिशब्दवाच्यस्य वस्तुनः शिवस्येति। भारते। अन्तरं भेदम्। एवमिति। हरिहरस्तोत्रं श्रीहरि-

Digitization by Arya Samaj Charitable Foundation, Chennai

"शिवस्य श्रीविष्णोर्य इह खलु नामादि सकलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः" इति तद्भेददर्शिनो नामापराधरूपमहादोषश्चात एव स्मृतः । सकलमिति हरिहरस्तोत्रोक्तं चक्रत्रिशूलादि ग्राह्यं, तदपि धिया भिन्नं यः पश्येदित्यर्थः । तस्माद्विष्णुशिवयोरद्वैतमिति चेत् । नैव तत् समीचीनं पूर्वोक्तश्रुतिस्मृतिभ्यः । यत्तु हररुद्रादिशब्दवाच्यस्य सहस्रशीर्षादिशब्दैरभिधानात्तयोरैक्यमित्युक्तं, तन्न । तस्यां हरादिशब्दैः विष्णोरेवाभिधानात् ॥ ११ ॥

सहस्रनामस्तोत्रे शर्वशिवशम्भुरुद्रादिशब्दा विष्णुनामानि पठ्यन्ते । तेषां तत्र प्रवृत्तौ निमित्तानि चोक्तानि

वंशे प्रसिद्धम् । तत्र तयोः सपरिकरयोरद्वैतं कण्ठतः पठितम् । शिवस्य श्रीविष्णोरिति पाद्मे सनत्कुमारवाक्यम् । अत इति । अभिन्नयोर्भेददर्शनादेव हेतोरित्यर्थः । यत्त्विति । सहस्रशीर्षादिविष्णुरर्जुनादिप्रत्यक्षश्च हरस्तु त्रिनेत्रो वृषभध्वजो दुर्गापतिः ख्यातः यच्च क्वचित् सहस्रशीर्षा हरोपि पठ्यते तत्र खलु तदन्तर्यामिविष्णुपरतयैव नेयम् ॥ ११ ॥

उक्तं हेतुमुपपादयति-सहस्रेति । वैशम्पायनोक्ते इति बोध्यम् । तत्रेति । रुद्रपिनाकिकृत्तिवासःशब्दानां येन निमित्तेन शितिकण्ठे प्रवृत्तिस्ततोऽन्येन तु विष्णौ प्रायेणोभयत्र योगरूढिरियम् । ईशानमहादेवशिवहरब्रह्मेन्द्रशब्दाः शितिकण्ठादिषु योगेन विष्णौ तु प-

Digitization by Arya Samaj Charitable Foundation, Chennai

ब्रह्माण्डे—"रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः। ईशनादेव चेशानो महादेवो महत्त्वतः॥ पिबन्ति ये नरा नाकं मुक्ताः संसारसागरात् । तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः॥ शिवः सुखात्मकत्वेन सर्व-संरोधनाद्धरः। कृत्त्यात्मकमिदं विश्वं यतो वस्ते प्रवर्त्तयन्॥ कृत्तिवासास्ततो देवो विरिञ्चश्च विरेचनात् । बृंहणाद्ब्रह्मनामासावैश्वर्य्यादिन्द्र उच्यते॥ एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः। वेदेषु स पुराणेषु गीयते पुरुषोत्तमः" इति ॥ १२ ॥

"नारायणादीनि विनाऽन्यानि नामानि स्वनामानि द्रुहिणादिभ्यो ददौ" इति चोक्तं स्कान्दे । "ऋते नारायणादीनि नामानि पुरुषोत्तमः । प्रादादन्यत्र भगवान् राजेवर्त्ते स्वकं पुरम्" इति। ब्राह्मे च "चतुर्मुखः शतानन्दी ब्रह्मणः पद्मभूरिति। उग्रो भस्मध-

---

हायोगेन प्रवर्त्तन्ते, मण्डलाधिपेषु सार्वभौमेषु च यथा भूपादिशब्दास्तेन तेनेति बोध्यम् । रुजमिति । रुजं संसारव्यथां द्रावयतेऽपनयति नाकं परमानन्दं पिबन्त्यनुभवन्ति । कृत्त्यात्मकं चर्ममयं वस्ते आछादयति । विरेचनात् प्रधानादितत्त्वानां तमः शब्दिताया मूलप्रकृतेः प्रकटनादित्यर्थः ॥ १२ ॥

राजेवेति । नृपो यथा स्वावासं विनान्यानि नगराणि स्वा-

Digitization by Arya Samaj Charitable Foundation, Chennai

रो नग्नः कपालीति शिवस्य च। विशेषनामानि ददौ स्वकीयान्यपि केशवः" इति। स्वकीयानि रुद्रविरिञ्चादीनि च॥ १३॥

ब्रह्मवादिनो वदन्तीत्युपक्रान्ते ब्रह्मैव तैः शब्दैस्तस्यामभिधीयते। इतरथा "या ते रुद्र शिवा तनुरघोरा पापकाशिनी। महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्त्तकः॥ सुनिर्मलामिमां शान्तिमीशानो ज्योतिरव्ययः" इत्यादिविशेषोक्तिव्याकोपः। कपालिनस्तु शिवस्य घोररूपता मुमुक्षुहेयता च स्मृता-"मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ। नारायणकलाः शान्ता भजन्ति ह्यनसूयवः" इत्यादौ॥ १४॥

'शिवस्य हृदयं विष्णुः" इत्यादिषु तु तयोरछद्म नि-

मासेभ्यो ददाति तद्वत्॥ १३॥

तस्यां हरादिशब्दैर्विष्णोरेवाभिधानादिति पूर्वोक्तमिदानीं प्रतिपादयति-ब्रह्मेत्यादिना। ब्रह्मोपक्रमात्ते शब्दा ब्रह्माभिधायिन इत्यर्थः। विपक्षेऽनुपपत्तिमाह-इतरथेति। विशेषोक्तीति। अघोरतनुत्वसत्त्वप्रवर्तकत्वशान्तेशानत्वरूपवैष्णवधर्मावेदकवाक्यबाधः स्यादित्यर्थः। ननु रुद्रेपि ते धर्मा नेया इति चेत्तत्राह-कपालिनास्त्विति। मुमुक्षव इति। प्रथमस्कन्धे प्रकटार्थम्॥ १४॥

शिवस्येति। तयोर्हरिहरयोः विरोधं भनक्ति-अपरे त्विति।

Digitization by Arya Samaj Charitable Foundation, Chennai

वेद्यते न तु स्वरूपाभेदः प्रागुक्तश्रुत्यादिभ्यः। "शिवस्य श्रीविष्णोः" इत्यादौ तु तस्य स्वतन्त्रदेवतात्वदृष्टिर्निषिद्धा तद्वृत्ताधिपत्याभिधानत्वेन तदायत्तवृत्तिकत्वात्तद्रूपत्वं वेति न कापि क्षतिः। अपरे त्वाहुः—नामादीत्यादिना स्वरूपं च तदभिन्नं यः पश्येदित्यर्थः "ब्रह्माणं शितिकण्ठं च" इत्यादिपूर्वोक्तेः "यस्तु नारायणं देवम्" इत्यादिवक्ष्यमाणाच्च। तस्मात् स्वरूपैक्यं तयोर्नास्तीति सिद्धं श्रीविष्णोरेव पारम्यम्॥ १५॥

अन्ये त्वाहुः। मास्तु त्रयाणामभेदो द्वयोर्वा, किन्तु त्रयो देवाः समा इत्यङ्गीकार्यम्-"यथा ससर्ज देवोऽसौ देवर्षिपितृदानवान्। मनुष्यतिर्य्यग्यक्षादीन् भूव्योमसलि-

---

श्रीवैष्णवा इति बोध्यम्। अग्रे धर्मव्रतेत्यादौ शिवनामापराध इति। मङ्गलरूपस्य नाम्नोऽपराध इत्यर्थः। यद्वा, शिवस्य मङ्गलरूपस्य विष्णोर्नामादि यो धियापि भिन्नं पश्येत् स नामाहितकरस्तन्नामादेस्तत्स्वरूपाभिन्नत्वादिति। तथा च न काचिच्छङ्केति। यत्तु क्वचित्पुराणे रुद्रस्य पारम्यं सहेतुकमुक्तं तदुपेक्ष्यं तस्य तामसत्वात् सात्त्विकपुराणेन बाधितत्वाच्चेति। मात्स्यादाववगतं निर्णीतं चैतद्वेदान्तस्यमन्तकादौ। भारतीयं तत्त्वग्रे निरसनीयम्॥ १५॥

त्रिदेवीसाम्यं निराकर्त्तुं तदादावुपन्यस्यति—अन्ये त्वित्या-

Digitization by Arya Samaj Charitable Foundation, Chennai

लौकसः ॥ यद्गुणं यत्स्वभावं च यद्रूपं च जगद् द्विज । सर्गादौ सृष्टवान् ब्रह्मा तन्ममाचक्ष्व विस्तरात् ॥ चराचरस्य सर्वस्य रुद्रः संहारकारकः । ततः कालाग्निरुद्रोऽसौ संहरत्यखिलं जगत् ॥ न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिम्" इत्यादिस्मृतिषु कार्य्यत्रये त्रयाणां निरपेक्षहेतुत्वप्रतीतेः । ततश्च विष्णोरेव पारमैश्वर्य्यनिर्णयो नोपयुक्त इति । नैतच्चतुरस्रम्, पूर्वोक्तश्रुतिस्मृतिभ्यः ॥ १६ ॥

"न तत्समश्चाभ्यधिकश्च दृश्यते," "न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः", "न त्वत्समश्चाभ्यधिकः कुतोऽन्यः", "स्वयं त्वसाम्यातिशयस्त्र्यधीशः", "नित्ये हि नास्ति जगति भूतं स्थावरजङ्गमम् ।

दिना । यथा ससर्जेत्यादिकं श्रीवैष्णवे दृष्टं मस्फुटार्थम् । कार्यत्रये सृष्टिसंहारपालनलक्षणे । निराकरोति—नैतदिति । चतुरस्रं पूर्णमित्यर्थः ॥ १६ ॥

न तदिति न तस्येति च श्वेताश्वतराणां श्रुतिः । न त्वादिति । श्रीगीतास्वर्जुनवाक्यम् । स्वयमिति । तृतीयस्कन्ध उद्धववाक्यम् । नित्यं हीति नारायणीये । विधिरुद्रादिप्रधानं जगदानित्यम् । तत्रैको वासुदेवो विष्णुस्तु नित्य इत्यर्थः । अत उक्तं ब्राह्मे ब्रह्मणा 'नाहं शिवो न चान्ये च तच्छक्त्येकांशभागिनः । बालः

...an's Sri Sankaracharya San... Mahavidyalaya ★ Bharatiya Vi...

Digitization by Arya Samaj Charitable Foundation, Chennai

ऋते तमेकं पुरुषं वासुदेवं सनातनम्'' इत्यादिश्रुतिस्मृतिषु साम्यप्रतिषेधाच्च ॥ १७ ॥

सर्वेश्वरो हरिरेव सृष्टिसंहारौ करोति चतुर्मुखकपालिनौ तु तद्वश्यौ तयोर्निमित्तमात्रमेव "निमित्तं परमीशस्य विश्वसर्गनिरोधयोः । हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥ ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च । निगृह्य हरते यस्मात्तस्माद्धरिरिहोच्यते" इत्यादिस्मरणात् ॥ १८ ॥

क्रीडनकैर्यद्वत् क्रीडतेऽस्माभिरच्युतः' इति ॥ १७ ॥

स्वस्वकार्ये नैरपेक्ष्यं ब्रह्मशिवयोर्निराकरोति-सर्वेश्वर इति । निमित्तमिति । श्रीदशमे उद्धवोक्तिः । ब्रह्माणमिति । हरते स्वाभिमते कार्ये नियोजयति। निगृह्य नियम्य । आदिना निमित्तमात्रं तावन्नेत्यादिनारायणीयवाक्यं गृह्यते ॥ १८ ॥

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

DATE DUE

Class No. ______________ **Book No.** ______________

Accession No. 1112 ______________

This book should be returned to the Library on the date last stamped. A fine of 0.6 nP. will be charged for each day the book is kept over time.

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai